CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
5.2.P.13.
Coll. No. 839

Title Vidhānamala.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 839 Subject : Dharmaśāstra

Title : Vidhānamālā

Author : — Scribe : Bhaṭṭa Jāgeśvara.

Date of the work : — Date of the Ms. : V.S. १७६८

Place of the work : — Place of the Ms. : —

Size : 10.2" by 4.5" Extent : 272 foll.

Language : Sanskrit Script : Devanāgarī

Remarks : —

ग्रंथ
रघुनाथमहस्य
विधानमालिया ::
नु-न्दमालि का

॥ श्रीगणेशायनमः॥ अथविधान
मालानुक्रमणिका लिख्यते॥
९ विधानमालाशब्द निर्वचनं॥
९ पुष्पवती विधानं॥
१० विकृतजननशांति विधानं॥
११ यमलोत्पत्ति विधानं॥
१२ पितृनक्षत्रैककर्तृजन्मशांति॥
१३ मूलशांतिविधानं॥ १६ अश्लेषा वि॰
१५ गंडांतविधानं॥
१८ सूतिस्तन्यवंधविधानं॥

१९ बलग्रहपीडानाशनं
२० ऊर्ध्वकेशग्रहविधानं॥
२० विवृताक्षग्रहविधानं॥
२० नवग्रहविधानं॥
२१ वायसग्रहविधानं॥
२१ महाकिंद्रिग्रहविधानं॥
२२ क्षेत्रपालग्रहविधानं॥
२२ हस्तिपादग्रहविधानं॥
२२ कर्णग्रहविधानं॥
२३ नोलग्रहविधानं॥

२३ स्कंदग्रहविधानं॥
२४ स्कंदापस्मारग्रहविधानं॥
२४ निग्रास्कंदग्रहविधानं॥
२५ मेषग्रहविधानं॥
२५ त्रिमुखग्रहविधानं॥
२५ महापूतनाग्रहविधानं॥
२६ रेवतीग्रहविधानं॥
२६ ऊर्ध्वपूतनाग्रहविधानं॥

२

२७ शकुनीग्रहविधानानि।
२७ द्वितीयरेवतीग्रहविधानं।
२७ शुष्करेवतीग्रहविधानं॥
२८ असत्पूतनाग्रहविधानं।
२८ गर्भिणीप्रथममासगर्भरक्षाबलि।
२८ प्रथममासगर्भवेदनाहरणौषधंच।
२९ द्वितीयमासगर्भ॰ बलि॰ औषधंच।
२९ तृतीयमासगर्भ॰ बलि॰ औषधंच।
३० चतुर्थमासगर्भ॰ बलि॰ औषधंच।
३० पंचममासिगर्भ॰ बलि॰ औषधंच।

३२ षष्ठमासिगर्भ॰ बलि॰ औषधंच।
३२ सप्तमासिगर्भ॰ बलि॰ औषधंच।
३३ अष्टमासिगर्भ॰ बलि॰ औषधंच।
३३ नवममासिगर्भ॰ बलि॰ औषधंच।
३४ दशममासिगर्भ॰ बलि॰ औषधंच।
३५ एकादशमासगर्भ॰ बलि॰
३५ द्वादशमासगर्भ॰ बलि॰
३५ सुखप्रसवोपायविधानं।
३७ जातस्यप्रथमेदिवसेमासेवर्षेच
ग्रहपीडा — रं विधानं॥
३९ जातस्यद्वितीयदिवसादि॰

३९ जातस्यतृतीयदिवसादि॰
४० जातस्यचतुर्थदिवसादि॰
४० जातस्यपंचमदिवसादि॰
४१ जातस्यषष्ठदिवसादि॰
४२ जातस्यसप्तमदिवसादि॰
४२ जातस्याष्टमदिवसादि॰
४३ जातस्यनवमदिवसादि॰
४३ जातस्यदशमदिवसादि॰
४४ जातस्यैकादशदिवसादि॰
४५ जातस्यद्वादशदिवसादि॰
४५ वंध्यानिषेकः।

४८ घटिकास्नान विधानं।
५० रुद्रस्नानविधानं॥
५२ देशनगरमहाव्याधिहरंविधानं।
५३ जनमारशांतिविधानं।
५४ हनुमत्पताका विधानं।
५८ गोशांतिविधानं।
६३ अश्वशांतिविधानं।
६८ गजशांतिविधानं।
प्रकारांतरेणगजमार
७२ शांतिउष्ट्रशांतिविधानं।

७३ खरशांतिविधानं।
७३ सारमेयशांतिविधानं।
७४ तंत्रनक्षत्रविधानं तत्रप्रयोगे
७५ तन्त्रोप्रतिनक्षत्रपूजादिविधानं।
८१ गृहारिष्टोपशमनविधानानि।
गृहाधारस्तंभभंगविधानं।
अग्निदग्धगृहपुनराधानं।
८३ पेषणीभंगविधानं।
८४ गोडोपक्षिपातविधानं।
८४ गृहाधारस्तंभभंगविधानं।

८५ अग्निदग्धगृहपुनराधानं।
८६ अपयामारिष्टशमनानि।
८७ वृक्षोफलारिष्टविधानं॥
८८ कदलीपुष्पप्रसवविधानं।
८९ निषिद्धतरुप्ररोहविधानं।
८९ स्वरूपारिष्टशमनंविधानं।
९० यात्रारिष्टशमनंविधानं।
९१ निकारिष्टशांतिविधानं।
९१ कपोतशांति विधानं॥
९१ पल्लीसरटनिपातशां २
९२ तिविधानं। मार्जनीपुष्ट
रजःस्पर्शशांतिविधानं॥

दीपकूष्मांडछेदनविधानं।
९३ फलचौर्यविधानं। नवग्रहगृहजनवि
९५ चतुरंगसैन्यदृढीकरणं। धानं।
९७ रणदीक्षाविधानं।
९८ विजयपट्टकंकणविधानं। वीरपट्ट
९९ सिंदूरपट्टविधानं। विधानं।
विजयपट्टविधानं।
९९ रणप्रवेशविधानं।

रक्षाविधिः।
नवौषधयः।
रणगुटिकाविधानं।
१०२ कपर्दिकाविधानं।
योगवटितशस्त्रविधानं
शस्त्रत्रोटनं।
कंटकव्रणविधानं।
१०३ पिच्छविधानं।
१०४ त्र्यंबकविधानं।
१०४ जयकाहलाविधानं।
आनद्धभंजनविधानं॥

नस्मरेखाविधानं।
१०५ रिपुमारणोपयोगियमार्गलयंत्रवि०
रिपुस्तंभनविधानं।
१०६ वैरोद्वेषणविधानं।
वैरीमोहनविधानं।
संकोलीविधानानि।
स्त्रीसुखप्रसवार्थंचतुस्त्रिंशाम
रव्यायंत्रं।
१०७ क्षेत्रकीटनिवारणंयंत्रविधानं।
शयनविनाशकरणं।
अन्यचतुर्विंशकयंत्रं।
छुरिकाद्वंद्वयुद्धविजयाभिधानं
द्विषष्टियंत्रविधानं।

ग्रहभूतपैशाच्यनिवारणं।
नक्षत्रसंख्याकयंत्रविधानं।
अपुष्पस्त्रीपुष्पकरं धात्रिं
राशिसंख्याकयंत्रविधानं।
१०८ अपामृत्युविधानं।
१०९ व्रतबंधकाले प्रदोषवर्जित
अनध्यायलक्षणीकरणवि०
१११ तृतीयभार्यापरिणयने तृतीया
चतुर्थीकिरणेस्तृतीयास्थाने
स्त्रीलिंगवृक्षपरिणयनं वि
धानं।

१११ अर्कवृक्षविवाहविधानं।
११२ प्रतिकूलविधानं।
प्रथमपङ्क्तिमात्रकापूजनक्रमः
वसंतपूजनविधानं।
११६ कार्तिकदीपोत्सवविधानं।
~~होलिकाविधानं।~~
माघमासरथसप्तमीविधानं।
११७ होलिकाविधानं।
११८ चैत्रप्रतिपद्ध्वजविधानं।
नष्टोपशमने तात्कालिकंवि०
काकपिंडविधानं।

चराचरिक्षधान्यपरीक्षाविधि।
१२० चैत्रशुक्लवायुपरीक्षाविधा०
वायुपरीक्षाविधानं।
वत्सराधिपतिपूजाविधानं।
१२१ दमनकारोपणविधानं।
नाविकामहोत्सवविधानं।
१२८ नागपंचमीविधानंशीतलाषष्ठी
युक्तं।
१२९ पवित्रारोपणविधानं।
नागपूजागरुडपंचमीविधा०
१३२ आश्विनमासिचंडीविधानं।
१३५ इंद्रमहोत्सवपौष्टिकविधानं। ३

१३८ विजयदशमीविधानं।
१४० नरकचतुर्दशीविधानं।
बलिमहोत्सवविधानं।
१४१ संकीर्णविधानानि कथ्यंतेतत्र।
शिवलिंगखंडनविधानं।
१४३ भूमिभेदविधानं।
पर्वतविघ्नहरणं विधानं।
१४४ मध्येरात्रे धेनुइंवारकविधानं।
१४५ अश्वत्थपूजाविधानं।
१४६ ब्रह्मचारीनिधनविधानं।

१४७ कुष्ठीमरणविधानं।
अपमृत्युमृतेनाराय
णबलिविधानं।
१४८ पतिमरणविधानं।
१४९ भृगुपातविधानं।
१५१ अग्निप्रवेशविधानं।
१५३ काष्ठनिषेवणविधानं।
१५४ साधारणहरिकथावि०
भारतश्रवणविधानं।
१५६ हरिवंशश्रवणविधानं।
रामायणश्रवणविधानं।

१५७ वासिष्ठश्रवणविधानं।
काशीखंडश्रवणविधानं।
ब्रह्मत्रयश्रवणविधानं।
कालिकापुराणश्रवणविधा०
माघमाहात्म्यश्रवणविधानं।
नानापुराणश्रवणविधानं।
१५८ वेदपारायणविधानं।
१५९ विनायकपूजाविधानं।
१६१ नवयज्ञमखविधानं।
याज्ञवल्क्योक्तं वसिष्ठोक्तं
नवयज्ञमखविधानं॥

१७४ काकमैथुनदर्शनविधानं।
१७५ काकश्येनकपोतादिदुःस्व
प्नावहरविधानं।
१७६ मासपूजाविधानं।
जन्ममासतिथिनक्षत्रजन्म
पूजामातंगिनीपूजाविधानं।
१८० जीवस्याकर्षणविधानं।
१८२ अपोह्य — सूतकीशुद्धिवि०
विरजयात्राविधानं।
आदित्यवासरे औदुंबरपूजावि०

१८४ अर्केदियविधानं।
१८५ कपिलषष्ठीविधानं।
१८७ गोदावर्यां सिंहस्थबृहस्प
तिपूजाविधानं।
मोक्षतीर्थपंचकंब्रह्म
हत्यादिशमनंविधानं।
१८९ श्रीशैलयात्राविधानं।
१९० कार्तिकेयदर्शनविधानं
गोपीचंदनार्पणपवित्रा
रोपणातिलार्पणाक्षमा
लार्पणसुवर्णार्पणमंत्राः।

१९१ ब्रह्मकूर्चविधानं।
बालकस्योर्द्धदंतोद्भववि
भ्रूलंगविधानं।
मशानदापूरलंगविधानं।
१९९ अपोत्पन्नस्यबालस्यमास
वृध्यादिवृद्धिविधानानि।
मृत्युंजयविधानं।
रुद्रानुष्ठानंसर्वकामनावि
षयंआपत्तिविषयंच।
२०६ वृक्षारोपणविधानं।
वृक्षोद्यापनविधानं।
२०९ वटोद्यापनविधानं।

४

२१० तडागोद्यापनविधानं।।
वापीकूपादिजलाश्रयो
द्यापनविधानं।
२१२ प्रपाविधानं।
२१३ अन्नछत्रविधानं।
२१४ दत्तपुत्रकविधानं।
२१५ ग्रहणसूतकदोषदूषितौ
षधमंत्रदृढीकरणविधानं।
ग्रहणसूतकहरणमंत्रौषधि०
२१६ अमृतमृतवार्ताश्रपरिहरणंवि०

२१७ चर्मपात्रशुद्धिविधानं।
२१८ सर्वगदनिवारणंशिव
पूजनविधानं।
वृषोत्सर्गविधानं।
२२० नारायणबलिविधानं।
२२८ नागबलिविधानं।
२३१ अस्थिपुरुषीकरणविधानं।
अस्थ्यलाभेपलाशविधानं।
२३४ प्रेतकर्मणिदुष्टादुष्टकालन
क्षत्रविधानं।
२३५ धर्मशास्त्रप्रेक्षणं।
शकुनशास्त्रविधानं।

सप्तशतीप्रेक्षणविधानं।
भागवतशकुनावलोकनवि०
२३५ रघुवंशस्यावलोकनं।
२३८ उपाकृतिविधानं।
२३९ अथत्रिपुष्करादियोगजाता
निर्विघ्नकरणानितद्भंगविधानं।
पुनर्लक्ष्मीकरंविधानं।
२४० ग्रहणदोषहरंविधानं।
२४१ दग्धादिदोषदुष्टवस्त्रदोषहरंवि०
सर्वदुष्टापमृत्युहरंविधानं।
२४२ मंत्रोपदेशविधानं।

सूरणद्विपदानास्यांत्रिलयागोरसर्षपैः॥कुंकुमाकुरुरंनानिश्चंद्र चंदनकोषिके॥१॥दशांगोयंम हाधूपोनाम्ना संमोहनानिधः। त्रैलोक्यंमोहयत्येवकाम बाणसमः स्मृतः॥२॥सूरण।करिमदामनशाज।गोरसर्षप।केसर।अगरू।केलकंदोकस्तूरा।चंदन।गुगल।

२४३ सूर्यपूजाविधानं।
२४४ चंद्रपूजाविधानं।
२४५ मंगलपूजाविधानं।
२४६ बुधशांतिविधानं।
२४७ गुरुशांतिविधानं।
२४८ शुक्रशांतिविधानं।
२४९ शनैश्चरपूजाविधानं।
पूजानंतरंस्तोत्रपाठः।
पुनर्द्वितीयशनैश्चर पूजावि०
२५४ राहुपूजाविधानं।
२५५ केतुपूजाविधानं।
२५७ तुलापुरुषपूजाविधानं।
२५० दिव्यमातृकाविधानं।
सर्वदिव्येषु धर्माबाह्ननंधर्मचीरिकाबंधनं।
२५४ स्थालीपाकादिहोमंकुंडलक्षणविधानं।
विशेषकुंडानि।
ब्राह्मणलक्षणादि।
द्रव्यहोमविशेषः।
स्रुवधारणं।
२५८ दिवयोनिलक्षणं।
सर्वहोमकुंडविधानं।
२५८ विवाहव्रतबंधमध्येमातृहर
जोदोषहरंविधानं।
डिकानामानि।
डिकास्तुतिः।
२६० पुण्याहवाचनं।
इतिविधानमालानुक्रमणिका॥

५

इदं पुस्तकं रघुनाथभट्टस्य पृ. ४४
महाराष्ट्रशांतिय

॥०॥ श्रीवरदमूर्त्तिर्जयति ॥ ॥ यो धान्वंतरशास्त्रमर्थचतुरः कारुण्यरत्नाकरः सौजन्यामृतपूर्णमानससरि-
द्भूरींद्रानु चित्तः सदा ॥ कृपालालितकलालनीयचरणद्वंद्वस्य स्तनुर्ध्वरेंद्रविस्तारियशाः सदा जयति श्रीविश्वना- वि२
थः सुधीः ॥१॥ प्रणम्य लंबोदरमुत्तमानां संतोषदां सर्वपुराणदृष्टां ॥ धर्मार्थकामव्यवहारसिध्यै करोमि शुद्धार्थवि-
धानमालां ॥२॥ विधानमालेति ग्रंथनाम विधेयं तच्चान्वर्थं विधानानां मालेव माला परंपरेत्यर्थः ॥ विधानं विधिः ॥ यद्य-
पि विधानशब्दे करणाधिकरणयोश्चेत्यत्र ल्युटो बहुलं चावेचेत्यादि धर्मेषु ल्युट् स्मर्यते तथैवासंसर्गद्योः किं कर्म- दार्थ५
ण्यधिकरणे चेत्यादि षष्ठ्यर्थेषु किरपि स्मर्यते ॥ न तत्र विधानविधिशब्दयोः सर्वार्थविषयपर्यायित्वे संत्वैवैष्यच्च भावार्थ एव त्य५
ल्युट् विज्ञानमानंदं ब्रह्मेति वत् ॥ नैयायिकाभिमतप्रकृतिप्रत्ययार्थकल्पनातो कल्प्यांतरत्वेन गौरवत्वया द्वेदांतिनि-
ल्युट्भाव एवांगीकृतो ऽसंत्वे वा ताबाद्यपासति संत्वेवोद्भिदा यजेतेत्यादौ सामानाधिकरण्यं निर्वोढुं पूर्वपक्षि- २
णा मत्वर्थलक्षणाश्रिता सिद्धांतिना तु उद्भिनत्ति फलमिति खनित्रवदवयवव्युत्पत्त्यपरित्यागे च लक्ष-

मना१ णामाश्रितापि बलत्तिदादि कर्मांतरव्यवच्छेदकनामधेयपक्षांगीकारेण सामानाधिकरण्यमाश्रितं सोमेन यजे-
तिदध्नाजुहोति तेत्यादौ तु अग्निहोत्रं जुहोतीति वत्पृथगुत्पत्त्युत्पन्नवाक्याभावाद्यागं विधायांगत्वाहृत्यापि तस्मिन्नेव वाक्ये
सोमोपि विधीयते । अपांतरमंपरांतधृतेरिति न्यायेन अकर्वादिषु रूढिं परित्यज्यापि न क्षरतीत्यक्षर-
मिति अवयवप्रसिद्धिरंगीक्रियते इति कुत्रापि गौरवमेव न्याय्यं । अत्र तु लाघवेनैव चरितार्थत्वात् गौर-
वमन्याय्यं । यथा महागिरिमहोदधिसहितस्य महाक्षितिलक्षणस्य कार्यस्य कस्मिंश्चिदृष्टरि पातरि संहर्त्तरीश्वरे सं-
भवत्यनेकेश्वरकल्पनायां गौरवस्यान्याय्यत्वाल्लाघवमेव युक्तं । अतो विधानशब्दे ल्युट्प्रत्ययस्य भावार्थत्वा-
न्न करणाद्यर्थपरत्वं विधानशब्दो व्याख्यातः । इदानीं विधानमालाशब्दे समासे कदेशभूतो मालाशब्दो व्याख्या-
यते विधानानां माला विधानमाला ग्रथितानेकद्रव्यसमुदायो मालाशब्देनोच्यते । पुष्पमाला कंठमालेत्या-
दिप्रसिद्धेः । अनेकेषां विधानानां व्यापाररूपत्वेन क्षणिकत्वात् विधानसंबंधिमालानुपपत्तेः । प्रतिज्ञारो

पंचकेऽवयवशब्दस्यमुख्यार्थभिन्नत्वेनअवयवाइवावयवाइतिवत्उपमेयत्वेनमालेवमालेतिकृत्वाद्य
नन्र२ समासःकर्त्तव्यः।यद्येमालेवमालेतिव्याख्यानेविजातीयत्वाभावादेकस्यैवपदार्थस्योपमानोपमेयत्वाभा
वःघटइवघटःपटइवपटइतिवत्विरोधश्चसत्यं।तथापिमालेवमालेत्यत्रयथाश्येनेनाभिचरन्यजेते
त्यत्रश्येनशब्दस्यगुणपरत्वांगीकारेणमत्वर्थलक्षणाभावाच्छ्येनशब्दस्यनामधेयपरत्वेनसिद्धांतिना
श्रितावत्यर्थलक्षणातत्रपूर्वपक्षिणावत्यर्थलक्षणायामत्वर्थलक्षणातोबलीयस्त्वेनएकस्यैवोपमानो
पमेयत्वाभावेनचनामधेयपक्षस्यदुर्बलत्वेआशंकितेपुनःसिद्धांतिनावचनव्यक्तिसमयेलक्षण
मात्राश्रयणाभावेनाधिकदोषाभावःसमर्थःपिकिंचएकस्योपमानोपमेयत्वाभावोगगनंगगनाकार तः३
मितिघटतेतद्वन्मालेवमालेत्युपपद्यते।इतिविधानमालशब्दसमर्थनंयथाकथंचित्कृतंपरंतुविधान २
शब्दार्थस्यकरोत्यर्थस्यसर्वत्रचैकरूपत्वात्मालायाश्चानुपपत्तितोविधानमालाशब्दार्थोघटमानोप

नेकद्रव्यदेवतादिकरणप्रदानादिकारकसंबंधभेदाद्विधानानेकत्वस्योपपत्तेश्चोपपद्यते।तर्हि
तस्मिन्नपिसाध्यसाधनवैतिकर्तव्यतानिरूपणानांत्रयाणामपिभेदानांविधानशब्दवाच्यत्वेकर्षभावार्थए
वल्युट्इतिनिश्चयश्चतः।सत्यंपरंतुसाधनादीनांकारकाणांक्रियांप्रत्यप्राधान्यात्।दृष्टपक्षेनप्रत्य
कंविधानशब्दापेक्षानोररा।क्रियते।कर्मणईप्सितत्वात्क्रियापेक्षयाप्युद्देश्यत्वेनप्राधान्यत्वात्क
र्मणिस्फुट्।प्रत्ययेसंभवतिभावार्थएवल्युडितिनिश्चयःकथंसंपद्यतइतिचेत्सत्यं।कर्मणोप्यंशद्व
येनाप्राधान्यप्राधान्येउद्देश्यत्वेनप्रधानत्वंउपयोगित्वेनोकारकत्वादप्रधानत्वं।तेनाकारेणकर्म
णिकारकत्वंप्रवृत्तिःषट्कारकाणीतिनियमः।तस्मादपिभावार्थनियमोघटतेसती।अन्यास्तुविधा
नमालासुकिमर्थमियंविरच्यते।यतःसर्वपुराणदृष्टामितिअत्रपुराणशब्दोरूढिंपरित्यज्यप्याचा
रात्स्मृतिर्बलीयसीत्यनेनन्यायेनअवयवप्रसिद्धावेदतदंगोपांगस्मृतीतिशादिषुज्ञेणशास्त्रे सा१

षुप्रवृत्तः यद्यपि पुराणेषु न दृश्यते तथापि सर्वेषुमिलितेषु दृष्टामिति सर्वपदसार्थक्यं तर्हि सुखदा
र्थविधानमालामिति पद्ये पदस्य दृष्टत्वात्कथं विधानमालेत्येव व्याख्यातं। नायं दोषः सुखदार्थामिति
पद्ये पदस्यासंक्रांतः समासाभूतस्यापि सुखदार्थविशेषस्य इतरविशेषणापेक्षयात्यंतांतरंगविशेषण
प्रतिपादकत्वविज्ञापनार्थमसमसितत्वं। किंच। अनेकेष्वपि निबंधनेष्वेवं दृश्यते। संक्षिप्तयुक्त्यन्वितनर्क
नाथेति विज्ञेयं। संतोषदामित्यं तेन स्वगुणसामग्र्या निर्दोषरसनानां नानाकारिकामिषेण संतानां संतोषदात्री। मित्यर्थः॥ तो५
अयमभिप्रायः अनसूयकायानृजवे यत्नायेत्यनेन न इज्ज्वनाय तद्विपरीतेभ्यो ब्रूयादिति तात्पर्यतोवग
म्यते ये अनसूयका ऋजवश्च ते संतः तेषां संतोषदा अपवर्गगुणदोषौ निरीक्ष्य दोषप्रकाशनं कृ
त्वा ये गुर्वादयो दृष्ट्वा गुणदृष्टयः ते परोक्षमपरोक्षं वा सर्वज्ञसमानत्वात् संतो। ति संतः तेषां संतोष ३
दामिति कश्चिदपि पापीयान अभिशेषं जुहुयादिति श्रवणं संनयेदितिवत्। संतोषदां संतोषदे

त्रीमिति व्याख्यायात् तर्हि स्वर्गकामेन मीमांसकेन श्रेयसी वध्वो दृश्यते यस्मिन् होमे सोऽग्निहोत्रना
मधेयो होम इति होमविशेषस्समर्पितोऽयं यात पाक्षद्वार्थादिना बृसंनिधानाद्धरिं वंदे विष्णुं वंदेन ज
दुर्दरमित्यर्थादिवा। तां पार्वतीत्यादि निजजनेन नाम्ना बंधुप्रियां बंधुजनो जुहावेत्यत्र केन स्पर्धायां अब्दे
चेत्यर्थद्वये संभवत्यपि प्रथमातिक्रमे कारणाभावादिति न्यायेन स्पर्द्धार्थित्वे निश्चितेऽपि बंधुप्रियामि
त्यादि संनिहितार्थबलेन इन्द्रो पकयेप्रियं इत्यत्र गंधद्वारामित्याद्यर्थसंनिधानेनैव नाद्यार्थतात्र
तो हरिं वंदे जुहावोपकपदवत् संतोषवितरणशीलामिति घोरर्पणपरत्वं। एवंविधे ग्रंथग्रंथने को
हेतुरिति प्रश्ने प्रणम्य लंबोदरमित्युत्तरं लंबोदरलब्धि तेन दृष्टत्वेन शास्त्रस्य मंगलपरत्वं
ज्ञाप्यते यतो मंगलादीनि मंगलमध्यानि मंगलांतानि शास्त्राणि प्रथंते वीरपुरुषाणि भवंति आ
युष्मत्पुरुषाणि चेति महाभाष्यकारेणोक्तं। अथवा अग्नानुशासनमित्यत्राप्यथशब्दस्य मंगलार्थत्व

मानंतर्यार्थं विवितिसंदेहे अथातो धर्मं व्याख्यास्याम इत्यत्र धर्मशास्त्रे मंगलार्थसंभवति पुनर
त्वं२ थशब्दस्य मंगलान्यानंतर्यार्थं प्रदर्शितं। अथशब्दानुशासनमित्यत्रापि परमेश्वरं प्रति सूत्रकृ
तानमस्कारापेक्षयानंतर्यार्थत्वं कृतो न संभवेदित्याशंक्ये उत्तरं अत्र भाष्यकारीयोऽथशब्दः
सौत्रवृद्धिपदोपलब्धं मंगलार्थत्वमेवावलंबते। तर्हि नमस्काराकरणेऽशिष्टत्वापत्तौ उत्तर
यति येनाक्षरसमाम्नायेति प्रणिपातेनैव अइउणित्यादिचतुर्दशसूत्रीलब्धिनाऽक्षरसमु
दायः सूत्रकारेण पूर्वमेवोपलब्धः पश्चात्तत्त्वापेक्षया वृद्धिरादैजित्यत्र नमस्कारापेक्षा
यामतिष्ठां दसत्वं माभूदिति तदा नमस्कारो न कृत इति ज्ञायते। अपवा नमस्कारोद्देश्यपरमेश्व
रप्रसादे जाते पुनर्नमस्कारानुपपत्तेः। तस्मात्सूत्रार्थविरुद्धत्वे यत्रेति न्यायेन मंगलार्थसौत्रपदव्या ४
ख्यानमेव दुर्घटं। अत्रोत्तरं यद्यपि वृद्धिशब्दस्य साक्षान्मंगलपरता तथापि तस्यानिरूपक
संति१

त्वेनान्यपरत्वादन्यपरत्वमयुक्तं। अन्यायश्चानेकार्थत्वमिति न्यायात्। अक्षपदमाषादिषु त
गत्यानेकार्थत्वमंगीक्रियते। अत्र च गत्यंतराभावादनेकार्थता अयुक्ता। अत्र समाधत्ते यद्य
क३ पि संज्ञिनिरूपत्वं न वृद्धिशब्दः संज्ञाशब्दो लघ्वर्थं हि संज्ञाकरणं इति न्यायेन स्वशब्देन सर्वत्रा
दैचो प्रतिपादयन्नपि मंगलार्थं प्रयुज्यते। अत्र हि ऽऽमुपन्यस्यति सर्वत्रादेङ्गुणः इत्यानंतराः
संयोग इत्यादौ संज्ञासूत्रप्रगल्पे संज्ञिनिरूपणं अत्र तु व्यतिक्रमे कारणमेतदेव यन्मंगलादि
नान्शास्त्रेऽऽप्रचितव्यमिति सुतरां वृद्धिशब्दस्य मंगलार्थत्वे दुर्घटत्वं। तद्व्याख्यानपरतायाऽप्यशब्द
स्य तदपेक्षया सुगमत्वं अथैक एकाच् प्रत्यय इत्यत्र सूत्रकारस्यानवधेयत्वं संभाव्यतेऽयं पारस्तेत्व
नवधेयत्वाभावाद्व्यतिक्रमलिंगेन मंगलार्थता तद्वदेव लंबोदरमिति मंगलपूर्वं मंगलाचरणं पर२
चारब्धकार्यपरिपंथिविघ्ननिराकरणार्थं लंबोदरस्य विघ्ननाशे गणाधिप इति पादशेतानीति

विघ्नारंभे विवाहे चेति विघ्नस्तस्य न जायते चेति विघ्ननाशकं लंबोदरनामधेयं तस्मादादौ मंगलार्थ
मेव प्रयुक्तं। आक्षिपति प्रणम्य पदस्य ग्रंथारंभे विधीयमानत्वात्कथं लंबोदरमित्यत्र मंगलादि
त्वं सत्यं परं इति भनमस्काराचरणानंतरं नमस्कार्यनामधेयप्रतिपत्तिस्तु निर्गुणसंभावनया मंग
लादित्वमेवाह निर्धेयं सप्रयोजनमाह धर्मार्थकामव्यवहारसिध्य इति तादर्थ्ये चतुर्थीति न्यायेन
प्रयोजनं कथ्यते यथा काव्यप्रकाशे काव्यं यशसेऽर्थकृत इति यमर्थमधिकृत्य प्रवर्त्तते तत्प्रयोज
नं यदुद्दिश्य प्रवर्त्तंते पुरुषास्तत्प्रयोजनमिति च यद्वृत्तयोगं प्राप्स्यामीत्याद्युद्देश्यलक्षणमिति
धर्मं वार्थं वा कामं वोद्दिश्य पुरुषः प्रवृत्तो दृश्यते तस्माद्धर्मार्थकामानां प्रयोजनरूपत्वं यद्यपि ध
तीर मादिष्वनियम इष्यत इत्यादिरस्ति। तथापि कृच्छ्रादिजनस्य धर्मस्यानपेक्षितार्थस्यानर्थं धीनत्वा ५
त्प्राप्स्यामीति इतिस्त्वर्थकामविषयान्वेत्। तदर्थकामपुरुषार्थापेक्षया वस्तुवृत्त्यार्थस्यैव ध

ष्टि१ प्रयो२

र्मानंतर्यं त्रिवर्गनिर्णयोः कामाकामयोः धर्माधर्ममूलत्वे समाने कथमर्थस्यैव धर्मानंतर्यं सत्यं। तथा
प्यर्थस्य केवलं कामवत् धर्मस्य कार्यमेवेति नियमो नास्ति। धर्ममपि प्रतिकारणत्वेन दृष्टत्वात्तस्मा
द्धर्मार्थकामैरिति क्रमः सर्वथा घटते। एषां त्रयाणां व्यवहारः प्रवृत्तिलक्षणस्तस्य सिद्ध्यै प्राप्त्यै स च प्रवृत्ति
मर४ लक्षणो व्यवहारः क्वचिद्रागतः। तत्र शास्त्राविरोधे गुडशर्करादिलक्षणादावनिषिद्धसुखत्यागी प
दु५ रे वने इति न्यायेन रागजोऽपि व्यवहारो न दुष्टः। शास्त्रविरोधे पलांडुगृंजनादिलक्षणादौ रागजो दुष्ट ए
व अत्र त्रयं चागमतो व्यवहारस्तस्यैव सिद्ध्य इत्यर्थः। एकानि कर्माणि केवलं धर्मपराणि पुराणश्रवणा
दीनि एकान्यर्थपराणि गजाश्वशांत्यादीनि एकानि कामपराणि विजयदशमी बलिदीन विधानादीनि
एतेषामेवानंतभेदभिन्नत्वान्नैमित्तिककाम्यकाम्यैकदेशानित्यनित्यैकदेशाकाम्यनैमित्तिकनित्यनि
त्यनैमित्तिकानैमित्तिकैकदेशानित्यनित्यैकदेशनैमित्तिकानैमित्तिककाम्याकाम्यनैमित्तिकानैमित्ति

केकदेशाकाम्याकाम्यैकदेशानित्यनैमित्तिकानित्यकाम्यैकदेशनैमित्तिका नैमित्तिकैकदेशानित्यकाम्यादि
द्वाराकर्मणामनंतत्वं। यथा तत्त्वाधिकरणे पूर्वपक्षे किं जातिर्विशिष्टा व्यक्तिर्वा जातिसंबंधो वा जातिसमु
दायो वा जातिविशिष्टसंबंधो वा संबंधविशिष्टा जातिर्वा जातिविशिष्टसमुदायो वा समुदायविशिष्टा जा
तिर्वा जातिविशिष्टं कारकं कारकविशिष्टा वा जातिर्वा जातिविशिष्टा संख्या वा संख्याविशिष्टा वा जाति
र्वा जातिविशिष्टं लिंगं वा लिंगविशिष्टा जातिर्वेति इत्यादिपक्षाणामनंतत्वं एते पक्षाः अनंतत्वे दृष्टांतिताः
नोपयोगित्वेन सिद्धांतविज्ञातैर्वा नित्यत्वे घत्वादितरेषां च पक्षलक्षणीयत्वात्। दार्ष्टांतिकपक्षाणाम
तिशास्त्रबलेन सूक्ष्मदृष्ट्या संभवात् उपयोगित्वं तत्र च नित्यानि यावज्जीवमग्निहोत्रं जुहुयादि
त्यादीनि नैमित्तिकानि भिन्ने जुहोति स्कन्ने जुहोतीत्यादीनि काम्यानि ज्योतिष्टोमेन स्वर्गकामो ६
यजेतेत्यादीनि जन्माष्टम्यादीनि नित्यकाम्यैकदेशानि अकरणे प्रत्यवायश्रवणात्फलश्रवणाच्च॥

प
एवमनंतत्वात्कर्मणां प्रज्ञाबलेन स्वयमेवोह्यत्वं एषां प्रतिपादकवाक्यैकमियं दसंबंधत्वात्काम्या
नि २ न्येव। येषामकरणे प्रत्यवायस्तानि नित्यान्येव। येषां नियतदेशकालत्वाभावस्तानि नैमित्तिका
न्येव। पुत्रजन्मादिसमये अनुष्ठीयमानानि तानि नैमित्तिककाम्यानि काम्यनित्यैकदेशानि
अपारपक्षिकत्वान्निर्दी एवं कर्मणां अनंतत्वं एतेष्वेव शांतिकपौष्टिकसंज्ञानि विशेषतो निरूप्यं
ते ग्रन्थविस्ताराद्भिया नानिरूपेण कारणमाङ्गृह्यसूत्रकल्पसूत्रादिग्रंथेष्वर्पितत्वात् निरू
पणे दृष्टोपोक्तिलक्षणे दोष एव न गुणः। तस्मात् शांतिकपौष्टिकानि प्रत्येकं वर्ग्योपयोगीनि संकरजो
पयोगीनि च सर्वजने चमत्कारकारणानि कर्माणि निरूप्यंते। करोमीति प्रवृत्तिप्रत्ययार्थयोर्मध्ये
प्रत्ययार्थस्य प्राधान्यात् भावनारूपत्वे च क्रियमाणत्वं मानया एव तस्मादित्युपलभ्यते। यथा पु
ष्पमालाग्रथितुं मालाकारमेव प्रति कर्तृत्वं न च पुष्पाणि प्रति एवं मम अनेकशास्त्रौ दृष्टग्रंथे संग्र

इ कर्तृत्वमेव न तु ग्रंथकर्तृत्वं एषां ग्रंथानां पौरुषेयाणां महर्षिनिर्मितत्वात्। अपौरुषेयाणां तु का
कथा। अन्यथा विश्वामित्रादिवत् प्रतिकुंचकानि न वेयुः यदि आर्षाण्यपि मन्दायानीति योक्तिर्दृ
ध्यात् तेन मूर्षविरश्री त्र्यगो प्रश्नोत्तर वत्स्व वचो न विघातएव क्लृतं स्यात्। तस्माद्ग्रंथसंग्रहका
राएव कुत्राप्यसंगतो संगतिकाराः तास्व संगतय षट् आन्हेपिकी आयवादिकी प्रत्यक्षाइर
णलक्षणा बुद्धिस्थानलक्षणं आतिदेशिकी चेति इमाः स्वविषये परतंयथायथमुपयोक्तव्या इति
तात्पर्यार्थपरिशुद्धिः सर्वत्र ज्ञातव्या॥ ॥अत्रादौ पुष्पवतीविधानं निरूप्यते॥ ॥प्रथमर्तौ घ
टमाणां रजः साध्वसाध्विति विदित्वा साधुनः प्रतिकारः कथ्यते वाराहपुराणात्॥ प्रथमर्तौ दि
ये वा शुतास्तन्निरीक्षणं। कर्तव्यं ज्ञातृत्तिः सम्यक् सम्यक् ज्ञात्वा स्त्रविचारतः। शुक्लाय श्वेतवस्त्रा ७
ध्यारोगिणी रक्तवाससा। नीलांबरधरा नारी विधवा जायते ध्रुवं। नोगिणी पीतवस्त्रा च दृढव

स्त्रा पतिव्रता। दुर्भगा श्री सर्वस्त्रा च सुभगा क्षौमवस्त्रिणी॥ आलोकितेन्त्र वेदं ध्याश्वेतवर्णे च पुत्रि स्त्रा १
णी॥ लग्नेन विधवा नारी रजस्येतद्धुलक्षणं। ऊढा संवत्सरार्धे च मासे पक्षे तथा परवत्। रजस्कदर्श
ने स्त्रीणां सर्वदैवाशुभावहं। आद्यर्तौ विधवा नारी प्रतिपद्यां हृता स्मृता। चैत्रमासि विशेषेण वै
धव्यं लभते ध्रुवं। वैशाखे बहुपुत्रा स्यात् ज्येष्ठे रोगावृता भवेत्। आषाढे मृतप्रजा प्रोक्ता श्रावणे ध
निनी भवेत्। नाभ्रे दुर्भगा स्त्री वा आश्विने च तपस्विनी॥ कार्तिके निर्धना बाला मार्गशीर्षे बहुप्रजा॥
पौषे स्यात् पौंश्चली नारी माघे पुत्रसुखान्विता। फाल्गुने सर्वसंपन्ना प्रथमे ऋतौ फलं स्मृतं। आदित्ये विध गौ ४
वा नारी सोमे दैन्यमवाप्नुयात्। मंगले ह्यात्मघाताय कल्प्यते नात्र संशयः। बुधे च धनिनी प्रोक्ता गुरौ
भर्तुः सुखप्रदा। कन्यापुत्रप्रसू शुक्रे तार्गविस्य न संशयः। पौंश्चल्यकारिणी मंदे म्रियते भर्तुरग्रतः॥ ता: २
वैधव्यदा च प्रतिपद्द्वितीया पुत्रवर्धनी॥ सौभाग्यदा तृतीया च चतुर्थी सुखनाशिनी॥ पंचमी सुभगा

चैव षष्टी संततिनाशिनी॥ सप्तमी धननाशाय पुत्रदा सौख्यदाष्टमी॥ नवमी क्लेशदा स्त्रीणां द
शमी त्वसुतप्रदा। एकादश्य घनाशाय द्वादशी रतिवर्द्धनी॥ त्रयोदशी तु नाज्ञेया दुर्भगा च चतु
र्दशी॥ पौर्णमासी त्वमावास्या दुःखसंभोगवर्द्धनी॥ प्रातःकाले रजःस्त्रीणां प्रथमं शोकवर्द्धनं। संगवे
सुखसंतानं मध्याह्ने धनिसंततिः। अपराह्ने धनावाप्तिः सायाह्ने मध्यमं फलं। पूर्वरात्रे सुखायालं म
ध्यरात्रे धनक्षयः। अपरार्द्धे अर्थनाशः स्यात् प्रथमं तु फलं स्मृतं। गृहमध्ये सुखावाप्तिर्गृहद्वारे वियो
गिनी। शय्यास्था सुखदा भूमावनेकापत्यसंततिः। पुरं ध्या दृश्यते यत्तु रजः स्त्रीणां सुखायतत्। वि
वस्त्रया तु यदृष्टं रजो वैधव्यदं स्मृतं। रजः पश्यति चेत्कन्या पुमान्वा तत्सुखं भवेत्। स्वयं दृष्टं तु पा
त्रीणां मात्मघाताय कल्पते। पितृगृहे रजो दृष्टं विदधाति पितृःकुले। अश्विनी सुखदा स्त्रीणां
भरणी कामवर्धनी॥ कृत्तिका दैन्यदाग्नेया रोहिणी सुखदा भवेत्। मृगस्तु कामभोगाय सुख

दं रुद्रदैवतं। आदित्यर्क्षं च सुखदं गुरुभं सुखवर्द्धनं। आश्लेषा सुखनाशाय मघा वैधव्यदाः
स्मृताः॥ पूर्वाफाल्गुनिका पुत्रकन्यका सुखवर्द्धनी। उत्तरा घर्षनाशाय हस्तः पुत्रविवर्द्धनः।
चित्रा चित्रतनुं नारीं कुरुते नात्र संशयः। स्वाती सुन्नायनारीणां विशाखा सुखनाशिनी॥ सु
खदा पुत्तराखाढा श्रवणं सुखवर्द्धनं। धनिष्ठा पंचकं स्त्रीणां प्रथमं दुःसुखप्रदं। तिथिरेकगु
णा प्रोक्ता नक्षत्रं च चतुर्गुणं॥ वारः षष्टिगुणो ज्ञेयो मासस्त्वाष्टगुणः स्मृतः। वस्त्रं दशगुणं वि
द्याद्दर्शनं च ततोधिकं। अन्यत्ते चेद्रजः स्त्रीणां प्रथमं तौ हि दृश्यते। विधानं तत्र कर्त्तव्यं अरि
ष्टघ्नं विशेषतः। पंचमे दिवसे स्नात्वा धान्यामथ पत्रं मंगरैलैः। उत्क्षेस्तु वारिभिः श्रेष्टैः पंचपल्लव
संयुतैः। तिलतैलेन कुन्देन कुन्तकल्केन वा पुनः। आह्निकं च विधिं कृत्वा विधानं तु समारभेत्।
शुद्धाचारः समायुक्तः श्रद्धया परया युतः। स्थंडिलं च ततः कृत्वा स्वस्ति वाच्य द्विजोत्तमैः। अग्निप्र

तिष्ठाप्पूर्वं चरुं श्रपणं तत्र कारयेत्। अष्टोत्तरसहस्रं च जुहुयात्तिलसर्पिषा॥ प्राशनं पायसं प्रोक्तं
सघृतं च सशर्करं॥ आज्यहोमेनेतिमंत्रेण मूर्ध्नि चेति वा पुनः। सूर्यसूक्तं जपेद्विद्वान्विष्णुसूक्तं
च वा पुनः। सूर्यपूजां ततः कुर्यात्करवीरैः सुरक्तकैः। धूपार्थं गुग्गुलं दद्याद्दीपं दद्यात्प्रयत्नतः।
वह्निरुत्तरतो विप्रानुस्थापयेत्करवीरजं। हेमन्नः पंच फलार्थांच पलस्यापि सुलक्षणं। पला
स्नं।५ र्द्धेन तदर्द्धेन तदर्द्धार्द्धेन वा पुनः। सुवर्णेनापं चपचार्थां कदलेख विराजितां। राज्ञोक्तत प्रतिष्ठांत
तंदुलानां नृपोत्तम। आढकानां चतुष्टयं दद्यात्तां विप्रवर्याय सवस्त्रां च सदक्षिणां। अलंकृता
नाय विप्रेभ्यो श्रोत्रियाय कुटुंबिने। तत्र मंत्रः। सुवर्णे सुभगे देवि रक्ते भास्करवल्लभे। रक्तमांड ६
रजोदोषात् दुष्टस्यास्य विग्रहितात्। दानेनतव देवेशि ग्रहेशश्च सविता सुरवः। प्रीतोस्तु वतु मे स
द्यो दोषं हरतु दुष्करं॥ दानमंत्रः॥ आचार्यत्विं मज्ञानागमज्ञा दोषविनाशनः। दानस्यास्य

तंडुलानां परीमाणं ४ विप्रश्वतोर

प्रभावेन रजोदोषात्त्व पाहिमां॥ इत्याचार्यप्रार्थना॥ ततो निषेचनं कार्यं दंपत्योश्च विशेष
तः। वेदविद्भ्यो धनं देयं यथाशक्त्या भुतर्पणं। यस्मिन्मासे सितं दृष्टं रजो दृष्टे न यावदं। तदा
सो यत्नेन तस्याज्यं ततः शांतिकरं भवेत्॥ ॥इति नृसिंह भट्ट विरचितायां विधानमालायां प्रथमे
त्रैरजोदोषहरं विधानं॥१॥ ॥अथ विकृतजननशांति विधानं॥ ॥यद्यपि रजोदोषो निरातं न४
तस्तथापि रजः समये निषिद्धाचरणनिमित्तविकृतया कृत्यनिस्कृत आपस्तंबीये विश्वरूप
प्रपाठके प्रोक्तान्यायेन संभवति। अतो बुद्धिस्थमेतद्विधानं। विकृतांगानि जायंते अपत्या दै६
नि नृपोत्तम। यानि यानि मया बाहो तच्छृणुष्व विधानतः। हीनांगान्यधिकांगानि सदंतानि वि
शेषतः॥ उत्पन्नान्येव पुत्रश्यंति प्रवदंति हसंति च। सकूर्चानि च जायंते पित्रोर्मृत्युं दिशंति च। स
र्पव्याघ्रवृकादीनां रूपेण नानाविधैर्नृपा जायंते प्राणिनां गर्भमहाभयविधायकाः। उत्पद्यंते

विलीयंते कालेकेनैन दैहिनः। तज्जन्मलयनाशाय विधानं कथ्यते मया। यस्यास्तूदरसंभूता
दृश्यते किल तिर्नृप। दशाहादूर्द्ध्वमुद्दिष्टा स्नापनीया घृतैर्जलैः॥ जनयित्री च राजेंद्र जनैश्च कृ२
विशेषतः। स कृत्वा त्रापि मनुष्या शुक्लमाल्यानुलेपनाः। शुक्लांबरधरा स्वापि स्वस्तिवाचःत्रय
न्ततः। ततो निकिस्कककर्तृचिविद्धातविनायकं। समंदस्योत्तरे भागे स्थंडिले तत्र कारयेत्। वाच
यित्वा द्विजान् स्वस्ति पीठे पूज्याय मानतिः। कालायसमयी चंडी महिषोपरि संस्थिता। नवेन
वस्त्रयुग्मेन वेष्टिता च विशेषिता॥ चतुर्भुजा पिंगकेशा पिंगश्मश्रुविलोचना॥ कर्णिकारनवैः
पुष्पैः पूजिता सुमनोहरा॥ वामहस्ते गदा पूज्या दक्षिणे कालदंडकः। ऊर्द्ध्वे वामे हलः पूज्यः त
था खङ्गश्च दक्षिणे॥ यम प्रेत सरवत्राह देवदेव महामते॥ कालदंड धरः श्रीमान् वैवस्वत नमोस्तु १०
दि१ ते॥ ॥इति पूजा षोडशोपचारैः॥ अनेनैव मंत्रेण कर्त्तव्याः। ततो त्वग्निं प्रतिष्ठाप्य हवनं का

श्री१ रयेत्ततः। तिलाज्याद्भुतंडुलास्तत्र प्रधानं समुदाहृतं। तेनैव स्विष्टकृत् ज्ञेयं प्रायश्चित्तं तु सर्पिषा।
कृणुष्व पाजेति मंत्रेण जुहुयाच्च सहस्रकं। रक्षोघ्नांश्च जपेन्मंत्रान् शान्तिरस्त्वपि शांतये। ततो
दीपबलिं कुर्याद्धर्मराजस्य तुष्टये। समाप्य विधिवद्धोमं दानं तत्र समारभेत्। नीलांबर
कृतं चंडं माहिषं यमवाहनं। आचार्याय ततो दद्यात्सखङ्गं च सदक्षिणं। पुष्पमालावृतांगं
च स्वर्णशृंगमनोरमं। ताम्रपृष्ठं रौप्यखुरं रत्नपुच्छं सचामरं। दक्षिणार्थं सुवर्णं च दद्याद्धर्म
स्य तुष्टिदं॥ संपूज्य विधिवद्विप्रं वस्त्रालंकारभूषणैः। तत्र दानमंत्रः॥ यम वाहन नमस्ते
पु३ स्तु त्र अकालमरणापह। तुलायत्तवदानेन प्रीयतां मे परेतराट्। सदक्षिणं संपाद्य ततः श्रे माहिषं३
त२ यसंपादनपूर्वकं। ऋत्विक्पूजां ततो निषेको विद्यते मातापित्रोः सगोत्रयोः। ततश्च आचार्या
य यममूर्त्तिं प्रतिपादनांशः। तत्र मंत्रः॥ यमोसि पुण्यरूपोसि पुण्यमूर्त्तिर्निरामयः। दानेन तव दे

चेन्नाविघ्नानश्यंतुमेप्रन्नो॥इतियमप्रतिपादनं॥ततश्चयथाशक्तिर्ब्राह्मणतर्पणं॥एवंकृतेविधाने
तुविघ्नानश्यंतुनूरिशः॥विकृतिप्रसवोद्भूतानात्रकार्याविचारणा॥ ॥इतिश्रीपद्मपुराणमतं॥
विकृतिप्रसवजनितविघ्ननाशनंविधानं॥ ॥अथयमलोत्पत्तिविधानं॥ ॥करचरणाद्यन्यथा
ति४ त्वेविधानमस्क्रयमलस्यतु विकृतौलानावादेत्तत्तिकादन्यत्विधानंकथ्यते॥तदपिकाशीखं
त्रि५ डेशौनकसूतसंवादेषिविधायमलोत्पत्तिर्जायिते॥याषिता॥मिह॥सुतोचसुतकन्येयकन्यो
एवतथापुनः॥एकलिंगोविनाशाय द्विलिंगोमध्यमोस्मृतो॥पित्रोर्विरोधिनौज्ञेयौतत्रशां
दश३ तिर्विधायते॥इमम्मूर्तीविधातव्यौश्चयोश्चैवद्विजोत्तम॥पललेनवातदर्द्धेनतदर्धार्द्धेनवापु
नः॥ब्रह्मवृक्षस्यपृष्टेचस्थापयेद्रक्तवाससा॥स्वस्तिकेतंडुलानांचन्यस्तेपात्रेद्विजोत्तम॥पू ११
जयेद्रक्तपुष्पैश्चचंदनेनानुलेपयेत्॥दशांगेनैवधूपेनधूपयेत्प्रयतःपुमान्॥दीपेनीराज्ये

च्चैवनैवेद्यंपरिकल्पयेत्॥यस्मैत्वंसुकृतेजातवेदइतिमंत्रेणार्च्चनैरर्चयेत्॥अनेनैवतुमंत्रेण
होमंकुर्याद्दतंद्वितः॥अष्टोत्तरसहस्रंचपायसेनससर्पिषा॥शांतिपाठंजपैद्विप्रानुसूर्यस्त
क्तंजपेत्ततः॥विष्णुसूक्तंतथागाथांवैश्वदेवींजपेद्बुधः॥अश्वदानंततोदद्यादाचार्यायकुटुं
बिने॥तयोर्मूर्तीप्रदातव्येयजमानेनधीमता॥अश्वरूपौमहाबाहूअश्विनौदिव्यचक्षु
षौ॥अनेनवाजिदानेनप्रीयतांमेयमाश्विनौ॥इतिवाजिदानमंत्रः॥आचार्यःप्रथमोवेधा
विष्णुस्कंदसविनात्मगः॥दत्तमूर्तिप्रदानेनप्रीयतांमेश्विनौमगः॥इतिमूर्तिप्रतिपादनं॥त
तोभिषेचनंकार्यंदंपत्योर्विधिवद्बुधैः॥ब्राह्मणान्भोजयेत्पश्चाद्दक्षिणाभिश्चतोषयेत्॥
सालंकारैरेश्चवस्त्रैश्चप्रार्थयेद्वचनैःशुभैः॥एवंकृतेविधानेचयमलोत्पत्तिशांतिकं॥जायतेनात्र
संदेहःसत्यमेतद्ब्रवीमित॥इतिकाशीखंडेशौनकसूतसंवादमतं॥ ॥अथपितृनक्षत्रसमान

नक्षत्रे जन्म अथ वा ज्येष्ठापत्यनक्षत्रसमाननक्षत्रे जन्म भवति शिशोस्तदा शांतिकविधानं क
र्तव्यं। अत्रापि संगतिः पूर्ववत्। यदि विधानं न क्रियते तदा पूर्वस्य विघ्नो जायते। तत्परिहरणार्थं
विधानमुक्तं॥ ॥पद्मपुराणे उमामाहेश्वरसंवादे॥ ॥ईश्वर उवाच॥ ॥समाननक्षत्रे यदा देवि
पिता पुत्रौ च सोदरौ॥ भगिन्यौ वा स्वसा बंधू तदा पूर्वस्य नाशनं॥ विधानं तस्य कर्तव्यं जन्मनक्षत्र
देवताः५ पूजनं॥ नक्षत्रदेवतापूज्या अधिप्रत्याधिपूर्वकं॥ यस्य ऋक्षस्य यद्द्रव्यं दक्षिणाविधिमंत्रकं॥ तच्च
तस्याविधातव्यं मक्षदैवतउष्टयो। ग्रहोक्तेन विधानेन हवनं तत्र कारयेत्॥ भक्त्या हरिहरौ देवौ स्व
र्णरौप्यमयौ शुभौ॥ विविधस्यास्य विश्वस्य पितरौ विश्वतोमुखौ॥ प्रीयेतां मूर्तिदानेन देवौ हरिह
राबुभौ॥ ॥इति मूर्तिदानमंत्रः॥ ॥दानं होमविधिः पश्चादूर्नादन्वभिषेचनं॥ अभिषेचनपूर्वं १२
च विप्रपूजा स्मृता शिवे॥ ततोऽभिगम्य गोविंदं शूलिनोश्च निकेतनं॥ तूर्याणां च निनादेन जयघो

षेण पार्वति॥ पूजाविधिं समाप्यैवं सर्वोपस्करसंयुतं॥ प्रार्थयेद्देवदेवेशौ लक्ष्मीशौ नमस्तुत्येश्वरौ॥
दंडवत्प्रणिपातेन वंदनीयौ पुनः पुनः॥ ततश्च गृहमागत्य ब्राह्मणान्भोजयेत्सुधीः॥ तोष
येद्दक्षिणादानैर्यथाशक्ति वरानने॥ एवं कृते विधाने तु विघ्नशांतिर्भवेद्ध्रुवं॥ तुष्टिदं पुष्टि
दं पूर्णं विधानं चेति सुंदरि॥ ॥इति पद्मपुराणोक्तं समाननक्षत्रजन्मजनितविघ्नवि
नाशनविधानं॥ ॥अथ मूलविधानं॥ ॥पितृत्वात्संबंधित्वदुष्टत्वनक्षत्रविधानानं
तरं स्वभावेन दुष्टनक्षत्रस्यैव विधानस्य बुद्धिस्थतया मूलादेरानंतर्यं। तत्राद्यपादके पिता
विपद्यते द्वितीये जननी तृतीये धनक्षयः॥ चतुर्थः शुभावहः॥ मूलनक्षत्रोत्पन्नस्य शिशोर्जन
न्या जनकस्य च विस्नानं धातव्यं॥ तत्र कुंभाणि कलशाः शतछिद्रः॥ हिरण्यमूलं कर्तव्यं शक्त्य
नुसारेण अष्टनवरत्नं पंचरत्नानि च॥ हीरकं मौक्तिकं चैव विद्रुमं पुष्परागकं॥ गोमेदः पंचमः

ग्रांत्यैरत्नानि कल्पितानि च॥ ततः प्रातःकाले श्वेतसर्षपैरातरे वसितैः पिष्टैः कल्कितैस्तिल
सर्षपैः॥ स्नायातां दंपती तत्र सन्निशिष्टरुष्टमानसौ। ततः संबंधमुख्याचार्यः स्वस्तिवाचनं कृत्वा।
अग्नेरीशानभागे स्वस्तिकमंडले तंडुलमये कलशान्संस्थाप्य प्रथमे सप्तमृत्तिकाः। नघुलयस्तटा। त३
न्यांगोशृंगोद्धृतन्द्यैसे दर्भमूलमृत्तिका। वल्मीकाद्ध्रदाच्चतुष्पथात् गजस्थानादश्वस्थानादश्व
ष्ठमूलात्तामृत्तिकाः। द्वितीये कलशे पंचगव्यं न्यसेत्। तृतीये सप्तधान्यानि निक्षिपेत्। सर्वौषध
यश्चतुर्थे ताः वक्ष्यमाणाः। पंचरत्नानि पंचमे सप्तधान्यानि यान्युक्तानि तानि वक्ष्यंते। माषाव्रीहयो
गोधूमास्तिलमुद्गप्रियंगवो यवाः। पंचरत्नान्युक्तानि। न्यग्रोधोदुंबराश्वत्थः चूतः प्लक्षश्च पंचमः।
एते पंचपल्लवाः। चत्वारस्तैः पूर्णाः कार्याः। जलं निक्षिप्य वस्त्रैः संवेष्ट्य चतुर्भिर्ब्राह्मणैश्चतुरस्ता १३
न्कलशान्गृहीत्वा क्षिप्य ततस्तेन स्नातान्छिद्रं प्रस्थाप्य तत्र त्वमुदकं स्नातान्छिद्रे प्रक्षेपयेत्। तत्र मंत्रः।

(margin: निक्षिपेप; interlinear: पल्लव वा, पल्लव वा)

पावमानीभिः पंचभिः समुद्रज्येष्ठेति चतसृभिः आपश्च देवस्य त्वा इमं मे वरुण आपो हि ष्ठा मयोभुवः
ततो वेदादिभिः स्नातान्छिद्रे कलशे तो षधीः प्रस्थाप्य प्रथमे घटे मृत्तिका। द्वितीये पंचगव्येन तृतीयं
सप्तधान्यैः चतुर्थं रत्नैरिति चतसृभिर्दिशासु निर्ज्ञेया। मंडलादीशानभागे नन्दपीठे उपविष्टानां शि
शुजनकजननीनां ततो ह्याचार्यः स्नातान्छिद्रं कलशं गृहीत्वा स्नपनं कुर्यात्। तत्र मंत्राः॥ सुरास्त्वा
मभिषिंचंतु ये च सिद्धाः पुरातनाः। ब्रह्मा विष्णुश्च रुद्रश्च साध्याश्च समरुद्गणाः। आदित्या वसवो
रुद्रा अश्विनौ च भिषग्वरौ। अदितिर्देवमाता च स्वाहा सिद्धिः सरस्वती। कीर्तिर्लक्ष्मीर्धृतिः श्रीश्च
सिनीवाली कुहूस्तथा। दितिश्च सुरसा चैव कद्रूश्च विनता तथा। देवपत्न्यस्तु याः प्रोक्ता देवमात
रएव च। सर्वास्त्वामभिषिंचंतु मुनाश्चाप्सरसां गणाः। नक्षत्राणि मुहूर्ताश्च अहोरात्राणि सं
धयः संवत्सर दिनेशाश्च कलाः काष्ठाः क्षणा लवाः। सर्वे त्वामभिषिंचंतु कालस्यावयवाः शुभाः।

वैमानिकाश्च सर्वे वैमरुद्भिः सहिताः स्तुताः। वानप्रस्था द्विजश्रेष्ठास्तथा वैखानसास्तथा।
सप्तैव ऋषयश्चैव सदाराः सुदृढव्रताः॥ मरीचिरत्रिश्च्यवनः पुलस्त्यः क्रतुरंगिराः। भृगुः सनत्कु
मारश्च सनकश्च सनंदनः॥ सनातनश्च दक्षश्च योगी ब्रह्मर्षयोऽमलाः। जाबालिः कश्यपो जि
ह्नुर्विक्षश्चैव सनातनः॥ दुर्वासाश्च ऋषिश्रेष्ठः कण्वः कात्यायनस्तथा॥ मार्कंडेयो दीर्घतमाः
शुनःशेपः सुलोचनः॥ वसिष्ठश्च महातेजा विश्वामित्रः पराशरः। द्वैपायनो महाबुद्धिर्देवराजो
धनंजयः॥ एते चान्ये च मुनयो वेदव्रतपरायणाः॥ सशिष्यास्त्वामभिषिंचंतु सदाराश्च महाव्रताः।
पर्वतास्तरवो वल्ल्यः पुण्यान्यायतनानि च। ऐरावतादयो नागास्तुरगेशास्तयेऽव्ययाः। सुरभिर्धेनुमु
ख्या गावस्सरितः सागरास्तथा॥ वाहनानि च देवानां सर्वेषामायुधानि च। अग्नयः पितरस्ताराजीमू १५
ताश्च दिशो दिशः। एते चान्ये च बहवः पुण्याः संपरिकीर्तिताः। तोयैस्त्वामभिषिंचंतु सर्वोत्पात

निबर्हणाः। कल्याणं च प्रकुर्वंतु आयुरारोग्यमेव च। यथाभिषिक्तो मघवा स्वर्गराज्यमवाप्त
वान्॥ अपां पशमनः स्वाम्यं दक्षिणस्या दिशो मरुत्। वरुणो जलनाथत्वं धनं प्राप धनाधि
पः॥ सगरः पृथिवीशत्वं तथा चान्ये महात्मनः॥ इति स्नपनविधिः॥ ततः स्वस्तिकमंडलमध्ये
सर्वौषधिपूर्णं विशातच्छिन्नसमीपे सौवर्णमृत्युतनिर्ऋतिपुरुषं मूर्त्तिं द्वितीये घटे वस्त्रोपरि पू
जयेत्। चतुर्भुजं महाकायं प्रेतवाहं महाननं। शक्तिपाशासिखड्गांगं पूजयेत्सुधीः। जलपूर्ण साद्दिनं ५
घटे विद्वान्वंशपात्रे मनोरमे। विक्षय तत्र तं देवं चौंडक्षानं च चतुर्भुजं। गंधपुष्पाक्षतैः सर्वैस्स पा।४
मैरुपचारैस्तु पूजयेत्। आमिषं चैव नैवेद्यमुचितं जातिधर्मतः। तांबूलं च ततो दद्याद्दक्षिणा
शक्तितस्तथा॥ एवं कृते विधाने च होमं चापि विशेषवित्। तिलाज्यं च चरुं वापि प्रधानं चापि की
र्त्तितं। कृणुष्व पाज इति यजेन्मंत्रः प्रोक्तो मनीषिभिः। ज्ञानेऽग्नौ वने विद्वान् अभिषेकं समारभेत्

सुस्नातयोस्तु दंपत्योः पुरस्कृत्य शिखंतदा॥ पदे निषस्सयोर्धीमानभिषेकं समारभेत्॥ अभिषे
के तु जाते तु पूर्वोक्तविधिनाततः॥ नवेनकंबलेनैव दंपती च समावृतौ॥ अभिषेके तु ने
सम्यक्कंबलं च परित्यजेत्॥ आचार्यस्तु महाभागः पूजनीयः प्रयत्नतः॥ वस्त्रयुग्मेन संवेष्ट्य
भूषणानि समर्पयेत्॥ गां च दद्यात्सुशीलां च सवत्सां च पयस्विनीं॥ कस्मैचिद्ब्राह्मणायाथ कंब
लं तं प्रदापयेत्॥ धान्येन सहितं विप्र दानाय सं च समर्पयेत्॥ मूर्त्तिं तां च सवस्त्रां च सम्पूर्णां पात्र
संयुतां॥ हृष्टपुष्टमनाभूत्वा ह्याचार्याय निवेदयेत्॥ तत्र दानमंत्रः॥ देवत्वं निर्ऋतिः पुण्यः पुण्य
मूर्त्तिर्निरामयः॥ मूलसंभवजं दोषं प्रशामय मम प्रभो॥ इति संप्रार्थ्य देवं तमाचार्याय निवेद
येत्॥ एवं कृते विधाने तु ब्राह्मणान्भोजयेत्सुधीः॥ प्रसाद्य दक्षिणादानैर्नमस्कारैर्मुहुर्मुहुः १६५
एवं कृते विधानेस्मिन्दंपत्योस्तु सबालयोः॥ निर्विघ्नं जायते नूनं कल्याणं चिरश्रद्धयान्वितः॥ नंदते

सुखसंतानैः श्रियं प्राप्नोत्यनामयां॥ ॥इति विधानमालायां गृह्योक्तं मूलविधानं॥ ॥अथाश्ले
षाविधानं॥ ॥नागप्रतिकृतिं कुर्यात्सौवर्णीं पलमानतः॥ अथवाशक्तितः कुर्याद्वित्तशा
ठ्यविवर्जितः॥ मूले यत्तु विधानं स्यात्तत्समं सर्पदैवते॥ कद्रुर्नायमश्चेतस इति मंत्रविशेषः॥ नै
वेद्यं ह्यामिषं नास्ति पूजादानं कृते समा॥ अयुतं हवनं तत्र तिलैः साज्यैः प्रधानकैः॥ ब्रह्मवृ
म्य५ क्षसमिधं शातमष्टोत्तरं कृताः॥ कृताइति द्वादशांगुलयुताः साद्याः॥ अवक्राश्च प्रवर्णाः सत्वचः॥ अ
न्यत्सर्वं मूलविधानवत्॥ ॥इति गृह्योक्तं आश्लेषाविधानं॥ ॥अथ गंडांतविधानं॥ ॥गंडां
तं त्रिविधं ज्ञेयं तिथिलग्नर्क्षसंज्ञकं॥ विधानमुच्यते तत्र तृतीयेपि समासतः॥ तथा च श्रीपतिः॥ त्रित ३
मध्ये पूर्णानंदयोर्नाडिके द्वे स्याद्गंडांतं कीटकर्यस्त्रिषे काको दंडांते वृश्चिकांते झषांते मेषस्यादौ॥ दौ२
सर्वकार्येषु निर्दिष्टं॥ गंडांतं तन्दिनिख्यातं रेवती दस्रयोर्नृप॥ मुहूर्त्तद्वितयं दुष्टं तत्कार्ये विवर्ज

येत्॥ अश्लेषापित्र्यनक्षत्रमध्ये नाडीचतुष्टयं। ज्येष्ठामूलं त्रयं चापि तथैव नृपपुंगव॥ गंडांते स्मि
न्यदा जन्म बालकस्य कदाचन। नैवकुर्यात्त्रिपोर्गेहे षपितुःखस्य नाशनं। तस्य शांतिं प्रवक्ष्या
मि शास्त्रदृष्टेन कर्मणा॥ गंडांते यानि ऋक्षाणि तत्र देवांश्च देवताः। उत्पन्नं डिंभकं यस्मिन्नक्षत्रे
तस्य देवताः। पूजनीयाः प्रयत्नेन मंत्रैः स्वलिंगसंज्ञकैः॥ विधानं सर्वसामान्यं अभिषेकादिकं
तथा॥ अथ होमः॥ मूले नैर्ऋतिदैवत्ये चरुहोमः प्रशस्यते। स्त्रुसेच प्रधानाय जुहुयाच्छतमष्ट च॥
तत्र मंत्रः॥ मोषुणः कण्वोघोरो नैर्ऋतिर्गायत्री चरुहोमे विनियोगः॥ तत्र आज्येनान्या देवताः॥
ब्रह्मजज्ञानं गोतमो वामदेवो ब्रह्मा त्रिष्टुब् ब्रह्मजज्ञानमिति ब्रह्मणे समिधो ब्रह्म बृहस्पाष्टोत्त १७६
रशतं साज्यं त्र्यंबकं मैत्रावरुणो वसिष्ठो रुद्रोनुष्टुप् त्र्यंबकाय। इदं विष्णुर्मेधातिथिः काण्वो वि
ष्णुर्गायत्री॥ केवलाज्येन विष्णवे। प्रजापते प्राजापत्यः हिरण्यगर्भस्त्रिष्टुप् प्रजापतिस्त्रिष्टुप्। आज्ये

न प्रजापतये॥ अथ तिलाज्येन नाममंत्रतः। अग्नये स्वाहा। सोमाय स्वाहा। पवमानाय स्वाहा। मारुताय
स्वाहा। अनंतकाय स्वाहा। सर्वद्रव्यैः स्विष्टकृतं। शांतिसूक्तजपः। चातारमिंद्रं त्वंनो अग्ने सुगंतुपंथां। अ
सुन्वंतं। तत्वायामि। आनो नियुद्भिः। वयं सोम। तमीशानं। नमस्ते रुद्रमन्यवे। स्योना पृथिवी। इमं मे। स
मुद्राय त्वा। ब्रह्मजज्ञानमिति शांतिजपः। मूलज्येष्ठागंडांते हवने विशेषः। इंद्र नैर्ऋति प्रधान देवते
चरुव्याज्यसमिद्भिः प्रत्येकमष्टोत्तरशतं जुहुयात्। इंद्र ज्येष्ठा निगृत्समदस्त्रिष्टुप् इंद्राय नैर्ऋतिमंत्र पू शौनको ५
र्वक्तमेव प्रयुक्तं। हवनं शांतिपाठश्च पौष्णाश्विन्योः पूषाणमश्विनाविति चरुव्याज्यसमिद्भिः प्रधानदेव
तायजनं। तत्र मंत्रौ। सं पूषन्नित्यस्य कण्वोघोरः पूषा गायत्री पूर्वे अश्विना वर्तिगोतमो राहूगणो
श्विनावुष्णिक् अश्विनावर्तिरश्विन्यां दोषं पूर्ववत्। सार्पपैत्रगंडांते चरुसमिद्भिराज्येन प्रत्येकमष्टो
त्तरशतं जुहुयात्। आयंगौः सर्पराज्ञी सर्पो गायत्री सर्पेभ्य उपरूनाः पितरो याम्यायनः शंखः पित

रास्त्रिष्टुप्॥ पितरस्त्यः शेषं पूर्ववत्। शांतिपाठस्तु पैवाश्लेषायामार्यं गौरिरिनिचवल्पिसमिद्भिः प्रत्येकम
श्व१ ष्टोत्तरशतं जुहुयात्। शेषं हवनं शांतिमूलविधानवत्। अत्र सर्वत्र स्नानादनंतरं हवनसमयेन
वग्रहमखः कार्यः॥ पश्चादाचार्यं पूजयेत्। वस्त्रयुग्मेनालंकारैः पूजितां सौवर्णीं मूर्त्तिं दद्यात्। ष
एनक्षत्राणि गंडांतसंज्ञानि तेषां नक्षत्राणां या अधिदेवतास्तासां मूर्त्तयस्तासां दानं यथाशा
क्तिधान्यं देयं। आचार्यप्रमुखेभ्यो ब्राह्मणेभ्यः सुवर्णादि तमानं दक्षिणाशतमानमिति पलं सौव
र्णं निवर्तितः। ततः सर्वविप्राः हवनेकर्त्ता स्नपनकर्त्तारश्च दक्षिणाभिः संतोष्यां। ततो ब्राह्मणभोजनं॥
ततः सर्वे लोकाः कालस्त्रवणपूर्वकं गंडांतै देवताप्रीतये संतोष्याः। अनेन विधानेन तदपत्यं पित्र
श्व२ दर्शनेन योग्यं चिरायुश्च भवति। एतद्विधानेनं मूलाश्लेषायां गंडांते चयच्छारिष्टे च ज्ञातव्यं॥ अपरा १२
तौषधयः कथ्यंते॥ अधोपुष्पी॥ मयूरशिखा तथा॥ ज्येष्ठी च। काकजंघा च। कुमारी॥ जीरकद्वयं॥ अ

स्व१
शंखपुष्पी१

पामार्गो॥ भृंगराजो॥ लक्ष्मणा॥ श्वेतलक्ष्मणा॥ जाती॥ दूर्वा तथा व्याघ्री॥ पत्रको॥ अर्कश्च॥ रोध
कं॥ श्यामा कासीश्च॥ बिल्वश्च॥ विष्णुक्रांता॥ कपालिका॥ नकुली॥ चंदनं चैव रक्तचंदनमेव च॥ ३
जटा॥ मांसी॥ चमूर्वचा॥ वालको धन्विवामता॥ प्रस्तरा॥ तुलसी॥ चैव॥ ब्राह्मी॥ लांगलिका तथा॥ कुकुश्च
देवकुकुश्च प्रियंगुरमृता तथा॥ सर्षपोऽजलहस्तश्च॥ गंधारी॥ चंद्रवल्लना॥ दीप्तितेजस्विनी चक्रपा
ली॥ दंतिका कदली तथा॥ सहदेवी॥ तथा वस्या॥ तथा लोकप्रियंकरा॥ हेमा॥ निशाघना विश्वासिंधुवा थाकेजि५
रासरस्वती॥ शंखिनी पद्मिनी योषा॥ लालिता भूतवारणी॥ निर्जरा निर्ममा राज्या रोहिणी शतमूलिका॥
श्वसुरत्रिः३ जीवंती विजया रामा पिप्पली च कपर्दिनी॥ मरूबकः सुरारी शीतशतपत्रा प्रभंजनी॥ त्रिसंधिका प्रिया
लुक्तसागरा काकरंजकः॥ भृंगा न्यग्रोधमूली च उंबरी कल्याला सती॥ जानकी करहस्तेमा त्रित्रात्रा
तील्तपावती॥ विडंगी विमलानी लीघंटा च गिरिकर्णिका॥ नगी कलिंगी काश्मीरी रम्भणी रमरी तथा

ति विज्ञेयाः शतौषध्यश्च पावकाः ।

शतावरी ४॥१००॥ इति शतौषधयः॥ ॥इति मूलाश्लेषारेवतीज्येष्ठाश्विनीमघागंडांतविधानं॥
अथ सूतिकायास्तन्यवर्द्धनविधानं॥ त्रिंशुरत्नाकरे। सूतिकायास्तनक्षीरमकस्मात्क्षीयते यदि।
विधानमेतत्कर्त्तव्यं यदहं मामिनिबोधत। रेवतीग्रहमामंत्र्य पूजयेत्प्रयतः शुचिः। ब्रह्मवृक्षस्य पीठे
च न्यसेन्नवांबरे सुधीः। कृष्णधत्तूरपुष्पैश्च धूपैः कृष्णागुरोः शुभैः। धूपयेद्दीपदानेन गृहं नीराजये
त्तथा॥ रक्ततंडुलभक्तेन गुडयुक्तेन चैव हि। महिषीसर्पिषा चैव पूरिकाः पाचयेत्सुधीः। सुधाफलानि नै
वेद्यं पायसं च विशेषतः॥ सकर्पूरं च तांबूलं सलवंगं च दापयेत्। सुगंधं चंदनं तत्र ध्वजाः सप्त समाहरेत्।
छत्रमेकं तथा कार्यं पीतवर्णं हरिद्रया। खर्जूरानारिकेलानि यथाप्राप्तानि धापयेत्। शूर्पं वा इमवांत
त्रबलिपात्रे निधापयेत्। होमं च विधिवत्कृत्वा जुहुयात्तिलसर्पिषा॥ अष्टोत्तरसहस्रं च तं तथैवाष्टा
धिकं शतं। जुहुयात्प्रयतस्तत्र मंत्रान्रक्षोनिवारणान्। जपेच्छांतिं द्विजैः सार्द्धं रक्षोघ्नमित्यादिमंत्रवित्॥ १८

यत्प्रधानं हविस्तत्र तत्प्रोक्तं स्विष्टकृद्बुधैः। एवं समाप्य विधिवद्धवनं मंत्रविद्द्विजः। प्रार्थ्य तत्प्रायदं धी
मान्रेवतीनामधेयकं। दद्याद्विप्राय मेधावी ग्रहं तं दक्षिणायुतं। सपीठं च सवस्त्रं च सनैवेद्यं च सर्वशः।
तत्र दानमंत्रः। नमस्ते भगवन्देवरेवतीय हशोभन। ग्रहं दातवदानेन नस्तन्यं भवतु मे सदा। इति रे
वतीग्रहदानमंत्रः॥ ततः समुद्रज्येष्ठाद्युत्यनिषेकं समाचरेत्। ततश्चाचार्यब्रह्मर्त्विजां पूजनं। पश्चाद्ब्रा
ह्मणभोजनं। भुक्तेषु विप्रेषु तदुच्छिष्टेन गतक्षीरायास्तनावालिप्य कुमारीकंदमूलेन हरिद्रा
युक्तेन। स्तनद्वयमालिंपेत्। एवं कृतविधानेन बहुक्षीरं प्रजायते॥ इति सूतिकायास्तन्यवर्द्ध
नविधानं॥ ॥अथ बालग्रहपीडाशमनविधानं॥ ॥मेरुतुंगेरचिते कर्मविपाके प्रोक्तं तदुच्यते।
तत्र ऊर्द्ध्वकेशीग्रहो नाम बालकं स्पृशति कदाचिदपि युवानं वृद्धं च। तस्याहं लिंगं प्रवक्ष्यामि यं
प्राणिनं सवाधते। तस्यांगे स्फोटा जायंते तत्र तु लक्षचांद्रायणं प्रथमं प्रायश्चित्तं कुर्यात्। ततश्च रु

पूर्वत आदित्यानुद्दिश्य द्वादशदीपान्निदध्यात्।३

घृतं रौद्रेण सूक्तेन जुहुयात्। व्याहृतिभिश्च। शक्त्या हिरण्यं दद्यात्। ततो बलिविधानं॥ तत्राह।
स्थंडिलात्समंततो दीपान्लोकपालानुद्दिश्य घृताक्तवर्तिप्रज्वालितान्निदध्यात्। पंचदीपान्ग्र
हपीगयतो निदध्यात्। द्वावश्विनौ क्षेत्रपालानुद्दिश्य स्थंडिलाद्दक्षिणतो निदध्यात्। उत्तरतो
नवदीपान्दुर्गामुद्दिश्य निदध्यात्। उत्तरतो वसूनुद्दिश्याष्टौ निदध्यात्। पुनः स्थंडिलस्य परितः
सप्तविंशतिदीपान्नक्षत्राण्युद्दिश्य निदध्यात्। द्वौ दीपौ गंगायमुने उद्दिश्य स्थंडिलस्य पश्चिमतो
निदध्यात्। पंचदीपान्प्राणानामुद्दिश्य स्थंडिलस्यैशान्ये निदध्यात्। षोडशदीपांश्च ब्रह्मसमुद्दि
श्य निदध्यात्। यस्यै यस्यै देवतायै बलिपूजा क्रियते तल्लिंगान्मंत्रानुच्चारयेत्। अपूपामुष्टिकामु
द्गात्तक्रौदधियुतः शुक्तः मुद्गमाषेन चणकगोधूमयावनाल लघुगारिकाजो कल्पाषया प्रसि १९
द्धान्यार्द्रतंडुलपिष्टं हरिद्राकल्केन युक्तं कृत्वा तेन स्थानानि विधाय तत्र पूपादि सर्वं तत्र निधा

पयेत्। पायसं सघृतं तत्र कदलानि तथैव च। कलशे प्रक्षिपेद्दिक्पालान्गंधपुष्पाक्षताद्वृते। जलं च
ताम्रपात्रेण किंचित्कुंभे विनिक्षिपेत्। मंत्रेणाभिमंत्रितं तं च निक्षिपेच्च चतुष्पथे। तत्र मंत्रः। ॐ ज
हि जहि कुरु कुरु कुरु त्वा संगृह्णाण बलिं स्वाहा। इति बलिनिक्षेपमंत्रः। ततः परेह्नि ब्राह्मण
भोजनं यथाशक्त्या कर्त्तव्यं। एवं कृते विधानेन बालपीडा विनश्यति। सुखं विवर्द्धते सम्यक्
शिशोर्नात्र विचारणा॥ इति कर्णकेराख्यरूपीडाशमनविधानं॥ अथ विहूताख्यग्रहः॥ प्रथमं विधानं ५
ज्वरोत्तिजायते॥ ततश्च हस्तयोः पादयोश्च स्फोटा जायंते विसूचिका च भवति। बाधिर्यं च जायते॥
तत्रादौ चोपायं कुर्यात्। पुरुषसूक्तेन ताम्रपात्रेण सहस्रवारं शिवस्य स्नपनं कुर्यात्। य
त्र विष्णुप्रतिमा तत्र शालग्रामशिलायां वा सहस्रदलैः शतपत्रैर्वा देवस्य पूजा विधातव्या। त
तश्च सहस्रनामस्तोत्रं जपेत्। घृतदधिपायसं क्षीरषष्टिकान्नपूपपूर्णकलशं किंचित्हिरण्य

सहितं वस्त्रेणावेष्ट्य गंधादिकं कृत्वा तं कुंभं च भूम्यपे पूर्ववदेव मंत्रेणाभिमंत्रितं निक्षिपेत्।मे
रुगिकर्मविपाकोक्तं विकृतत्वग्रहपीडाशमनं॥ ॥अथ नवग्रहे सरित्तपस्विस्वामिसंबं
धिस्त्रीगामिनं नवग्रहः संक्रमते। तस्य लिंगं प्रवक्ष्यामि प्राणिनां हितकाम्यया। मेढ्रे दाहो भव
ति तत्रैव स्फोटा जायंते। आधाने च जायेते नयनरोगा। चलवति। स्त्री चेल दापूर्वं यत्र दृष्टास्तेषु
व्यभिचारिणीस्थं पीड्यते। तत्र प्रायश्चित्तं कृच्छ्रद्वयं प्राजापत्यं कृच्छ्रातिकृच्छ्रं चांद्रायणं स
मस्तं वर्णत्वा वाधितातरेणेन कुर्यात्॥ धेनुदानविधिना प्रत्यक्षां धेनुं दद्यात्॥ निष्कपादशकं
हेमं दद्यात्। कूष्मांडहोमः पुरुषसूक्तं च। संवर्त्तनोक्तं हिरण्यधेनुं दद्यात्। तपाहि। पजेन स्वल्प
तां राजन्धेनुं स्वर्णमयीं कृत्वा। सवत्सां वस्त्रसंवीतां दद्याद्विघ्नोपशांतये। विप्राय परिशीजायत्रो २०
त्रियाय कुटंबिने। कृतस्नायचवनकायतापमेवापरायचेति। तीर्थमातापित्रोश्चरणचतुष्टयं॥

ततश्च शक्त्या ब्राह्मणभोजनं कुर्यात्। शक्तिशाल्ये नराजा चेद् युतं ब्राह्मणान् भोजयेत्॥
इतरो धनाढ्यस्तु सहस्रं भोजयेत्। निःकिंचनश्चेच्छतं वा विंशतिं त्रीं तं वा ब्राह्मणान् भोजये
श्व३ त्। बलिं च निक्षिपेत्। पंचरत्नाद्यैः रत्नैश्च पूर्णकुंभं सधूपकं॥ कृष्णे चंदने युक्तं कुसुमैश्च मनो
रमैः। निक्षिपेन्मध्यरात्रे च चत्वारः सर्ववासश्च भूष्यपे। वक्ष्यमाणेन मंत्रेण मंत्रितं कलशं बुधः। निक्षि
पेन्निर्भयो धीमान्जले वा सरितो ह्रदे। तत्र मंत्रः। नवग्रहमहाबाहो x धीमानितिर्यं चान्तरमेत्रवि
तु जलजंतुभोगादिजले। सरितां ह्रदे महानदीह्रदे महाग्रहनिवारण। बलिं गृहाण निर्विघ्नं
मरोगं रोगिणं कुरु सत्वरं। बलिनिक्षेपमंत्रः। एवं कृतेन विधानेन च विघ्नः कोपि न जायते। आयुर्विवर्द्धते तस्य
विधानं यः समाचरेत्॥ ॥इति नवग्रहपीडाशमनं विधानं॥ ॥अथ वायसग्रहे॥ देवद्विजक्षेत्र
तडागवल्मीकादिषु विष्ठाविमोक्षं करोति तं वायसो नाम ग्रहो गृह्णाति। तत्क्षणादाधर्मनी हरि

अर्वं विमान्याद्दाहश्च जायते॥ तत्र विधानं॥ स्वस्तिवाचनपूर्वकं हवनं कार्यं। अग्निमुखपूर्व
रक्त२ कं व्याहृतिभिर्जुहुयात्॥ श्वेतकृष्णपीतवर्णैर्वस्त्रैरावेष्ट्य कलशं पंचरत्नाद्येन पूर्णं संछन्नं कृत्वा
गंधपुष्पाक्षतैः समभ्यर्च्य प्रदोषे चतुष्पथे बलिं निक्षिपेन्मंत्रेणानेन। ॐ घ्रं घ्रं घ्रः ॐ फट् स्वाहा। ॐ३
वायसाय बलिरेष कल्पितः। तत्क्षणाद्देवारोग्यं भवति। एवं कृते विधाने च विघ्नः कोपि न जायते।
आयुर्विवर्द्धते तस्य विधानं यः समाचरेत्॥ ॥इति वायसग्रहपीडाशमनं विधानं॥ ॥अथ
महाजिकाग्रहः। मुसलोलूखलसूर्पयुधा निपादेन यो लंघयति तं महाजिकाग्रहो गृह्णा
ति। तस्मादस्य शोकोत्ति जायते। गडुवाकुब्जिकाव्रणो जायते। कफवाञ्जायते। तत्र विधानं॥
त्रिरात्रोपवासं कुर्यात्। व्याहृतिभिराज्येन जुहुयात्। उदुत्यमिति सूक्तं जपेत्। अष्टोत्तरसह २१
स्रगायत्रीजपं कुर्यात्। अन्नं घृतबहुलं दद्यात्। सर्वत्रा रविन्यो विप्रेभ्यो दक्षिणां दद्यात्॥

आमिषं मत्स्यानां तिलपिष्टं अपक्वं मत्स्यान् सुरारुधिरसूपत्राकानां धान्यपुष्पाणि चंदनम
क्षतान्बल्यर्थे वंशपात्रे निधाय चतुष्पथे निक्षिपेत्। मध्यरात्रे पूर्वेण बीजत्रयेण मंत्र
यित्वा ग्रहनाम समुच्चार्य चतुर्थ्यंतं स्वाहाकारेण निक्षिपेत्। तत्क्षणाद्देवारोग्यं जायते। एवं कृते
विधाने च विघ्नराशिः प्रशाम्यति। आयुर्विवर्द्धते तस्य विधानं यः समाचरेत्॥ ॥इति मेलु
गिप्रोक्ते कर्मविपाके महाजिकाग्रहपीडोपशमनं विधानं॥ ॥अथ क्षेत्रपालग्रहः॥ ॥यो हि
बुद्धिपूर्वकं दिवा दिहे वान्नं ददाति तं क्षेत्रपालग्रहो गृह्णाति। तेन स्फोटो मुखपाकी नाड़ी
व्रणाश्च भवंति। ततस्तद्देवतानिषेकं कुर्यात्। पंचामृतैः सुपुष्पैः पूजां कुर्यात्। क्षेत्रस्य पतिनेति
सर्वोपचारान्विदध्यात्। पंचखाद्यं सुरा मांसं बल्यर्थे प्रतिपादयेत्। यथाशक्त्या ब्राह्मण
भोजनं। आगमोद्दिष्टं बटुकस्तोत्रं जपेत्। निर्विघ्नो जायते प्राणी। विधाने विहिते सति क्षेत्रपाल

३ बाधिना पीड्यते। हरिद्रावर्णनयनो भवति। तत्र विधानं। त्रिरात्रमुपवसेद्दक्षिणे तरसहस्र ३

प्रसादेन सुखी भवति मानवः॥ ॥इति द्वितीयपाक्षग्रहपीडाशमनं विधानं॥ अथ हस्तिपादग्रहे॥
योवस्त्रधान्यादिकमुचितराजविदितमूल्याद्धिकं गृह्णाति। तं हस्तिपादो नाम ग्रहो गृह्णाति॥
श्रि ३ तद्ग्रहणादेव वल्मीकव्याधिर्भवति। तिलाज्येन होमं कुर्यात्। ब्राह्मणादीन्भोजयेत्। अन्नं तैलं पक्वं तिल
तिलपिष्टं माहिषं क्षीरं नव्यं कलशे निधाय निशीथे चतुःपथे निक्षिपेत्। मंत्रेण सोपि मंत्रः॥ ब
लिं गृह्ण गृहाण भूतेश रोगिणं मुंच सत्वरं॥ प्रीतो भव महाबाहो बलिदानेन सर्वदा। एवं कृते विधा
ने च रोगमुक्तो नरो भवेत्। पुष्टिमान्तुष्टिमान्श्रीमान् हस्तिपादप्रसादतः॥ ॥इति हस्तिपा
दग्रहपीडाशमनं तृतीयं विधानं॥ ॥अथ कर्णग्रहे॥ यः प्राणी मातापित्रोर्गुरोर्गुरुभार्ययोः पि
तृव्यपितृव्यपत्न्योर्मातुलमातुलान्योर्ज्येष्ठकनिष्ठभ्रातृपत्न्योः सुरतादि शृणोति। तं कर्णग्रहो २२
गृह्णाति। तस्य चिह्नं प्रवक्ष्यामि कर्णयोरुपजायते। आकस्मिकं च बाधिर्यं किल्बिषाज्जमहीयसः॥

शृणोति विट्चिराकारं कर्णग्रहनिपीडनात्। वक्ष्येतस्य प्रतीकारं महाबलिविधानकं॥
सुरामांसं तैलपक्वं पंचखाद्यं विशेषतः। तिलपिष्टं च मूलं च फलपुष्पं तथैव च॥ चतुःपथे
प्रदोषकाले मंत्रपूर्वं निक्षेपयेत्॥ तत्र मंत्रः॥ गृहाणेमं बलिं देव कर्णारिष्टकर ग्रह। आतुरस्य
सुखं सिद्धिं प्रयच्छ त्वं महाबल॥ एवं कृते विधाने तु सुखसिद्धिः प्रजायते। नश्यंति कर्णजा रोगाः
६५ कर्णग्रहस्य पूजनात्॥ ॥इति कर्णग्रहपीडाशमनं विधानं॥ ॥अथ तोलग्रहे॥ बंधुसुहृत्सं
तानवयं तं उपकर्तुरपकारिणं॥ तस्याभक्तत्यासुकृतविक्रयिणं तोलो नाम ग्रहो गृह्णाति। त
स्य लिंगं प्रवक्ष्यामि नराणां हितकाम्यया। श्वासकासौ ज्वरश्चैव शिरोर्तिपरिपीडितः॥ विच्छायो
विकलो विघ्नो मृतकल्पश्च जायते॥ तस्य शांतये तत्कृत्यं कुर्यात्। विल्वैः सहस्राभिषेकं कार
येत्॥ कूष्मांडेन जुहुयात्। कथानश्चित्रे निजपेत्। अनेन दधिसक्तुवीणारुधिरक्षीरत्रपूपसुरा

गंधपुष्पवस्त्रादिभिरर्घ्यपूजनपूर्वकं कृत्वा निशायां चतुःपथे बलिं निदध्यात्। तत्र मंत्रः। व्याधिं
हर महाबाहो मम शत्रुविनाशनं। प्रसन्नो देवदेवेश विकलं च शिरोगतं॥ ॥इति तोला
ग्रहपीडाशमनविधानं॥ ॥अपस्कंदग्रहे॥ ॥बालकस्यैव पीडायां ग्रहसंचारे बालमाता
यया स्त्री तत्क्लिष्टा सती अग्निं स्पृशति तं बालकं स्कंदो नाम महाग्रहो गृह्णाति। तस्य लिंगं प्रवक्ष्या
मि बालानां हितकाम्यया॥ पादयोर्हस्तयोश्चापि वायुकोपः प्रजायते॥ उक्तं च महाभारते॥ ॥
वह्नि ४ स्पृशंश्चैव बालं निकटे बालमादाय मानवः॥ संगृह्णाति ग्रहस्तत्रैव स्कंदो नाम महाबलः। तस्येद
पादहस्तेषु विकारो वायुजो भवेत्। सक्तुक्षीरदधिक्षिशरापूपतिलपिष्टमुद्गराजमाषनि
ष्पावकपक्वमांसं सुराकंदमूलपूर्वकं कृत्वा तस्योपरि किंचित्प्रमाणं कांस्यपात्रं निधाय वस्त्र २३
द्वयेन संवेष्ट्य रक्तसूत्रेण कुंकुमरक्तादिभिश्च मध्यरात्रे बलिं दद्यात्। विशेषेण दक्षि

णस्यां दिशि ग्रामात् बहिः॥ तत्र मंत्रः॥ बालभास्करसंकाश रक्तमाल्यांबरप्रिय। प्रगृ
ह्णीष्व बलिं चेमं पूजोपस्कारसंयुतं॥ ततश्चाग्निं प्रतिष्ठाप्य जुहुयात्तिलसर्पिषा। क्षीरं च स
र्षपान् श्वेतान् जुहुयात्प्रयतो बुधः। नाममंत्रेण चैवेह स्वाहांतं श्रद्धयान्वितः। पश्चाद्बाल
कस्य रामरक्षास्तोत्रेण रक्षां कृत्वा ततो होममात्रं पक्वान्नं पक्वमांसं दधि तिलपिष्टं रुधिरं
हिरण्यं रक्तचंदनं वस्त्रगंधमाल्यताम्बूलादिभिः वृक्षमूले प्रदोषसमये बलिं दद्यात्। एवं कृते वि
धाने रोगमुक्तः शिशुर्भवेत्। स्कंदग्रहप्रसादेन नात्र कार्या विचारणा॥ ॥इति श्री विधान
मालायां स्कंदग्रहसमुद्भवं बालपीडाशमनं विधानं॥ ॥अपापस्कंदग्रहे॥ अंगोमूत्रपुरी स्मार३
षोत्सर्गकर्तारं स्कंदापस्मारो नाम ग्रहो गृह्णाति॥ तस्य लिंगं प्रवक्ष्यामि बालानां हित
काम्यया॥ जिह्वायां व्यथा भवति मुखे फेनः प्रजायते। अपस्मारवत् चिह्नं जायते॥ तत्र प्र

वविधानेयद्द्रव्यंसमुद्दिष्टंयत्नद्रव्यंतदेवकुर्यात्॥ ॥ततःस्वस्थोभवति॥ ॥इतिस्कंदा
पस्मारपीडाशमनंविधानं॥ ॥अथनिद्रास्कंदे॥उच्छिष्टासतीजननीबालमादायनेनि शा.प.२
द्रातिगृहीतव्रतेअवज्ञांकरोतितस्याःबालकंनिद्रास्कंदोनामग्रहोगृह्णाति।तस्यलिंगंप्रव
क्ष्यामिबालानांहितकाम्यया॥निद्रास्कंदस्यसंदुष्टोविधानंचात्रकथ्यते॥आध्मानीज्व
रीचैवश्वासीकासीचजायते॥पानसीरक्तनयनोबहुमूत्रोविशेषतः।पुरीषंबहुधाचा
स्यजायतेनात्रसंशयः॥अरुचिश्चापिसंतापोदिवारात्रौचजायते।बलिंतस्यप्रवक्ष्यामि
येनरोगात्प्रमुच्यते॥पायसंसर्पिषायुक्तंमांसंकुक्कुटमेषयोः॥सुगंधीनिचपुष्पाणिद
शांगंधूपनंतथा॥वटस्यमूलदेशेतुमध्यरात्रेविनिक्षिपेत्।निधायकिंचित्कनकंसतां २५
बूलंसदीपकं।निक्षिपेन्नाममंत्रेणश्रद्धयापरयाशुचिः॥एवंकृतेविधानेचरोगमुक्तोन

वेच्छिशुः॥निद्रास्कंदप्रसादेननात्रकार्याविचारणा॥ ॥इतिनिद्रास्कंदग्रहपीडाश
मनंविधानं॥ ॥अथमेषग्रहे॥ ॥मात्रानिर्भर्त्सितस्ताडितोनक्षमापितःस्वसन्निधिं
कुरुतेतंमेषग्रहोनामग्रहोगृह्णाति।तस्यलिंगंप्रवक्ष्यामिबालानांहितकाम्यया॥सर्वा
गेषुवायुप्रकोपोभवति।नेत्रोन्मीलनंकुरुतेमुखेफेनोऽपिजायते।निरोदितंनशत्वक्तो
तिक्वचोर्नगोपिजायते॥तस्यरोगस्योपशांतयेविधानमुद्दिष्टं।हिरण्यंदद्यात्।श्वेतवस्त्रंद
द्यात्।पायससक्तुलाजाधूपांश्चसुगंधानिकुसुमानिचंदनंचसर्वंकलशेनिधायनिशीथे
नास्वपातीर्बलिंसमाहरेत्।अनेनमंत्रेण।बलिंगृह्णणदेवेश।विमुंचामुंचबालकं।स्थापितंते
यतःसम्यक्त्रीशोत्रांतिप्रदेनवा॥कुंफट्स्वाहेतिबलिंनिक्षिपेत्॥एवंकृतेविधानेचरोग
मुक्तिःप्रजायते॥व्याधिस्तस्यविनश्येन्ननात्रकार्याविचारणा।केषांचिन्मतेनतंबलिंब्राह्मणा

यद्दद्यात्॥ ॥इतिमेषग्रहपीडाशामनंविधानं॥ ॥अथशिशुग्रहे॥ ॥देवब्राह्मणगो
गुर्वाचार्याणां दीनां अवज्ञाकारिणं युवानं वा वृद्धं वा बालकं वा स्त्रियं वा तपावयस्कं शिशु
कोनामग्रहो गृह्णाति। तस्य लिंगं प्रवक्ष्यामि प्राणिनां हितकाम्यया। विधानं चापि वक्ष्ये ग
त्र येन यो रोगाद्विमुच्यते। ज्वरः श्वासः प्रमेहस्तत्र जायते नात्र संशयः। अतीसारो नवेऽस्य श्वासः
स्यशोकश्च जायते॥ हस्तयोः पादयोः कंठे जायते शिशुपीडना॥ तस्य शांतिं प्रवक्ष्यामि येन या
रोगाद्विमुच्यते। आज्यं ससर्पिषश्चैव पायसं तंदुलोदकं वा कृष्णस्य च मेषस्य मांसं रक्तं तथै
व च॥ रक्तवस्त्रं तथा रक्तं चंदनं रक्तपुष्पकं॥ सुवर्णं विद्रुमं चैव नव्ये कुंभे निधापयेत्। वट
मूलसमीपे च कुंभं तत्र विनिक्षिपेत्॥ पूर्वरात्रौ च पूर्वस्यां दिशि मंत्रेणमंडितं॥ बलिं गृह्णा २५
तु शिशुचिह्निता शास्त्रपाणि विशेषतः। तत्र मंत्रः। ॐ कं कं कः शिशुकाय स्वाहा॥ इति॥ एवं कृ

त्रि २

ते विधाने च रोगमुक्तिस्तु जायते॥ शिशुकस्य प्रसादेन नात्र कार्या विचारणा॥ ॥इति शि
शुग्रहपीडाशामनं विधानं॥ ॥अथ महापूतनाग्रहे॥ चौरादिसाहसकारिणं नरं दंडयति प्र
देशान्दंडयति तं राजानं राजपत्यं वा राजपत्नीं वा महापूतनानाम ग्रहो गृह्णाति। तस्य लिंगं
प्रवक्ष्यामि नराणां हितकाम्यया॥ वक्ष्ये तस्य प्रतीकारं रोगमुक्तिर्यतो भवेत्॥ केवलातिसा
व५ रो भवति। तस्य शांतये पक्वान्नानि चान्नानि इक्षुरसहितानि च। तिलपिष्टं च गंधं च सुगंधिकुसु
मानि च। निक्षायकलशो धीमान् सुवर्णं च विशेषतः। वस्त्रेण वेष्टितं कुंभं तडागांते विनिक्षिपे
त्॥ वक्ष्यमाणेन मंत्रेण प्रदोषेण विशेषतः। तत्र मंत्रः॥ नीलांबरधरे देवि पूतने वित्तताम
ने॥ व्याधितं मुंच राजानं बालकं वा तपास्त्रियं॥ एवं कृते विधाने च रोगमुक्तिस्तु जायते॥ ॥
इति श्री विधानमालायां महापूतनाग्रहपीडाशामनंविधानं॥ ॥अथ रेवतीग्रहे॥ संध्याका

नेमुक्तकेशंउच्छिष्टंशयानंरेवतीग्रहःसंक्रमते॥ तस्यलिंगंप्रवक्ष्यामिनराणांहितका
स्म२ म्यया॥ अंगशोषश्चदाहश्चसर्वांगेकंपएवच॥ कृष्णवर्णस्तुवेन्नूनंरोगीनात्रविचारणा॥ घृतं
लाजांश्चमांसंचकौकुटंमेषजंतथा॥ रक्तंवस्त्रंचरक्तंचरक्तचंदनमेवच॥ नूतनेकलशेदे
मंनिरध्यात्ततःशुचिः॥ शमीमूलेषवामूलेवटस्यनिक्षिपद्दिशि॥ प्रदेशेनिक्षिपेद्धीमान्दत्
त्वामंत्रेणमंत्रितं॥ तत्रमंत्रः॥ चित्रांबरधरेदेवींचित्रमाल्यानुलेपने॥ रोगान्मुंचेमहानागं
गृहाणबलिमुत्तमं॥ एवंकृतेविधानेचरोगशांतिस्तुजायते॥ ॥इतिश्रीरेवतीग्रहपीडाशम
नंविधानं॥ ॥अथऊर्ध्वभूतनाग्रहः॥ तस्यचिह्नंप्रवक्ष्यामिनराणांहितकाम्यया॥ अग्निरोगी
ज्वरीकासीजागरीजायतेनरः॥ विन्नमोनात्मनायंःकृयाद्यायःश्वाश्वानिनकरोति॥ अधिकारिणां २६
पितृणांतंनरंऊर्ध्वभूतनाग्रहःसंक्रमते॥ निशातिवासरेसम्यक्शीतातिपरिपीडितः॥ बलिं

हि।२

सम्यक्प्रवक्ष्यामियेनशांतिस्तुजायते॥ समांसान्नरुधिरंगंधवस्त्रहिरण्यधूपदीपंसिन्नंसमुद्रीहस्तमृ स्नु१
त्प्रदेशेपमंत्रेणानेनबलिंदद्यात्॥ तत्रमंत्रः॥ लम्बूर्ध्वभूतनेदेविगृहाणबलिमुत्तमं॥ शीघ्रंविकारा
हारिणी न्मुंचाद्यदुर्गेदुर्गार्तिनाशिनी॥ एवंकृतेविधानेचव्याधिमुक्तःसुखीभवेत्॥ त्रिशुवर्नरूणोह्यो
नात्रकार्याविचारणा॥ ॥इतिश्रीऊर्ध्वभूतनाग्रहपीडाशामनंविधानं॥ ॥अथपशाकुनीग्रहः॥
पितृमातृगुरुस्वामिनांविनाअन्येषांउच्छिष्टभोजनंदेवालयेमूत्रंपुरीषंनिष्ठीवनंकरुतेतंशाकु
नीनामग्रहोगृह्णाति॥ तस्यलिंगंप्रवक्ष्यामिनराणांहितकाम्यया॥ मुखेव्रणाश्चकंगेच्चगुदेचैवंवि
शेषतः॥ अतीसारीज्वरीचैवकृष्णश्चापिप्रजायते॥ पौष्टीसुरातपाचान्नंमांसंमेषसमुद्भवं॥
तिलपिष्टंहरिद्रांचहिरण्यंचंदनंशुभं॥ निधायैतानिनव्येचकलशेचनिक्षापयेत्॥ तंकुंभंसरि
तस्तीरेगवांगोष्ठेशिवालये॥ भैरवालयमुद्दिश्यस्थापयेत्प्रयतःशुचिः॥ मंत्रेणानेनवेदज्ञोबलिंद

द्यान्मंत्रयत्नतः। गृह्णीष्व बलिं चेमं त्राकुनिलं महाबले। त्रिशूलं विकारान्मुंचाद्य ग्रहोऽन्नेनेकामरूपि
णि। एवं कृते विधाने च रोगमुक्तिश्च जायते॥ ॥इति श्रीशकुनिग्रहपीडाशामनं विधानं॥ ॥अथ
द्वितीयरेवतीग्रहः॥ ॥ऋतुं बाल्यव्यतिरेकेण स्त्रीधनेन जीवति स्त्रीवा तरुणी वा बालो वा तं द्वितीयरेव
तीनाम ग्रहो गृह्णाति। तस्य लिंगं प्रवक्ष्यामि लोकानां हितकाम्यया। यथा मूत्रविष्ठा विलिप्तांगो य
था दुर्गंधिर्जायते। तथैव मूत्रविष्ठा लेपं विना दुर्गंधिर्जायते। हरिद्रावर्णस्फोटाः सर्वांगेषु जायंते। रूप ५
त्रै० ५ एतदुपशांतये पूर्वमंत्रपूर्वमेव बलिं दद्यात्। तेनैव मंत्रेण। एवं कृते विधाने च रोगमुक्तिश्च जाय
ते॥ ॥इति द्वितीयरेवतीग्रहपीडाशामनं विधानं॥ ॥अथ शुष्करेवतीग्रहः। भूमौ पतितं प्रमादे
न पर्यंकान्मंचकाद्वापि मातृत्वापि पितृत्वा पतितं बालं शुष्करेवतीनाम ग्रहो गृह्णाति। तस्य लिंगं २२
प्रवक्ष्यामि प्रथमं जायते ज्वरः। आध्मानी हृदये चैव जठरांत्र निपीडने। तस्योपशांतये मुद्गस्वेतत्तं

शुष्कात्पतितं २

डुलं भोजनं। सुगंधीन्यपि पुष्पाणि धूपश्च सरलोद्भवः। शुष्काम्रमूलैर्मंत्रेण बलिं दद्यात्। करा
लवदने घोरे देवि घोरार्तिनाशिनि॥ इमं बलिं गृहाण त्वं व्याधिमुक्तं त्रिशूलं कुरु॥ इति बलिदान
मंत्रः॥ एवं कृते विधाने च पीडा नश्यति तत्क्षणात्। रेवत्याः शुष्कपूर्वाया नात्र कार्या विचारणा।
॥इति श्रीशुष्करेवतीग्रहपीडाशामनं विधानं॥ ॥अथ सत्पूतनाग्रहः। अक्षालितचरणयोर्नि श्रा ४
तं बालं हृद्य वायुवानं वा असत्पूतनानाम ग्रहो गृह्णाति। तस्य लिंगं प्रवक्ष्यामि धर्ममार्गमनुस्मर
न्। अर्बुदी देहकंपी रात्रौ निद्राविरहितो दिवास्वापी भवति। तस्योपशांतिं प्रवक्ष्यामि नराणां हितका
म्यया। तिलपिष्टं तिलपक्वान्नं च सुगंधानि द्रव्याणि सुगंधकुसुमानि च। कुंभेद्विरण्ये निधाय
बलिं दद्यान्मंत्रतः। बाह्यालीस्थाने प्रदोषसमये निदध्यात्। तत्र मंत्रः। नीलांबरधरे देवि पूत
ने विकृतानने। त्रिशूलं विकारान्मुंचाद्य गृहाण बलिमुत्तमं। एवं कृते विधाने च विघ्नः कोपि न जा

अथवारलाशाला २

पते॥ ॥इति श्रीअसत्पूतनायरूपीडाशमनं विधानं॥ ॥अथ बालरक्षाप्रसंगेन गर्भिणीगर्भरक्षा
र्थं मासविशेषेण निधीयते॥ त्रिसुर रक्षार्थं॥ त्रिपुर रक्षार्थं॥ प्रजापतिं समुद्दिश्य देयो बलिः श्वेतवस्त्रं
पायसं च गव्यं क्षीरं तथा घृतं॥ श्वेतं चंदनं च सरलं च यष्टिकं॥ ॐ नेनिधाय देयो वै बलिर्धू
पश्च धूपितः॥ दीपनीराजितश्चापि तांबूलेन समन्वितः॥ हिरण्यसहितः शक्त्या गवां दोहे निपातयेत्॥
तत्र मंत्रः॥ एह्येहि भगवन् ब्रह्मन् प्रजाकर्तः प्रजापते॥ परिगृह्णीष्व च बलिं सापत्यां रक्ष गर्भिणीं॥ ॥
इति प्रथमे मासि गर्भिणीगर्भरक्षार्थमयं बलिः॥ अथ प्रथमे मासे गर्भवेदनाहरमौषधं॥ नारायणीयटी
कायामपेक्षितार्थद्योतिन्यां॥ प्रथममासे गर्भवेदना गर्भिण्याश्च जायते॥ तदा पद्मकोशीरतगरं समान्
गितं जरकेन पिष्टं क्षीरेण सह पाययेत्॥ तथा च क्रियाकालगुणोत्तरे॥ यदि स्यात्प्रथमे मासि गर्भिण्या २९
गर्भवेदना॥ नीलोत्पलं सनालं च शृंगाटककसेरुकं॥ शीततोयेन पिष्ट्वा तु क्षीरेण जो ह्यत्र तत्पिबेत्॥ एवं

नपतते गर्भः स च स्वस्थः प्रजायते॥ इति गर्भिणीप्रथममासशमनं विधानं॥ ॥अथ गर्भिणी द्वितीय
मासे गर्भरक्षार्थं बलिः॥ समुद्दिश्याश्विनौ देवौ देयो मंत्रेण मंत्रतः॥ दध्यन्नं पायसं लाजा पिण्याकं कु
सुमानि च॥ गंधश्च धूपदीपौ च वस्त्रेण वेष्टितो घटः॥ इन्नायुतो श्वशालायां समीपे निक्षिपेद्बलिं॥ क्रिया
कालगुणोत्तरे॥ सुगंधवस्त्रपुष्पाणि तल्कल्का च गिरिकर्णिका॥ नीलोत्पलान्विताः नावैस्तुल्यानि समाह ६ सु ४
रेत्॥ गोरोह स्व लमाजत्त्वपनि क्षिपेत्प्रयतः पुमान्॥ भगवंतौ प्रजावंतौ प्रगृह्णीतं बलिं त्विति॥ सुरूपौ
देवभिषजौ रक्षतं गर्भिणीमिमां॥ इति द्वितीये मासि गर्भरक्षार्थं देयो बलिः॥ अथ द्वितीयमासि गर्भ
रक्षार्थमौषधं॥ नारायणीयटीकायां॥ अपेक्षितार्थद्योतिन्यां॥ शालूकमुत्पलं नीलं कसेरुं शृंगवेरकं॥
समांशं मुदकं पिष्टं क्षीरेण जो ह्यत्र तत्पिबेत्॥ अत्रोदकानां बहुवचनस्य कारणमाह॥ यदि संतापोऽति
दारुणो वर्ततेऽतः सदा तैयदामध्याः नदाकवोष्णं॥ वातश्लेष्मजनावेस नित्त दृष्टं इति॥ क्रियाकालगुणो दो स्कं १

त्तरे॥ द्वितीये मासि त्वथ चेद्गर्भे स्रवति वेदना॥ तगरं कुंकुमं बिल्वं कर्पूरेण समन्वितं॥ अजाक्षीरेण तन्मि
श्रं क्षीरेण लोड्य तत्पिबेत्॥ एवं न पतते गर्भः सच शूलः प्रशाम्यति॥ ॥इति द्वितीये मासि गर्भवेदना
नाशनं विधानं॥ अथ तृतीये मासि गर्भवेदनायां तत्र बलिः॥ शिखरस्थाने॥ गर्भिणी गर्भस्त्रावे पूर्वं ब
लिर्मासि तृतीयके॥ रुद्रानेकादशोद्दिश्य देयो मंत्रेण मंत्रिणा॥ घृतमन्नं च लाजाश्च ध्वजः श्वेतं च
चंदनं॥ श्वेतवर्णानि पुष्पाणि श्वेतधूपप्रदीपकौ॥ श्वेतानि पंकजान्याज्यं विघ्नशांतिकराणि चा ए
तत्सर्वं समाहृत्य कलशे संनिधापयेत्॥ ईशान्यां दिशि रात्रौ च निक्षिपेत्प्रयतः शुचिः॥ निर्गतायां दे
ह वेलायामित्यर्थः॥ क्रियाकालगुणोत्तरे॥ यत्र बलिर्निक्षिपणीयस्तज्जलाशयस्थलमिति ज्ञातव्यं॥
तत्र मंत्राः॥ महादेवं शिवो रुद्रः शंकरो नीललोहितः॥ ईशानो विजयो भीमो देवदेवो भवोद्भ २९
वः॥ कपाली शंभुरीशानो रुद्रैकादशमूर्तयः॥ रुद्रा एकादश प्रोक्ता प्रगृह्णीत बलिं त्विमं॥ यु

ष्माकं तेजसा वृद्धा नित्यं रक्षंतु गर्भिणीं॥ ॥इति मंत्रेण देयो बलिः॥ अथ तृतीये मासि गर्भि
णी गर्भरक्षार्थमौषधं॥ नारायणीयटीकायां मपेक्षितार्थद्योतिन्यां॥ तृतीये मासि पद्मं च चंदनं तो
यं तगरं समन्वितं॥ पूर्ववद्वारिणा पिष्टं क्षीरेण लोड्य तत्पिबेत्॥ क्रियाकालगुणोत्तरे॥ तृती
ये मासि गर्भिण्या गर्भे स्रवति वेदना॥ पद्मकं चंदनं चैव वालकं पद्मनालकौ॥ पिष्टा शीतेन
तोयेन क्षीरेण लोड्य तत्पिबेत्॥ एवं न पतते गर्भः सच शूलः प्रशाम्यति॥ ॥इति तृतीयमासे
गर्भिण्या गर्भवेदनाहरमौषधं॥ ॥गर्भवेदनानाशनं विधानं च॥ अथ चतुर्थे मासि गर्भिणी ग
र्भवेदनाहरमौषधं॥ बलिश्च॥ नारायणीयटीकायां मपेक्षितार्थद्योतिन्यां क्षीरं च कदलीमू
लं उत्पलं वालकं तथा॥ आलोड्य सममात्रेण पिबेद्रोगोपशांतये॥ क्रियाकालगुणोत्तरे॥ चतु
र्थे मासि गर्भिण्या गर्भे स्रवति वेदना॥ क्षीरं कदलीमूलं मुत्पलं च सशर्करं॥ शीततोयेन पि

घृतंचपिबेत्क्षीरेणसंयुतं॥एवंनपततेगर्भःसचस्रावःप्रशाम्यति॥बलिमासिष्टतीयेचयश्चो
क्तंसंचतुर्थके॥कुर्यात्प्रयत्नतोविद्वान्नात्रकार्याविचारणा॥ ॥इतिश्रीरुद्रधरलोक्तंचतुर्थ
मासइदंमौवेदनाइदंविधानं॥ ॥अथपंचमेमासिगर्भिणीगर्भरक्षार्थंदेयोबलिः॥कर्मविपा
कसमुच्चये।गर्भिणीगर्भरक्षार्थंपंचमेमासिवैबलिः॥विनायकंसमुद्दिश्यदेयःसंयतचेतसा।
विनायकंगोमयेनकुर्यात्पिष्टेनवापुनः॥चतुरस्रेस्थंडिलेचस्थापयेत्तंगणाधिपं॥अभ्यर्च्यगंध
पुष्पैश्चबलिंतस्यपुरतःक्षिपेत्॥सरितःपुलिनेवापपर्वताग्रेद्विजोत्तमे॥छायामाश्रित्यवृक्ष
स्यकस्यचित्श्येनकंविना।तत्रतंसुप्रतिष्ठाप्यगणराजंक्षताक्षतिं॥अन्नंपक्वंतथापक्वंमांसं
पक्वमपक्वकं॥पायसंचमधुमाक्षागुडंक्षीरंफलानिच।कदलीफलपिंडजम्बुमधुकानिच ३०
मूलकं॥लकुचान्नारिकेलंचकंदमूलानिसर्षपाः॥सर्वधान्यानिलाजाश्चवरान्नंतिलपिष्टकं

इक्षुश्चतमसश्चैवमाध्वीपैष्टीतथासुरा॥गौडींचैवविशेषेणधूपदीपौतथाविधौ।तथाविधशाष्टे
नयःकश्चित्धूपःसमधुघृतात्यक्तइत्यर्थः॥क्रियाकालगुणोत्तरे॥पक्वापक्वेचमांसेचमत्स्यात्र
पिविशेषतः।पाटलीसहकाराणांमूलंमधुसमुद्भवं।अन्येषांपादपानांचबिल्वादानांचमूल
कं॥बिल्वादिशब्देनदशमूलीप्रसिद्धा॥एतत्सर्वंसमाहृत्यवंशपात्रेमनोरमे।मनोरमश्चेति
पंचवर्णैश्चित्रितेअन्नकादिरचनाविशेषैर्मंडिते।तत्रमंत्रः।एकदंतांबिकापुत्रत्रिनेत्रग
णनायक।रक्तांबरधरश्रीमान्रक्तमाल्यानुलेपन।स्कंदप्रियमहाबाहोपाशहस्तनमोस्तु
ते॥प्रगृह्णीष्वबलिंचेमंसापत्यांरक्षगर्भिणीं।बलिप्रदायकंमर्त्यमायुषाचाभिवर्द्धय।अलक्ष्मी
नामकंपापंममसद्योविनाशय।एवंमंत्रंसमुच्चार्यसगदागर्भिणीबलिं।नमस्कुर्यात्प्रयत्ने
नसंप्रार्थ्यचिष्टपकृष्टपक।पुनःश्येनमंत्रेणगर्भिणीनमस्करोतिसएषमंत्रः।वक्रतुंडमशवी

र्यमिशानागमश्रावल॥ शिरसा त्वामहं वंदे सापत्यां रक्ष मां सदा। इति गणेशनमस्कारः॥ ॥
इति बलिं दत्वा रक्षामंत्रं पठेत्। तथाहि। अयं बलिर्मया देवत्वदर्पे प्रतिपादितः॥ रक्षेमं शि
शुमानंदरूपशैलसुतात्मज। इति पंचममासे गर्भिणीगर्भरक्षार्थं देयो बलिः। अथ पंचम
मासे गर्भिणीगर्भवेदनाहरमौषधं॥ नारायणीयटीकायामपेक्षितार्थद्योतिन्यां। पंचमे मासि
गर्भिण्या गर्भे चेद्वेदना भवेत्। तन्निवारकमेवात्र भेषजं कथ्यते मया॥ नीलोत्पलं मृणालं च
कोलं क्षीरं तथैव च। केसरं पद्मकं चैव तोयेनालोड्य तत्पिबेत्॥ क्रियाकालगुणोत्तरे। अ
थास्याः पंचमे मासे गर्भे भवति वेदना। नीलोत्पलं सनालं च पद्मकेसरसंयुतं। अजाक्षीरेण
तत्पिष्ट्वा तोयेनालोड्य तत्पिबेत्॥ अत्र योगे कोलीक्षीरमेव मुख्यं तत्पुनः केषांचित्सेव्यं के ३९
षांचिन्न सेव्यं। तस्मादजाक्षीरं। एवं न पतते गर्भः स च रोगः प्रशाम्यति॥ ॥इति पंचममासे ग

र्भिण्या गर्भवेदनाहरमौषधं। शिशुरत्नाकरोक्तं विधानं सभेषजं॥ ॥अथ षष्टे मासि ग
र्भिणीगर्भरक्षार्थं देयो बलिः। कर्मविपाकसमुच्चये॥ गर्भिणीगर्भरक्षार्थं षष्टे मासि
तथा बलिः॥ वसूनष्टौ समुद्दिश्य देयो मंत्रेणमंत्रितः॥ घृतान्नं च हरिद्राक्तं खंडं लाजाश्च
पायसं॥ पीनवर्णानि पुष्पाणि तथा नीलोत्पलानि च॥ सकांचनः पूर्णकुंभः सर्वं नद्यास्तटे क्षि
पेत्। पूर्णकुंभः सजलेन पूर्ण इति। अत्र मंत्रः॥ प्रभासः पावकः सोमः प्रत्यूषो मारुतोनलः।
धरो ध्रुवश्च इति ह्येते वसवोष्टौ प्रकीर्तिताः। प्रगृह्णंतु बलिं चेमं सर्वे रक्षंतु गर्भिणीं। इति ष
ष्टमासे देयो बलिः। अथ षष्ठमासि गर्भवेदनाहरमौषधं॥ नारायणीयटीकायामपेक्षिता
र्थद्योतिन्यां॥ षष्ठे चैवाम्रमृद्वीकोत्पलकेसरं पिबेत्॥ क्रियाकालगुणोत्तरे॥ अथास्या मासि
षष्ठे गर्भे भवति वेदना॥ पिप्पलीबीजमूले च सोत्पले च सकेसरे॥ शीततोयेन पिष्ट्वा त

क्षीरेणालोड्य तत्पिबेत्। एवं न पतते गर्भः सच शूलः प्रशाम्यति। इति षष्ठे मासि गर्भिणीग
र्भवेदनाहरं विधानं॥ ॥अथ सप्तमे मासि गर्भिणीगर्भरक्षार्थं देयो बलिः॥ एतावांस्तकवि
ह्योषः॥ षष्ठेव सर्वा देवताः॥ अत्र स्कंदो देवता। अत एव बलिदाने मंत्रे तु बलिसमुद्दा
ख यः पूर्व एव॥ तत्र मंत्रः॥ स्कंद षण्मुख देवेश त्रिवक्त्राति विवर्द्धन। प्रगृह्णीष्व बलिं चेमं साप
त्यां रक्ष गर्भिणीं। बलिक्षेपस्थानं नद्वीनदं॥ ॥अथ सप्तमे मासि गर्भवेदनाहरमौषधं॥
नारायणीयटीकायामपेक्षितार्थद्योतिन्यां॥ सप्तमे॥ कपित्थबिल्वकुफलं मूलं शर्करायुक्तम
जसा॥ अंजुसेति शर्करा समभागा। शीततोयेन पिष्ट्वा च क्षीरेणालोड्य तत्पिबेत्। एवं न पत
ते गर्भः सशौचे गः प्रशाम्यति॥ इति शिष्टरक्षारत्नोक्तं सप्तममासगर्भवेदनाहरं विधानं॥ ३२
अथाष्टमे मासि गर्भिणीगर्भरक्षार्थं देयो बलिः। कर्मविपाकसमुच्चये। गर्भिणीगर्भरक्षार्थं

बलिं मासेपि चाष्टमे॥ दुर्गामुद्दिश्य दातव्यो होमं कुर्वन्नसौ दति। बलिदानप्रकार माष।
पाय संच तथा लाजाः कृष्ण धान्यौदनं हुतं॥ अपूपास्त शरावैव माहिषं दधि मूलकं॥
माषा निष्पावका मुद्गाः तथा माका कुसुमानि च। नीलोत्पलानि च तथा पूर्णकुंभः सका
चनः॥ एतद्दीपेन्वदी तीरे मंत्रेणानेन संयतः॥ ग्रंथांतरे तु विशेषमाह। गिरौ वा सरि
त्तीरे देवखाते तडागके। राजमार्गेषु माधवस्तात् बलिमेनं विनिक्षिपेत्। तत्र मंत्रः॥ का
त्यायनि महारुद्रे विकुमारि सुलोचने शिवे॥ अष्टहस्ते चक्रवक्त्रे पिंगले भुवनासिके॥ प्रगृह्णी
ष्व बलिं चेमं सापत्यां रक्ष गर्भिणीं॥ ॥इत्यष्टममासगर्भिणीगर्भरक्षार्थं देयो बलिः॥
अथाष्टमे मासि गर्भिण्या गर्भवेदनाहरमौषधं॥ ॥नारायणीयटीकायामपेक्षितार्थद्यो
तिन्यां॥ ॥अष्टमे मासि विज्ञेयं धान्यकं केसरं तथा। शालूकमुत्पलं चैव तथा च गज पि
४ द्वे यज्ज्येष्ठि नित्ये निशाप्रिये। दुर्गे देवि महाकालि सिंहशार्दूलवाहने। धनुःखड्गधरे देवि दुष्टदैत्य
विनाशिनि। नमो रौद्रप्रिये ४
दूल

प्यत्नी॥निष्काश्यसितयासर्वंदेयंतापोपशांतये॥क्रियाकालगुणोत्तरे॥अथास्याष्टमेमासिग स्त्व १
र्भेभवतिवेदना॥पद्मकंगजकृष्णाचधान्यमुत्पलकंतथा॥शीततोयेनपिष्ट्वाथक्षीरेणाज्यो
ज्जीतपिबेत्॥एवंनपततेगर्भःसचरोगःप्रशाम्यति॥ ॥इत्यष्टमेमासिगर्भिण्यागर्भवेदनाहर
संक्षेपजंविधानं॥ ॥अथनवमेमासिगर्भिणीगर्भरक्षार्थंबलिःकर्मविपाकसमुच्चये॥गर्भि
ण्यागर्भरक्षार्थंमासेथनवमेबलिः॥देयःस्यान्मातृकोद्देशात्ततःस्याद्रोगमुक्तिदः॥बलिःस्वरूप
माह॥दध्योदनंचलाजाश्चमुद्गान्नंचपुनर्दधि॥तच्चारात्तत्पायसंतपंकजानिचचंदनं॥
श्वेतपत्राणिपुष्पाणितथान्यानिशुभानिच॥धूपोवस्त्रंहिरण्यंचपूर्णकुंभंतथैवच॥बलि
मंत्रमाह॥प्रगृह्णीतबलिंचेमंमयादत्तंचमातरः॥यूयंरक्षतसंतुष्टाःसापत्यांगर्भिणीमि ३३
मां॥इतिबलिः॥अथनवमेमासिगर्भवेदनाहरमौषधं॥नारायणीयटीकायामपेक्षिता

र्थितोतिन्यांनवमेमासिकंकोलीपलाशस्यचबीजकं॥एरंडमूलसंयुक्तंपिष्ट्वातोयेनसंय
तः॥कृत्वाथमोदकंधात्रीफलमानंविशेषतः॥जीर्णेन्नेभक्षितश्चैवहरेत्तुगर्भव्यथांध्रुवं॥क्रि
याकालगुणोत्तरे॥अथास्यानवमेमासिगर्भेभवतिवेदना॥पालाशबीजंकंकोलीमूलंसपा
षाणकंतथा॥सोशीरंमोदकंकृत्वाजीर्णेन्नेतोजयेत्कृतं॥एवंनपततेगर्भःसचशूलंप्रशा
म्यति॥बलिश्चैपश्चात्प्रकल्पये॥ ॥इतिशिशुरक्षारत्नोक्तंनवममासगर्भवेदनाहरंविधानंस
भेषजं॥ ॥अथदशमेमासिगर्भिणीगर्भरक्षार्थंदेयोबलिः॥कर्मविपाकसंग्रहे॥गर्भिणी
गर्भरक्षार्थंमासेचदशमेबलिः॥उद्दिश्यनैर्ऋतंदेवंबलिर्देयस्तुमंत्रिणा॥तत्रबलिप्रकारमाह॥
पक्वान्नंकृशरालाजाःपक्वापूपंकपलंसुरा॥इत्येतानिनिक्षिपेत्तत्ररक्षोमंत्रेणमंत्रितः॥कृष्णगंधं कलशेर
कृष्णवस्त्रंकृष्णानिकुसुमानिच॥धूपोदीपश्चनैवेद्यंबलयेसंप्रदापयेत्॥नीलोत्पलानिकृष्णानां

तेषु जलानि विनिक्षिपेत्॥ दक्षिणाशां प्रति तथा नीत्वा तत्र विनिक्षिपेत्। तत्र मंत्रः॥ बालसं
त्रे ऊकुक्रुदाचार्यमतेपिनोज्झराज्झमतेच सर्वत्र संमता मंत्रस्य। ॐ कं क्रां क्रीं क्रुं स्वाहा॥ बलिं
गृहाण रक्ष स्व मया ते प्रतिपादितं॥ बलिमवलोकय सापत्यां रक्ष गर्भिणीं॥ निर्विघ्नं कुरु कु
रु गर्भपीडनात्। प्रेतासन महाबाहो कुमुदेश्वर प्रिय॥ प्रगृह्णीष्व बलिं चेमे सापत्यां रक्ष
गर्भिणीं॥ अत्र बलौ ब्राह्मणैः सुरामांसं विवर्जनीयं तैश्चतुरसम्प्रेक्षणीयः॥ इति दशमेमासि
गर्भरक्षार्थं देयो बलिः॥ दशमेमासि गर्भविदनाहरमौषधं। नारायणी यदीकायामपेक्षिता
र्थद्योतिन्यां। दशमे काश्मीरोत्पन्नं मधुकं मधु संमितं। तंडुलोदकेन पिष्ट्वा क्षीरेणालोड्य तत्पि
बेत्। क्रियाकालगुणोत्तरे। अपास्याद्दशमे मासि गर्भे भवति वेदना। शर्करा चोत्पलं चैव म ३८
धुकं मुद्गमेव च॥ शीततोयेन पिष्ट्वा तु क्षीरेणालोड्य तत्पिबेत्। एवं न पतते गर्भः सशूलश्च

प्रशाम्यति॥ ॥इति शिशुरक्षारत्नोक्तं दशमेमासि गर्भवेदनाहरं भेषजं॥ ॥अथैकादश
मेमासि गर्भिणी गर्भरक्षार्थं बलिः॥ कर्मविपाकसंग्रहे। गर्भिणी गर्भरक्षार्थं मासि चैकादशे
बलिः॥ वासुदेवं समुद्दिश्य देयो नात्र विचारणा। पायसापूपपिष्टं च गुडो लाजास्त्वसक्तवः। पि
धूपः ४ ष्टशाष्टेन पिष्टान्नं। श्यामो ध्वजस्तत्पाका यश्च श्यामं च चंदनं स्मृतं॥ श्यामं च चंदनं कृष्णागुरुः॥
श्याम धूपो गुग्गुलुः॥ श्यामानि च प्रसूनानि नीलोत्पलानीत्यर्थः। तद्दत्वा वेश्यामानि भोग
श्यामकलशो ४ राणि केदंवपुष्पाणि। श्यामकमलानि निधाय सर्वं विनिक्षिपेज्जले मूले बोधि
विटपस्य वा ह्रदावनतलेपि वा॥ निक्षिपेत्प्रयतो भूत्वा तत्रेमं मंत्रमुच्चरन्। पांचजन्यप्रता
ग २ पवक्त्रकौस्तुभोद्योतितांतक। प्रगृह्णीष्व बलिं चेमं सापत्यां रक्ष गर्भिणीं॥ दशमेमासि यद्युक्तं
गर्भवेदनाहरमौषधं तदेवैकादशेमासि देयमिति। क्रियाकालगुणोत्तरे॥ एकादशेमासि

चेद्गर्भे न वर्तते वेदना। पद्मोत्पलं च मधुकं तालकेनापि संयुतं॥ शीततोयेन पिष्ट्वा तु क्षीरेणालोड्य
तां पिबेत्॥ एवं न पतते गर्भः स च शूलः प्रशाम्यति॥ ॥इति शिशुरक्षारत्ने एकादशे मासि
गर्भवेदनाहरं विधानं सभेषजं॥ ॥द्वादशे मासि गर्भिणीगर्भरक्षार्थं देयो बलिः॥ यो बलिः
कल्पितः पूर्वं मासि चैकादशे शुभः॥ वासुदेवं समुद्दिश्य सर्वान्नेन संचयः॥ अथ चेद्द्वादशे मासि
गर्भे न वर्तते वेदना॥ पद्मं शृंगाटकं चैव चोत्पलं च सनालकं॥ शीततोयेन पिष्ट्वा च क्षीरेणालोड्य
तां पिबेत्। एवं न पतते गर्भः स च शूलः प्रशाम्यति। इति शिशुरक्षारत्ने द्वादशमासगर्भवेद
नाहरं विधानं सभेषजं॥ ॥अत्र सर्वत्र व्याहृतः क्षीरं चाक्षस्तत्क्षीरं गोक्षीरं ज्ञातव्यं तच्चा
पक्वमेव। यदा पक्वं नावस्तदा पक्वं निर्वाप्य स्तिमाह्ने संप्रयोगे दातव्यं। गोक्षीरस्याप्राप्तावाय ३५
दातदा तस्मात् क्षीरं ज्ञातव्यं। यदा क्षीरमात्रस्याप्राप्तावस्तदा स्त्रीस्तनरसस्तस्याप्राप्तावस्तदा रं
ज्ञा

९ तस्याप्राप्तावेगड्डीरसस्तस्याप्राप्तावेतं डुलोदकं शर्करयास
ह प्रयोज्यं ९

रंककाकंद्ररसस्तस्याप्राप्तावेक्षुजं शीतलीकृत्य समसितं प्रयोक्तव्यं॥ एवं द्वादशमासपर्यंतं मासि
मासि ज्ञातव्यं। पथ्यं क्षीरोदनं॥ ॥अथ सुखप्रसवोपायः॥ ॥नारायणीयटीकायामपेक्षिता
र्थद्योतिन्यां। करंकीकृतगोमूर्ध्नि स्तृतकीनवनोपरि। तत्काले चिरतो नार्यः सुखप्रसवका
रकः॥ करंकीकृतगोमूर्धा अस्थिमात्रावसिष्टगोमस्तकमिति। तपात्र उपोद्क्या स्तकमूला
नि तैलयुक्तानि कारयेत्। योनेः प्रलेपो दातव्यः सुखप्रसवकारकः। अन्यच्च। अपामार्गस्य मू
लानि पाठायाश्चैव विशेषतः। पेषयेत्तंदारनालेन। तेन योनिः प्रलिप्यते। तदेव पाययेद्धीमान् सु
खप्रसवहेतवे। अन्यत् वंशस्य निंबस्य च सप्तरिष्टात्वक् संप्रयुक्ता उलसीरसाद्या॥ मूलान्यथा ना
जर त्रकपित्थपत्रं करंजबीजं च समस्तमेतत्। अजापयःसंयुतमेव पथ्यं स्मृतं च तैलेन युतं समासे।
योनिः प्रलेपविधानतेन तत्रापि पेयं सुखसौख्यसिद्ध्यै। गर्भे मृतं चाप्यर्भकमेति सम्यक् द्वारं

चयोनेर्नकरोतिदुःखं।एवंविधानंनकरोतिज्ञानन्नसन्नूणशानात्रविचारणीयं॥तत्रयोनि
लेपनमंत्रः॥हिमवत्युत्तरेपार्श्वेशबरीनामयक्षिणी।तस्यान्नूपुरशब्देनविशल्यातवतुत्तबत
गर्भिणी॥स्वाहा।इतिमंत्रः॥अमंदनेपिअमदर्चितावाचोयःहल्लगर्त्तानिरइंसृजिस्वना।अव
स्यवोहृषणांवज्रदक्षिणांमरुत्वंतंसख्यायहुमेवोहे।पानीयंमंत्रयित्वापाययेत्इतिसुख
प्रसवोपायः॥ ॥इतिश्रीपृथ्वीमल्लकृतशिशुरक्षारत्नाकरेरौक्तंसुखप्रसवोपायविधानं॥
अथप्रसंगेनलुब्धजातकोक्तानिबालरक्षोपयोगीनिद्वादशविधनानि॥तान्येवस्कंद
पुराणे॥स्कंदसूर्यसंवादे॥सूर्यउवाच॥ ॥केनकर्मविपाकेनबालानांजायतेव्यथा।जात ३६
मात्राणिबालानिकर्मकिंपरिकुर्वति।आहारश्चैवनिद्राचरुदितंहास्यमेवच॥स्वास्नाविकंत्वि
दंदेवकर्मचैषांषजाननन।कर्मणस्तस्याकारणात्।रूपंपापंप्रजायते।पापंविनारूपंव्याधिःपी

ड्यतया।विलानुद्धिश्वन्।तेषांकर्मफलं।किंवामातापित्रोस्तुकर्मजं।जन्मनांसमयेस्याप
तन्ममाचक्ष्वसुव्रत॥ ॥श्रीस्कंदउवाच॥ ॥येनकर्मविपाकेनशिशूनांजायतेगदः।तत्सर्वं
कथयिष्यामिशृणुत्वंदिवाकर॥लंकायांरावणोनामपौलस्त्योराक्षसेश्वरः।स्वसारस्तस्य
वीरस्यद्वादशासन्महात्मयाः।ताभिःकृतंतपोघोरंसर्वलोकभयप्रदं।पीडितंताभिरखिलं
जगत्तीव्रतपोबलात्।रुद्रस्ताराधितस्ताभिस्तपसातीव्रतेजसा।प्रसन्नोभूत्तदादेवस्ताभ्य
एवंवरंददौ॥ ॥रुद्रउवाच॥ ॥वरदोहंवराहन्योयुष्माभ्यंरजनीचराः।ताभिर्दृष्टंतंतदा
तद्रूपंबालानांदेहसंभवं।वसासृक्मांसमेदोस्थिमज्जाशुक्रात्मकंरवेः।देहिदेहेवरंशासर्वतो
जीवनामेवरांकरा।तछ्रुत्वावचनंतासांचुकोपपरमेश्वरः।ब्रह्मवंशासमुद्भूताःतपोहृत्तिप
रायणाः।तत्कथंबालघातायचेतोवःपरिवर्त्तते।सर्वलोकमतंदेवंप्रार्थितंत्रमनीषिभिः॥

॥रान्हस्यऊचुः॥यदिप्रसन्नोभगवन्ददात्वस्मत्प्रियंविभो॥सर्वेषामपिबालानांमेदसा
तृप्तिरेवनः॥ ॥रुद्रउवाच॥ ॥यास्त्रीनिद्रामुखेन्नातिबालंस्पृशतिभुंजती॥प्रसूतिसुम
येत्वंगंनकरोतिप्रमादतः॥नम्रानिरुतिरात्रौवानिष्पन्नसुरतासती॥तस्यावातद्दिने बालंदि ३
मासेवर्षेपिचविशेषतः॥आद्येतुदिवसेमासेवर्षेवापिविमोचनी॥गृह्णातुमत्प्रसादेन हि ४
ज्वराद्यैर्वेदनोच्चयैः॥द्वितीयेमोहिनीनामसुनंदातुतृतीयके॥चतुर्थेपूतनानामपंचमे
त्यासुरीतथा॥षष्टेतुरेवतीदेवीबालंगृह्णातुसत्वरं॥सप्तमेचशकुनीनामत्वष्टमेचपि
शाचिका॥नवमेपाशिनीदेवीशिशुंगृह्णातिसत्वरं॥महामारीतुदशमेकालिकातुततः
परं॥द्वादशेकामिनीदेवीपीडाकरणतत्परा॥यूयमेवंकुरुध्वंनोपाडंबालकविग्रहे॥आ ३२
त्मनोदिवसेमासेवर्षेवापिष्टपकृष्टपके॥निमित्तेसतिरान्हस्यचोत्सुकंचेदानाबुभ

न्यंबलिदानंमेविदधत्यखिलंपरं॥गृहीतमपिबालंतंसंतुष्टाःपरिमुंचति॥इतिलब्धव
राःसर्वाःपीडयंतिशिशून्मुदिताः॥दिनमासाह्वमानेननात्रकार्याविचारणा॥प्रथमेदिवसे
मासेवर्षेदेवीविमोचनी॥तस्यास्तुजायतेपीडाशिशूनांतीव्रवेदना॥ज्वरस्तुप्रथमंताव
त्र४ त्नेत्ररोगस्ततःपरं॥नगृह्णातिस्तनंडिंभोवांतिरात्यंतिकीत्तवेन॥मुष्टिंबध्नातिवेगेन
दंतान्दंतैर्दशत्यलं॥इत्थंप्रजायतेपीडाविमोचन्यादिवाकरे॥तस्याःपूजांप्रवक्ष्यामिबा
लानांशांतिकारिणीं॥करवीररक्तपुष्पाणिचंदनंरक्तपूर्वकं॥धूपस्तुश्रीवनिर्माल्यंसा
ज्यंबिल्वदलंस्मृतं॥दीपास्तुपंचविज्ञेयास्तथापंचैवपोलिकाः॥मुष्टिकाःपंचविज्ञेयाःध
जाःपंचसुपीतकाः॥तांबूलबीटकाःपंचपूगीफलसमन्विताः॥रक्ततंडुलनक्तस्तुप्रोक्तः
साज्यगुडस्तथा॥शरावेनूतनेप्राज्ञनिधेयंसर्वमेवतत्॥ततस्तुपूत्तलींकुर्यात्त्रिधातुमय

तोमृदः॥ निदध्यात्तत्रतांधीमान् पीतवस्त्रसमावृतां॥ पीतसूत्रोपवीतांतां पूजयेद्भक्तिमान्न
रः॥ पूर्वोक्तैरेव संभारैः गंधधूपादिभिर्बुधः॥ वक्ष्यमाणेनमंत्रेणप्रार्थयेत्तांसमाहितः॥ तत्रमं
त्रः॥ ॥ॐनमोभक्तवत्सलेविमोचिनिस्वाहा॥ एवंमंत्रंसमुच्चार्यसर्वपूजांप्रकल्पयेत्॥ के
षांचिन्मतेनएकस्मिन्शरावेसापुत्तली निधीयते॥ अन्यस्मिन्शरावेऽत्रगंधादितांबूलं
तःसंभारोनिधीयते॥ तच्चब्रह्मयामलोक्तं॥ एकएवनेतान्नवति॥ तदापुत्तलीशरावेऽत्रादौनि
धायतस्याःपुरतस्तत्सर्वंनिदध्यात्तत्रैवोपचारान्निधायपंचपक्वान्नवान्एकीकृत्यबालका
गेभ्यःसन्निःसार्यसोदकान्ततस्तत्पुनःनीराजनांविधायतत्सर्वंनितानयत्तसकंबलं॥ स
त्रास्त्रोमंत्रमुच्चारयन्॥ तेचपक्ववाः॥ जंबांम्रोडुंबराश्वत्थपवटानांपक्ववास्तथा॥ सर्वांगेभ्यःस ३९
मुत्तार्यपीडाबालस्यसंव्रजेत्॥ इत्थंरात्रित्रयेकुर्याद्विधानंसुसमाहितः॥ ग्रामादुत्तरतोनित्यं

पूर्वरात्रेविचक्षणः॥ तस्मिन्स्थापयजपेन्मंत्रं बालानांशांतिहेतवे॥ एवंप्रशांतिमायातिद्वि
षपीडानसंशयः॥ ॥इतिमार्कंडेयपुराणोक्तंलघुजातकेप्रथमदिवसमासाष्टदेवता
विमोचिन्याःपीडाशमनंविधानं॥ ॥स्कंदउवाच॥ ॥द्वितीयेदिवसेमासेवर्षेचैवभ्रना
करा॥ मोहिनीनामदेव्यत्रकुरुतेपीडनंशिशोः॥ ज्वरंनेत्ररुजंकासंश्वासंचैवविशेषतः॥
छर्दनंमूर्छनांदेषंजनयत्यनिशंशिशोः॥ तत्रशांतिविधानंचप्रवक्ष्यामिसमासतः॥ मालतीकु
सुमैःपूजांचंदनंमलयोद्भवं॥ कुंकुमंकेसरंदिव्यंकर्पूरंसुविलेपनं॥ दिव्यभक्तिसमाचारात्द
शांगंधूपनंतथा॥ नैवेद्यंपूर्ववद्देयंतत्पैवपक्ववक्रिया॥ पूर्ववत्पुत्तलीकृत्वाशरावेसंनिवेशये
त्॥ वक्ष्यमाणेनमंत्रेणकुर्यात्सर्वमतंद्रितः॥ तत्रमंत्रः॥ सर्वेश्वरिसर्वजनप्रियंकरित्राहित्राहिद्विज
गर्संवेंॐनमोभगवतिस्वाहा॥ इत्यनेनैवमंत्रेणसर्वंकृत्वाविधानकं॥ रात्रित्रयेनिधातव्यंपश्चि

मोहिनि १

मेग्रामतोबहिः॥प्रथमेयामिनीयामेत्ततंत्नवतिसौख्यदं॥ ॥इतिश्रीलुब्धजातकोक्तंद्वितीय
दिवसमासवर्षमोऽनीजनितपीडाशमनंविधानं॥ ॥स्कंदउवाच॥ ॥तृतीयेदिवसेमासेवर्षे
तृएकविधिर्रवे।सुनंदानामदेव्यत्रबालानांभयदाभवेत्।अवस्थांकुरुतेघोरांसुनंदाचैवना
मिनी॥छन्नोगंधदुर्गंधश्वासोद्गारेणसंजायते।आकुंचयतिगात्राणिनिश्चलौदृत्यहर्निशं।इत्थं २४
संजायतेपीडासुनंदाकोपसंभवा।तस्याःशांतिविधानंचप्रवक्ष्यामिसमासतः।शतपत्राणिपुष्पा
णिचंदनस्यानुलेपनं॥हरिद्राकुंकुमंनागकेसरंवालकान्वितं।गंधार्घधूपनैवेद्यघातगुग्गुलंचा
तिशोभनं॥घृताक्तंखदिरांगारैःसंप्रताप्यविरोचनं।पूर्ववत्पुत्तलींकृत्वाशरावेसंनिवेशयेत्॥
प्रसृतित्रयशालीनामोदनंसर्पिषान्वितं।दीपकाःपोलिकाःपंचतावंतोमुष्टिकाःस्मृताः॥ध्वजाः ३९
पंचचविज्ञेयाःसहिताःपंचपल्लवैः।वक्ष्यमाणेनमंत्रेणबलिंसर्वंसमाहरेत्।ॐनमःसुनं

दायैकुंफट्स्वाहा।इत्यनेनैवमंत्रेणग्रामात्पूर्वंविनिक्षिपेत्।त्रिरात्रंरजनीपूर्वयामेबालरो
गोपशांतये।एवंकृतेविधानेचव्याधिमात्रंविनश्यति।वर्द्धतेचंद्रवद्बालःशुक्लपक्षेयथासुखं।
॥इतिश्रीतृतीयदिनेमासाब्दजनितसुनंदाबाधाशमनंविधानं॥ ॥स्कंदउवाच॥ ॥चतुर्थे
दिवसेमासेवर्षेचैववदिवाकर।पूतनानामदेव्यत्रपीडांप्रकुरुतेशिशोः॥संतापोजायतेपूर्वम
तीसारोस्तनःपरः।मुष्टीर्बध्नातिकंपश्चवारंवारंप्रजायते।तस्याःशांतिंप्रवक्ष्यामिपीडायामु
पद्राधिते।पूर्ववत्पुत्तलींकृत्वाशरावेसंनिवेशयेत्।वेष्टयेद्रक्तसूत्रेणकुंकुमेनानुलेपये
त्।पूजयेच्छ्वेतकुसुमैःपुष्पैःबर्बरीपत्रसंयुतैः॥मत्स्यमांसरसधूपोत्रगव्येनाज्येनसंयुतः।त्रयो
दीपास्त्रिकोणाःस्युःसाज्यवर्तिसमन्विताः।तिस्रःस्युःपोलिकाज्ञेयामुष्टयस्तत्त्रयंतथा॥ध्वजा
स्तिस्रःसमाख्यातानात्रकार्याविचारणा।प्रसृतित्रयमुद्दिष्टंतंडुलानांप्रमाकर।तत्कृतेसर्पि

षायुक्तं द्वारावेसं निवेशयेत् । विष्टयेद्रक्तसूत्रेण कुंकुमेनानुलेपयेत् । रक्तवस्त्रेण संवेष्ट्य
नमस्कृत्वा जपुत्तलीं । दध्यन्नतसमारोपं विदध्यात्तु समाहितः । पद्मत्रैवैः पंचभिर्बालिं सर्वांगेषु
प्रमार्जयेत् ॥ तत्र मंत्रः । ॐ नमः पूतने मातः बलिं पश्य सुशोभने । बालकं मुंच यूयं गेन बलिदा दे३
नेन हर्षिते । इति मंत्रं समुच्चार्य सर्वं बलिमुपाहरेत् । प्रदोषे तु गणनिर्वृत्ते सप्तमं सोविधिं श्रणए ।
दक्षिणां दिशिमाश्रित्य निक्षिपेत् ग्रामतो बहिः ॥ एवं कृते बलौ सम्यक् बालकः सुखमाप्नु
यात् ॥ ॥ इति श्रीस्कंदपुराणोक्ते चतुर्थदिवसे मासे वर्षे जनितपूतनापीडाशमनं विधानं ॥
अथ पंचमे दिवसे मासे वर्षे चैव प्रजाकर ॥ आसुरा नाम देव्यत्र बालकं बाधते ततः ॥ तत्र चि
न्हं प्रवक्ष्यामि बालांगे यत्प्रजायते । ज्वरस्तु प्रथमं पश्चात्क्रोगं ग्रहणीततः । मुष्टिबंधः प्र ५०
लापः स्यादुद्वेगो नाशनं तथा । शिरोरुग् जायते त्यंतमेतत्र स्वकृतं रवे । पूर्ववन्मृत्तलीं कृत्वा

पीतसूत्रेण वेष्टयेत् ॥ पीतवासोवसानां तां द्वारावेसं निवेशयेत् ॥ घृताभ्यंगो विधेयोत्र ह
रिद्रालेपनेन तु ते । ततः पूजां च कुर्वीत कुसुमैः करवीरजैः ॥ जपापुष्पैर्बंधुजीवैर्बालकस्य स
मीपतः ॥ चंदनेनानुलिप्तां तां दिव्यगंधोपशोभितां ॥ राजिकासर्षपैर्धूपो घृताक्तोत्र प्रशस्य
ते । दीपकाः सप्त विज्ञेयाः ध्वजास्तावंत एव च ॥ मुष्टिका पोलिका सप्त सप्त सौवालिकास्त
था । नैवेद्यार्थं समुद्दिष्टं मोदनं सघृतं हविः । पद्मत्रैवस्त्रकयपाद्ध्वं कारयेन्मार्जनं शिशोः । मंत्रमे
नं समुच्चार्य त्रिवारं प्रतिपूजने । ॐ सुकल्ले सुन्नगे देवि सर्वदुःखनिवारिणि । कुरु शांतिं शि
शोश्चात्र बलिदानेन राक्षसि । इत्युच्चार्य क्षिपेत्पूर्वं मध्यरात्रे त्रिवासरं । पश्चिमां दिशमाश्रि
स्कंचं २ त्य ग्रामाद्वहिर्हि नरं रवे ॥ ॥ इति श्रीस्कंदपुराणोक्ते पंचमदिवसमासवर्षे आसुरीपीडाशम
नं विधानं ॥ ॥ अथ षष्ठे च दिवसे वर्षे चै । व दिवाकरात् । रेवती नाम देव्यत्र निशि गृह्णात्यसं

मासे १

शायं॥ आदौ तु जायते पीडा व्रणानां शिशुमूर्द्धनि। ज्वरस्तु मुखशोषोऽपि तृषा समभिजायते
प्रकंपंते च गात्राणि रोदिति च पुनः पुनः। तत्र शांतिं प्रवक्ष्यामि शृणु सूर्य समाहितः॥ पूर्ववि
ल्लूतलीं कृत्वा द्वारादेशे निवेशयेत्॥ गंगातोयेन संस्नाप्य शुक्लवस्त्रेण वेष्टितां। शुक्लसूत्रे
ण संवीतां शुक्लमाल्यानुलेपनां। शुक्लधूपोऽत्र निर्दिष्टो बिल्वपत्रैः सशानघ। एकैनाक्तास्त्व आन्पे ४
विश्वात्मन् दीपाः पंच प्रकीर्तिताः। तावंतो मुष्टिका ज्ञेयाः पोलिकाभिः समन्विताः॥ प्रसृतिः
त्रयमात्राणां व्रीहीणामोदनं स्मृतं॥ दध्ना सह गुडेनाक्तं तांबूलं च विशेषतः। ध्वजैश्च पंचभि
र्युक्तं बलिमेतं समर्पयेत्। वक्ष्यमाणेन मंत्रेण प्रक्षिपेच्च समाहितः। तत्र मंत्रः। राक्षसि त्वं
महाभागे बालं मुंच शुभानने। क्षेमं कुरु जगत्यस्मिन् शोभनानां वरे व्रते॥ इति मंत्रेण सं ४२
मंत्र्य प्रदोषे बलिमाहरेत्॥ संस्नाप्य बालकं तत्र पूर्वोक्तैः पंचपल्लवैः। नगरान्नैरृते देशे व

तीं बलिमाहरेत्॥ एवं प्रशांतिमायाति बालपीडा प्रभाकर॥ ॥इति श्रीस्कंदपुराणोक्ते षष्ठे
दिवसे मासे वर्षे रेवतीपीडाशमनं विधानं॥ ॥अथ सप्तमे दिवसे मासे वर्षे त्वेव दिवाकर।
शकुनी नाम देव्यत्र बालं गृह्णाति दारुणा। ज्वरस्तु प्रथमं तावच्छिरोरोगस्ततः परं। प्रलाप
स्त्वतिसारश्च पांति रात्र्यां ति की नवेत्। अक्ष्णोर्निमीलनं चापि गात्रकंपोऽभिजायते॥ तत्र
शांतिं प्रवक्ष्यामि शकुनीप्रीतिवर्द्धनीं॥ रक्तचंदनलिप्तांगीं पूर्ववल्लूतलीं कृतां। यथाका
लोद्भवैः पुष्पैः पूजयेद्यत्नतः सुधीः॥ धूपस्तु गुग्गुलुः श्रेयान् दीपाः पंच प्रकीर्तिताः। पोलि
कामुष्टिकाः पंच ध्वजाः पंच सुशोभनाः॥ नैवेद्यमोदनं सर्पिः प्रसृतेन विनिर्मितं। तंदुलानां
सुरश्रेष्ठ मंत्रपूतं प्रकल्पयेत्। तथाहि। ॐ नमः पद्मपत्राक्षि विशालवदने शिवे। संगृह्य बलिमे
तं त्वं बालं मुंच सुशोभने। इत्युच्चार्य ततो धीमान् बलिं निशि समाहरेत्। दक्षिणां दिशमाश्रित्य

विधायपंचवक्रियां॥ एवंकृते विधाने च त्रिरात्रं सुरसत्तम॥ व्याधिमुक्तं भवेद्बालं नात्र का
र्याविचारणा॥ ॥इतिश्रीस्कंदपुराणोक्तं सप्तदिनमासावर्षशकुनीपीडाशमनं विधानं॥
अथाष्टमे दिवसे मासे वर्षे देवी पिशाचिका॥ पीडयत्येव बालानि ज्वरछर्दिशिरोर्त्तिभिः॥
नेत्रपीडांगसंकोचो रुग्रोगश्चापि जायते॥ एतस्य प्रतीकारं येन भव्ये पिशाचिका॥ प्रकु
र्याच्च त्रिरात्रेण शांतिं बालार्त्तिशरिणीं॥ पूर्ववत्पुत्तलीं कृत्वा द्वारावे संनिवेशयेत्॥ पंचामृतेन
संस्नाप्य देवीं तां विशुना सह॥ चंदनेनानुलिप्तांगीं श्वेतपुष्पैः प्रपूजयेत्॥ ध्वजाः सप्त समाख्याताः
तावंतः पोलिकाः स्मृताः॥ मुष्टिकाश्चापि विज्ञेया शरांकाङ्कुताः स्मृताः॥ पीतवर्णेन वस्त्रेण
सूत्रेणापि सुसंस्कृतां॥ विजयाचूर्णधूपो त्र घृताक्तः संप्रकीर्त्तितः॥ दीपाः सप्त घृतेनैव पूरयि ४२
त्वा नियोजयेत्॥ प्रस्त तित्रयं तक्रस्य घृताक्तस्य विशेषतः॥ नैवेद्यं कल्पयेद्धीमान्दद्येत सेपन

संशयः॥ तांबूलं च सकर्पूरं नत्वा न्याग्रे निधापयेत्॥ शक्त्या च दक्षिणा तत्र देवता प्रीतये
रवे॥ वक्ष्यमाणेन मंत्रेण सर्वमेव विधीयते॥ तथाहि ॐ नमः सर्वभूतेशि शोभने त्वं पिशाचि
के॥ बलिं चैव मुरीकृत्य त्वरितं मुंच बालकं॥ यथा पूर्वं तथा कार्या पंचपञ्चवसत्क्रिया॥ त्रिरा
त्रं रजनीवक्त्रे पूर्वग्रामाद्बहिः क्षिपेत्॥ एवं कृते विधाने पि रोगशांतिः प्रजायते॥ ॥इतिश्रीब्र
ह्मयामलोक्तं अष्टमे दिवसे मासे पिशाचिकाबाधानिवारणं विधानं॥ ॥स्कंद उवाच॥ ॥श्री
स्कंद उवाच॥ ॥नवमे दिवसे मासे वर्षे चैव प्रभाकर॥ देवता पाशिनी नाम बालार्त्तिं कु
रुते भृशं॥ तत्र चिह्नं प्रवक्ष्यामि समासेन दिवाकर॥ ज्वरश्छर्दिर्गलोत्पीडा संकोचो नेत्र
योस्तथा॥ तर्जनीमध्यमायोगमयाभ्यां कुरुते भृशं॥ अन्नत्यागेन संतोषो मुखवेगं धोत्रिजा
यते॥ तत्र शांतिं प्रवक्ष्यामि पाशिनी प्रीतये रवे॥ पूर्ववत्पुत्तलीं कृत्वा द्वारावे संनिवेशयेत्॥

रक्तवस्त्रेण संवीतां रक्तसूत्रेण वेष्टितां॥ पूजयेद्रक्तपुष्पैश्च मंदाराद्यैः सुगंधिभिः॥ गं
५२ धाक्षैर्घनसारेण युक्तं चंदनमर्पयेत्॥ दशांगो धूपने धूपस्ततो दीपान् प्रकल्पयेत्॥ नववास
स्त्रवापूपान् पोलिकावान वोत्तमाः॥ उत्तमद्राक्षेनत्रंगोरपक्वान्नं अदग्धाद्यत्यर्पः॥ तावंतो
मुष्टिकान् दद्यात् धज्ञांचैव विशेषतः॥ नवप्रसूतिमानेन तंडुलोदनमुत्तमं॥ दध्याक्षी
रेणवा संयुक्तं नैवेद्यं परिकल्पयेत्॥ मध्यरात्रे बहिः ग्रामात् पश्चिमे तं क्षिपेद्बलिं॥ एताव
ताविधानेन नरो रोगमुक्तो भवेच्छिशुः॥ पंचानां पल्लवानां वै विदध्यात् पूर्ववत् क्रियां॥ ॥इति श्री
ब्रह्मयामले नवमादिने मासे वर्षे पाशिनीपीडाशमनं विधानं॥ ॥श्री स्कंद उवाच॥ ॥दश
मे दिवसे मासे वर्षे चैव दिवाकर॥ शक्तिरत्र महामारी राक्षसी घोररूपिणी॥ मृत्फकल्पं हरं ४३
मूलं विदधाति दिवानिशं॥ विष्टंभं कुरुते ऽत्यंसैंतं इक्षाकाशमतिक्षयं॥ तस्य शांतिं प्रवक्ष्या

॥इति श्री विधानमालायां ब्रह्मपुराणोक्तं गंगापूरहरं विधानं॥ ॥अथोत्पन्नस्य बालस्य मास
वृद्ध्यादिवृद्धिविधानानि॥ ॥लब्धजातके॥ मासि पूर्णे यदा जाते जननाद्वाछिशोस्तपौ॥ कार्यबु
द्धिविधानं तु मासे बालस्य वृद्धये॥ अन्यत्प्रबालकं सम्यक् पल्लवा द्रोणवारिणा॥ दीपैर्नीराज
यद्वस्त्रं नूतनं च समर्पयेत्॥ अपूपान् ब्राह्मणीभ्यः समर्पयेत्॥ ब्राह्मणान्भोजयेत् सम्यक् बालका
युर्विवृद्धये॥ अस्योत्पन्नस्य बालस्य सम्यगायुर्विवृद्धये॥ जन्मर्क्षे येदेवताप्रीत्यै तत्तत्यं सर्वं सम
र्पयेत्॥ इति मासिकर्तव्यं॥ संप्राप्ते द्वादशे मासि विधानांतरमादिशेत्॥ सुहृदः कारयेत् स्वकुलाः सुवृत्ताः
वंशपेटिकाः॥ निक्षयमोदकादीनां तत्र संचयं॥ आछाद्य नूतनैर्वस्त्रैः पूर्णा द्वादशपेटिकाः॥ जीव
त्प्रजा सुनारीभ्यः प्रति संपादायत् सुधीः॥ भक्त्या हृष्टचततः कुर्यान्मासवृद्धिमनुत्तमं॥ संततेः क्षेमवृद्ध्य
र्थं जननी पुत्रवत्सला॥ यदा षष्टिपष्टिनापूर्णा मंत्रात्मजन्मावासनो वासनो स्नात्वा शुभेदिने तेजेन पूज

शुक्लवस्त्रेण संवीतां शुक्लसूत्रेण वेष्टितां॥ पूजयेच्छुक्लपुष्पैश्च मंदाराद्यैः सुगंधिभिः॥ गं
५२ धार्घघनसारेण युक्तं चंदनमर्चयेत्। दशांगो धूपने धूपस्ततो दीपान्प्रकल्पयेत्॥ नववास
स्त्रवापूपान् पोलिकावान वोत्तमाः॥ उत्तमश्चाष्टनेत्रं गोरपक्वान्नं त्वदग्धाऽस्त्यर्पः॥ तावंतो
मुष्टिकान् दद्यात् ध्वजांश्चैव विशेषतः॥ नवप्रसृतिमानेन तंडुलौदनमुत्तमं॥ दध्नाद्री
रेणवास्तु युक्तं नैवेद्यं परिकल्पयेत्। मध्यरात्रे बहिः ग्रामात्पश्चिमे तं क्षिपेद्बलिं॥ एताव
ताविधानेन नरो रोगमुक्तोऽन्त्वेच्छिशुः॥ पंचानां पञ्चवानां वैविदध्यात्पूर्ववत्क्रियां॥ ॥इतिश्री
ब्रह्मयामले नवमदिने मासे वर्षे पातिनीपीडाशमनं विधानं॥ ॥श्रीस्कंद उवाच॥ ॥दश
मे दिवसे मासे वर्षे चैव दिवाकर॥ शक्तिरत्र महामारी राक्षसी घोररूपिणी॥ मृत्यकल्पं ज्वरं ४३
शूलं विदधाति दिवानिशं॥ विष्टंभं कुरुतेऽत्यंसं तं डिक्काकाशमतिसारं। तस्य शांतिं प्रवक्ष्या

मि बालानां हितकाम्यया॥ पूर्ववत्पूत्तलीं कृत्वा शरावे संनिवेशयेत्॥ स्नापयेत्सरितो वारि निश्च
दनेनानुलेपयेत्। पीतवस्त्रेण संवीतां पुष्पमालोपशोभितां॥ दशांगं धूपने धूपं महामायै प्र
कल्पयेत्॥ दीपास्तु पंच विज्ञेयाः तावंत्यः क्षीरषष्टिकाः। मुष्टिकाः पंच वैशास्ताः ध्वजाः पंच सु
शोभनाः॥ संस्कृतं सर्पिषा नक्तं तंडुलानां च पोलिकं। नैवेद्यार्पन्न्यसेत्तत्र शरावे सुम
नोहरं॥ तांबूलसहितं नानो दक्षिणासहितं तथा। दक्षिणार्पेन वंववस्त्रं रजतं नाक्तितो पि
वा॥ पक्वैर्वे पंच निर्युक्तं बलिं सर्वं समर्पयेत्। मध्यरात्राद्दवदिशं बलिं कुर्याद्दिनत्रयं॥
दक्षिणां दिशामाश्रित्य प्रक्षिपेन्नगराद्बहिः॥ मंत्रेणानेन मातर्जवदूपमाणेन ते मया।
तपाहि ॐ नमो रक्तवर्णक्षी रक्तपद्मनिनानने। रक्तौष्ठे रक्तदशने महामारि महाभये।
महाबले महाकाये महाभयनिवारके॥ अनेन बलिदानेन तुष्टा नवकशोत्तनौ व्या

धिनापी।इतिबालंरक्षरक्षप्रजेश्वरि॥ इमंमंत्रंसमुच्चार्यसर्वंबलिमुपाहरेत्॥ देमा
यबालकानां इनात्रकार्याविचारणा॥ ॥इतिश्रीब्रह्मयामलोक्तंदशमेदिवसेमासे
वर्षेमिशामारीपीडानामनंविधानं॥ ॥श्रीस्कंदउवाच॥ ॥एकादशदिनेमासेवर्षेचापि
दिवाकर॥ कालिकानामदेव्यत्रतत्पीडाजायतेशिशोः॥ ज्वररक्तप्रपमस्त्रावत्दारुणोगस्तदनं
तरं॥ मुखशोकोमशाम्नानिस्तस्यस्याच्चित्तविभ्रमः॥ रुदंतिसर्वगात्राणिकंपंतिचपुनःपुनः॥ ३५
त्रिवर्षाम्रुतिकस्यास्यात्कालिकाकोपसंभवा। तत्रशांतिंप्रवक्ष्यामिबालानांहितका
म्यया॥ पूर्ववत्पुत्तलींकृत्वाशरावेसंन्निवेशयेत्॥ गंगातोयेनसंस्नाप्यचंदनेनानुलेप
येत्॥ करवीरस्यपुष्पैस्तुपूजयेद्दूर्वादलैः॥ धूपयेत्तत्रकेशांश्चसर्पनिर्मोकसर्षपैः॥ व ४४
चालशुनफेनैश्चघनयुक्तैःससर्जकैः॥ दीपैस्तुपंचभिःस्यूर्यतैस्तुनीराजयेच्चतां॥ नैवेद्यंपा

यसंक्षीरंषष्टिकास्तिलमोदकाः॥ अपूपाःमुष्टिकाःपोलीःपंचपंचप्रकल्पयेत्॥ ध्वजाश्चपंचवि
डियाःशरावेसर्वमेवतत्॥ निवेश्यपुरदतंदेव्येकालिकायैनिवेदयेत्॥ मंत्रेणानेनसप्ताश्चव
क्ष्यमाणेनतेमया॥ ॐनमोघोररूपायेविकटेघोरदर्शने॥ त्राहिसर्वजगद्धात्रीबालंमुंचव
लिप्रिये॥ एवंविधंविधिंकुर्यात्पूर्ववत्पथ्यवत्क्रियां॥ एवंकृतेविधानेचरोगमुक्तिर्नविच्छिशोः॥
बलिःप्रदोषसमयेग्रामाद्दक्षिणतोबहिः॥ निधेयोमंत्रमुच्चार्यकरेणैवसदैतिना॥ ॥
इतिश्रीब्रह्मयामलोक्तंएकादशदिनेमासेवर्षेकालिकानामनविधानं॥ ॥स्कंदउवाच॥ ॥
द्वादशेदिवसेमासेवर्षेचैवदिवाकर॥ नामिनीनामदेव्यत्रपीडयत्यनिशंशिशुं॥ आदौज्वरंप्र
कुर्याच्चिन्दारोगंतदनंतरं॥ कासश्वासमतीसारंप्रलापंजंभणंतथा॥ कंपंतिसर्वगात्राणितथाज
ड्यंचनेत्रयोः॥ इत्थंनानाप्रकारेश्चविशिशूनांजायतेगदः॥ तत्रशांतिंप्रवक्ष्यामिबालानांहित

कारिणी॥ पूर्ववत्सूत्रजीन्हत्वा न्यासावेसंन्निवेद्ययेत्। गंधपुष्पाक्षता धूपदीपाश्च विविधामताः
नैवेद्यं विविधं चात्र नाम्निन्यैपरिकल्पयेत्। वस्त्रं छत्रं ध्वजास्सूत्रमोदनं पायसान्वितं। अपूपैः पा
यसैर्न्दारिपष्टिकानिश्च संयुतं। नैवेद्यं कल्पयेत्कृत्वा संध्याकाले निशामुखे। ग्रामादुत्तरतो देशे व
डरे वनसंशयः॥ इत्थं पंचदिने चैव कर्त्तव्यं रोगमुक्तये। मंत्रेणानेन सप्ताष्टमंत्रयेत्सर्वतो बलिं। गृह्ण बलिं४
णु बालस्य व्याधिं संहर संहर। पंचवक्त्रप्रसादेन प्रसन्ना नवनामिनी॥ एवं कृते विधानेन बा
लकः क्षेममाप्नुयात्। इत्येतत्कथितं सूर्य शांतिरुद्धबुध्नजातकं॥ ॥श्री सूर्य उवाच॥ ॥विनापापे
न बालानामज्ञानानां गदोभवेत्। तत्सर्वं पूर्वमेवत्वं उक्तवानसि षण्मुख॥ ॥इति श्री विधानमा
लायां स्कंदपुराणोक्तं नामिनीपीडाग्रामनं विधानं॥ ॥अथ पर्वंधाव्यतिषेकः॥ ॥नमः सकलक ४५
ल्याणन्ताजनाय पिनाकिने। नमो जन्मी निवासाय देवतायै गिरांनमः। प्रवालाद्रिप्रस्थ युक्तिनिच

यपर्याप्त वपुषे नमो विघ्नन्त्रेणी विघटनपरिष्टाय महसे। जगत्प्राद्युर्नाविस्थितिजयनिरासाय र
सक्रा२ चनाविनोदी कृताय प्रणतफलसिद्धिप्रतिभुवे॥ १॥ यदिंदिरानापपुरंदराद्यैराराधितं तत्क्रि
तरानतां गैः श्री चंडिकायाश्चरणारविंदं वंदाम हे तत्कुशलं देवतायाः॥ २॥ प्रत्यक्षट्चलत्कुंडलस्त न३
बकहृष्टगंडस्थलं महाईमणिमिरवलंमरकतांकुरश्यामं करोतु करुणां सदा कलिं॥ ३॥ चाप्षा त४
स्त्रंक्रमात्मनः किमपि मोहनं कपटशैशवं केशवं॥ ४॥ कांतेन्त्वतागसि रुषा पदर्षं ब्रुवाणा कंठी
र्ध४ त्ततार्थरसनाधी नियंत्रणेन। मौनेन नूनमधिगच्छतिया दृढाज्ञ सापार्वती हरवितकतनुः शि
पृथिवी३ वं च॥ ५॥ तनुते मदत्रः सोयं वाजोपि बालचरितश्रीः जगति डिताय द्विरूनां त्रिंशद्रक्षार न्न संक्ष
कं यं पं॥ ६॥ प्रयोगसार प्रमुखागमेषु प्रोक्तेषु शास्त्रेषु चसुश्रुता द्यैः॥ यदुक्तमेकत्र निबध्यते स्मि
न्ग्रंथे मया तत्र बलु बालतंत्रं॥ ७॥ बालरक्षार्थानि कर्माणि यंत्राण्यत्राभिधीयते। तदुच्यते गर्भको

वो३

ग्रान्प्रसवसमये निर्गताः। षोडशवर्षपर्यंतं बालत्वदेशेन जायंते। गर्भस्त्रावस्त्रीपुरुषं जन्मांतर
दुःकर्मवशात्तु जायते। येचैवं विधाःपुरुषा यास्तु स्त्रियस्ते सर्वे वंध्या व्यपदेशभाजो भवंति। अतो
वंध्यानामपि गर्भसंजननीय वंध्यानिषेकादिविधिः॥ प्रथममभिधीयते भविष्योत्तरे। श्रीकार्त्ति
केय उवाच॥ ॥पूर्वमिवत्वयाज्ञातं संति वंध्या न हि स्त्रियः॥ दोषैस्तु विविधाकारैर्यदि धातुविका
रजैः। वंध्यात्वं जायते तासां तानाचक्ष्व प्रयत्नतः॥ संतानसन्फलाद्इतिन्यायेन स्त्रीणां संतानं तावं स्त्रियः ५
येनयेन प्रकारेण संतानं भवति तेन तेन प्रकारेण वंध्यात्वं हरति। स स कर्तव्यः तथाहि। नारत
प्रवणं। विरजयात्राविधिः विल्वश्राद्धं भूत्यादिप्रकारैः स्त्रियः संतानं पश्यंति। वंध्यानिषेकं प्रस्तु
तं कथयिष्ये। भविष्योत्तरे॥ ॥ईश्वर उवाच॥ ॥ग्रहदोषान्प्रवक्ष्यामि शृणु पुत्र यथाईतः॥ ५६
द्वात्रिंशत्तु ग्रहाः प्रोक्ता नारीपीडाकराश्च ते। ग्रहाः कौमारिकाश्चान्ये तेपि तावंत एव हि। चतुःषष्टि

महारुद्रजपविधिः)

सहस्त्राणि एकैकस्य प्रविस्तरः। तेषां मध्ये तु मुख्या ये चतुःषष्टिस्तु नायकाः। दोषैर्वदिन्नानि
र्वक्ष्यग्रहा ग्रहंति योषितः। पात्रसंकरदोषेण निषिद्धेशयनात्तथा। आसनाच्च निषिद्धा
च्च निषिद्धान्नस्य भक्षणात्। निषिद्धकालाचाननो निषिद्धाचरणात्तथा। निषिद्धदेवनमना
न्निषिद्धव्रतपूजनात्। जारस्य संगदोषेण परवस्त्रविभूषणैः। जोकोच्छिष्टस्य संपर्केर्द्दीपछा
८५ यानिषेवणैः। केशोर्ध्वकेन संसिक्ता इनग्न नवयोषितां॥ चेटिकादि समाश्लेषात्पारुष्या
त्सर्वजंतुषु। एतैर्दोषैश्च ते सर्वे ग्रहाः पीडाकराः स्मृताः॥ प्रथमं पुष्पबाधा स्यात् गर्भस्थितं
त्यतः परं। पश्चात्स्त्रीरं तनो बालं नात्र कार्यविचारणा॥ ग्रहनामानि वक्ष्यामि दाबरी रेवती
न्द्रिवा। शुष्कला कंडनाचैव पूतकंडनिका तथा। गोमुखा चबिडाली च अजावक्त्रा चरोच
ना। कुक्कुटी पिंगलानाममस्य नासा तथापरा। स्कंदस्य ईस्तु पाचान्ये सर्वेषां नायकाः स्मृताः।

चतनः १ रजनी कंकणकर्णी च तापसी परिमोहिनी॥ रोहिणी चापधनदा [illegible] नकुला नृपा। चक्रःषषिः
समाख्याता नामतो बालमातरः। अर्ककोष्ठे तु कोणे तु स्कंदग्रह पंचमः। बालकांपीड नो२
काः सर्वे त्वतिमे बलिकांक्षिणः। बलिं दद्याद्विधानेन यतो मुंचंति नान्यथा। चतुरस्त्रं तु तत्क्षे
२४ त्रं कारयेत्प्रयतः पुमान्॥ त्रिंशद्विंशांसयेत्सूत्रं भूमिमानं त्वपन्नात्तनौ। हस्तैः षोडशभिः प्रो
क्तं क्षेत्रं क्षेत्रविचक्षणैः॥ तत्रांतरे प्रकर्तव्या नवकोष्ठाः सुशोभनाः। कोष्ठे कोष्ठे च सेनानी
रेकैकं पद्ममालिखेत्। अन्ये द्वे पंकजे वत्स संलिखेत्क्षेत्रतो बहिः। अन्ये द्वे पंकजे धीमान् क्षेत्र
मध्ये च षण्मुखः॥ क्षेत्रस्य पूर्वतस्त्वर्कं षोडशारं समालिखेत्। पश्चिमे संलिखेत्पद्ममष्टपत्रं सि
तं शुभं॥ सकेसरं सनालं च सपरागं मनोहरं॥ क्षेत्रस्य दक्षिणे पार्श्वे भैरवीं मूर्तिमालिखेत्॥ ५७
उत्तरे संलिखेद्धीमान् शुभ्रां मूर्तिमीश्वरीं मतः। कोष्ठेषु नवसु श्रीमान् प्रोक्तान्यग्रांनियानि मो॥

बृ१

तत्र तत्र लिखेत् दुर्गानि वचेताः पृथक् पृथक्। तासां नामानि वक्ष्यामि दुर्गाणां शृणु नंदन।
महालक्ष्मीं न्यसेत्पूर्वे चंडिकां वह्निकोष्ठके। कौमारी तु दक्षिणे कोष्ठे नैर्ऋते त्वामरीं। लिखे
त्। पश्चिमे पार्वतीं चैव वायव्ये मृगवाहिनीं॥ कौबेरीमुत्तरे कोष्ठे जंबूकां शिवकोष्ठके। म
ध्ये तु संलिखेद्धात्रीं चतुर्वक्त्रां चतुर्भुजां। मरालवाहिनीं देवीं लोकानां हितकारिणीं॥ प
द्मांतरे लिखेत् दुर्गां क्रमेण सुशोभनां। द्वे पद्मे क्षेत्रमध्ये च ये प्रोक्ते ते मया पुरा। नाम्ना
तु संलिखेत्तत्र दंपत्योः सुसमाहितः। द्वे बाह्ये पंकजे क्षेत्रात् तत्र गंगाद्वयं लिखेत्। क्षेत्र
चक्र ३ स्य पूर्ववक्त्रस्य षोडशारस्य षण्मुखः। कलाः षोडश चंद्रस्य तत्र तत्र समालिखेत्। पश्चिमे
ष्टदले देवान् इंद्राद्यान् संलिखेत्क्रमात्। गंधपुष्पाक्षतैर्धूपैर्दीपैर्नैवेद्यसंचयैः। सर्वेषां म
ध्यदेशे तु पूजयेन्मां समाहितः। पार्वती सहितं धीमान् वंध्यादोषनिबर्हणं। परितः क्षेत्र

तः पूज्या रेवत्यादियशान्कमात् । एवं हेते कृतिं कृत्वा सोपवासः शुचिव्रतः । पूजयेन्नाममं
त्रैश्च सर्वान्तान्त्रष्टपक्रष्टपक । अत्र वंध्यानिषेककालं वक्ष्यामि । पातनिर्मुक्तकाले तु स्ना
नं कुर्यात् ऋतुत्रेइति । तच्चाश्विन्यां कृत्तिकासु रेवत्यां प्राजापत्ये पुनर्वसौ । अश्विन्यां मघपुष्ये च मै
त्रवारेषु त्रेरवौ । तिष्यो भुवने च संशोध्य बलं चंद्रमसस्तथा । अपानिषेकस्थानानि वक्ष्ये
मातृस्थाने गृहे वापि त्रिपथे च चतुःपथे । उडीलिंके पतडागे वा नदीनां संगमे तथा । एकवृ
क्षे श्मशाने वा देवतायतनेपि वा । अपस्त्रीति पिनियमः । अष्टम्यां राजपत्नी तु मध्याह्ने तृ३
स्नापयेत्ततः । पुत्रकामां गवां तीर्थे विप्रपत्नी तु संगमे । मातृस्थाने शौर्तगियं श्मशाने मृत ५८
बालकं । काकवंध्यां वडीलिंकूपे वंध्यां पुष्करिणीषु च । अतिचार करीं नारीं पुरुषं गत
रितसं । स्नापयेच्च प्रयत्नेन शिवस्यायतने शुने । शुनं बाजवतः क्षेत्रं मितिन्यायेन गत

तृ३

रेतास्य पुमानपि स्नपनीयः । तत्र स्नपनविधिः । अव्रणान्कृतनांकं न्नानवकार्यास्तु शोत्तनाः ॥
प्रक्षालयेत्तु तान्तोये गंगैः सर्वाहिमाहितः । तंडुलोपरि संस्थाप्य चंदनेनानुलेपये
त् । सर्वेषु तेषु कुंभेषु पल्लवान्परियोजयेत् ॥ ते च पल्लवाः चूतोदुंबरयज्ञांगन्यग्रोधाश्व
त्थसंभवाः पल्लवाः सर्वकार्येषु कार्यसिद्धिविधायकाः । हिरण्यं प्रक्षिपेत् पूर्वस्मिन्कुंभे षष्ठः पं
चवस्मृतः । एकस्मिन्कलशे सर्वे निधेयं वारिणा सह । द्वितीये पंचगव्यानि चंदनं तु तृती
यके । चतुर्थे इंमरजतं पंचमे सर्वमौषधं ॥ षष्ठे तीर्थांबु संन्यस्य सप्तमे सर्वधान्यकं ॥
अष्टमे फलपुष्पाणि नवमे मांचविन्यसेत् । मातृकानामष्टरैः सह अनेन विधिनामं
त्रीत्वा निषेकं प्रकल्पयेत् । एवं कृते विधाने च वंध्यापत्यमवाप्नुयात् । अबीजा बीजमाप्नो
ति स्त्री वाप पुरुषोपि वा । अतिचारकृतं दोषं विधिरेष प्रणाशयति । अनेनैव प्रयोगे

उमा मिति तिशिव नामा द्वाराणि भूर्जपत्रे संलिख्य विन्यसेत् ३

नमंत्रपूतेनसुव्रत।दुर्भगास्तुनराऽपि कन्याप्राप्नोतिसत्पतिं॥ दैवीनिश्वापस्पृष्टानांवाला
नांयइपाडने।क्रियामेतांनरःकुर्यात्साधकस्तुयशस्करीं॥सत्वार्योदक्षिणांदद्यान्नगर
वाप्यहाटकं।हस्तप्रवरपयानंवामुकुटंकुंडलेतथा॥धनंधान्यंहिरण्यानियेरक्तसंतुष्य
तिगुरुः।तेनतुष्टेनतुष्यंतिदेवतामातरोग्रहाः॥अथाभिषेकाभिधानमंत्राः।ॐरौं।हौंसौं
ष५ वौफट्।मुख्याभिषेकमंत्रोयंततश्चसमुद्रज्येष्टाइत्यादिसर्वमंत्रैरभिषेकविधिः।निर्बी
जस्यपत्कः।श्रींसांफट्रैंस्वाहा।सर्षपैरवहुतैर्वादिहेसंताडयेत्स्त्रियं।पुरुषंवायइष्टहीतं
द्विगुणंवा।एवंकृतेविधानेतुनारीवंध्याप्रसूयते॥ ॥इतिनृसिंहभट्टविरचितायांवि
धानमालायांभविष्योत्तरोक्तंवंध्याभिषेकविधानं॥ ॥ईश्वरउवाच॥ ॥अथघटिका ५९
स्नानं॥शृणुषण्मुखवत्सत्वेनस्नानंघटिकयापरं।धारयंतिचयेवत्सघटिकांदैवनिर्मितां॥

तेषामर्थस्वकामस्यसौभाग्यंवृद्धिरेवच।पूर्ववन्मंडलंकृत्वागौरींतत्रप्रपूजयेत्।पुत्र
वित्तानुसारेणविधिनापरिपूजयेत्।ईशान्यांदिशिसंस्थाप्यघटिकांमधुपूरितां।पु
ष्पमालोपशोभाढ्यांरक्तसूत्रेणवेष्टितां।हिरण्यंनिक्षिपेत्तत्रनारिकेलंस्थापयेद्बुधः।
वस्त्रेणचसमाच्छाद्यगंधंतत्रैवनिक्षिपेत्।कुंकुमागरुकर्पूरैश्चंदनेनानुलेपयेत्॥
उशीरंचंदनंमुस्ता।पुत्रकेशरशतावधाः।तथाचामलकीदूर्वाक्षिपेद्गोरोचनांबुधः।शत ६
६४ मष्टोत्तरंकृत्वागौर्याचैमूलविद्यया।अभिमंत्र्यघटींगौरीं।लिंगमंत्रेणवाबुधः।शताष्टा
धिकमथाथोघटिकामभिमंत्रयेत्।ततोभिषेकंकुर्याद्वैयोषितोवानरस्यवा।अभिषिक्ता
भवेन्नारीनरश्चविधिवत्गुह।अपुत्राजनयेत्पुत्रंजीवद्वत्साभवेत्ध्रुवं॥एतद्देवविधा
नंडपदिकुर्यात्जितदुर्विला॥पुत्रंप्रसूयतेसाजमहावीर्यपराक्रमं।राजाविजयमाप्नोतिहे

तच्छ्रुत्वाचसंगरे।याचरूपवतीकन्यावरंनलभतेयदा॥साप्यनेनविधानेनरूपवंतंनरं
लभेत्।येनयेनइच्छाचेनघटिकांकारयेन्नरः।तस्यतस्यइच्छावस्यफलमाप्नोत्यसंशयं॥
यत्तवोक्तंमयापोकिंचित्संक्षेपेणषडानन।तत्सर्वंमूलमाश्रित्ययत्नेनैवकारयेत्।मूलमा
श्रित्ययथोक्तंमूलमंत्रेणेत्यर्थः।घटिकायाःपरंश्रेयोनास्तिनास्तिषडानन।धर्मार्थकाममो
क्षेषुघटिकास्नानमुत्तमं।घटिकांधारयेद्यस्तुनरःप्राप्नोतिवांछितं॥अपुत्रोलभतेपुत्रंनि
र्धनोलभतेधनं॥प्रधानपुरुषोबुद्धिंपतिंप्रोषितभर्तृका॥ ॥इतिश्रीभविष्योत्तरोक्तंघ
टिकास्नानविधानं॥ ॥भविष्योत्तरेकृष्णयुधिष्ठिरसंवादे॥ ॥युधिष्ठिरउवाच॥ ॥अ
थरुद्रस्नानविधानं॥ ॥रुद्रस्नानविधानंनःकथयस्वजनार्दन॥सर्वविघ्नोपशमनंसर्व ५०
शांतिकरंपरं॥ ॥श्रीकृष्णउवाच॥ ॥अगस्त्योमुनिशार्दूलःसुखासीनमुवाचह॥अगस्त्य

उवाच॥ ॥सर्वज्ञोसिकुमारत्वंप्रसादाच्छंकरस्यच।स्नानंरुद्रविधानेनब्रूहिकस्यकथं
भवेत्॥ ॥स्कंदउवाच॥ ॥मृतवत्साचयानारीदुर्भगारूपवर्जिता।यामृतेकन्यकावं
ध्यास्नानंमासांविधीयते॥अष्टम्यांचचतुर्दश्यामुपवासपरायणा।कृष्णकौचतुर्थे
क्षिप्राप्तेसूर्यदिनेतथा।नद्योश्चसंगमेकुर्यान्मशानेद्योविशेषतः।शिवालयेगवांगोष्ठे
विविक्तेवागृहांगणे।आहिताग्निंद्विजंशांतंधर्मज्ञंसत्यवादिनं।स्नानार्थंप्रार्थयेद्देवंनि
पुणंरुद्रकर्मणि।ततस्तुमंडलंकुर्याच्चतुरस्त्रमुदक्प्लवं।बद्धचंपकमालंचगोमयेना
नुलेपयेत्॥मंडपभूमिंसमार्जयेदित्यर्थः।तन्मध्येश्वेतरजसासंपूर्णंपद्ममालिखेत्॥
मध्येतस्यमहादेवंस्थापयेत्कर्णिकोपरि।दद्याद्दलेषुनंद्यादीश्चतुर्षुविधिपूर्वकं।नंदी
भृंगीमहाकालःकुबेरश्चचतुर्थकः।इंद्रादिलोकपालांश्चदलेष्वन्येषुविन्यसेत्।देवी ५१

विनायकं चेति स्थापयेत्तत्र नावतः। दत्वार्घं गंधपुष्पैश्च धूपैर्दीपैर्गुडोदनैः। नैवेद्यैर्नानावि
धैर्दद्यात्फलानि विविधानि च। चतुःकोणेषु कलशान् शृंगारं स्तवनाधिकान्। विन्यसे
त्तेषु कुंभेषु सप्तपुष्पाश्च सर्वौषधीः। मंडपस्य चतुर्दिक्षु दद्याद्भूतबलिं ततः। आग्नेय्यां
दिशि कर्तव्यं मंडपस्य समीपतः। अग्निकार्यं चिते कुंडे पुष्पपत्रैरलंकृते। लवणं सर्पि
षायुक्तं सितया मधुना सह। मानस्तोकेन मंत्रेण जुहुयात्प्रयतः शुचिः। नवग्रहमखे जाते त्र्या
दौ पश्चादयं विधिः। द्वितीयस्याग्निकार्यस्य कर्ता च ब्राह्मणो भवेत्। रुद्रजाप्यस्तदाचार्यः
सितचंदनचर्चितः। पीतवस्त्रपरीतांगः सितमाल्यविभूषितः। शोभनः कंठसूत्रेण स्व
कर्णविभूषणः। मंडपस्य समीपस्थो जपेद्रुद्रान्विमत्सरः॥ यावदेकादशगतां पुनरेव जपे ५२
त्तान्। एवं मंडलवत्कार्यं द्वितीयं मंडलं शुभं॥ तस्य मध्ये तु सा नारी श्वेतपुष्पैः समावृता।

श्वेतवस्त्रपरीधाना श्वेतगंधानुलेपना। सुखासनोपविष्टा च आचार्ये रुद्रजाप्यर
अर्क २ ता। अभिषिंचेत्ततश्चैनां कर्मपत्रपुटांबुना। चतुःषष्टिश्चैनेव रुद्रेणैकादशेन तु। स्नातानि ५२
सप्तवर्णानां चतुर्भिरधिकानि तु। वर्णानामिति ऋचां चतुःषष्टि ऋचां। एकादशत्वो ने
पठितानां च रुद्राणां अच्छिद्रेणेति मंत्रेण स्नानार्थं विनिवेशयेत्। अश्वस्थानाद्गजस्था
नात् वल्मीकात्संगमात् ह्रदात्। वेश्यांगणात्तु गृहात् गोष्ठाददानीय वै मृदः। सर्वौषधी
रूपानीय नदीतीर्थोदकानि च। एवं तत्संक्षिप्य कलशे शिवसंज्ञे सुपूजिते। आपादतलके
शांतं चादिदेशो विशेषतः। सर्वांगं स्नापयेद्रुद्रास्सुशीलां कांचिदंगनां। रुद्रान्तिजाप्यत्तन्वि
द्वान् स्नापयेत्कलशोदकैः। सर्वतोदिक्षु रक्षाग्रस्थैः पश्चाच्च कलशोदकैः। एवं कृत्वा स्नातकाय
यद्दद्यात् गां कांचनं तथा। ईश्वरे वात्र निर्दिष्टा दक्षिणा गौः पयस्विनी॥ ब्राह्मणानां तपान्येषां

स्वशक्त्यामुनिपुंगव।गोवस्त्रकांचनादीनिदत्वासर्वान्क्षमापयेत्।एतेनोक्तेनविप्रेंद्ररुद्र
स्नानेननामिनी।सुभगाकांतिसंयुक्ताबहुपुत्राचजायते।सर्वेष्वपिचमासेषुब्राह्मणा
नुमतेशुभे।तस्मादवश्यंकर्त्तव्यंस्त्रियापुत्रार्थमेवच।यास्नानमाचरतिरौद्रमितिप्र
सिद्धंश्रद्धान्विताद्विजवरानुमतेचनारी।दोषान्निहत्यसकलांश्चशरीरजाताजोतन्तुःप्रियान्
वतिनारतजीवपुत्रा॥ ॥इतिश्रीविधानमालायांतद्विष्णोक्तंरुद्रस्नानविधानं॥ ॥अथातो
देशनगरग्राममहाव्याधिशमनविधानं॥ ॥यदासर्वोपद्रवोत्तिजायतेराजाऽवज्ञयाब्रा
ह्मणान्द्वेष्टिदेवान्नपूजयतिगुरून्नमन्यते।प्रजांपीडयतिचेद्राजासर्वदेशेषुतदासर्वनग
रुद्र रेषुग्रामेषुसर्वोपद्रवाजायंते।आखुमूत्फककराःकालस्फोटादयोमहाव्याधयोभवंति॥ ५२
तेषांशांतिविधानंब्रवीमितच्चाद्रकर्मविपाकसंग्रहे।शिवालयेषुविष्णुगृहेशक्तिभैरवगणे

शीश्वरमुखेषुसर्वेषुदेवतायतनेषुसहस्रकलशाभिषेकंकुर्यान्नित्यमेकं।यद्देवायतनंतल्लिं
गेमंत्रैस्तिलाज्यचरुणायुतहोमंकुर्यात्।प्रत्येकंयथाविधिजापपूर्वकंगोदानंभूमिदानं
हिरण्यदानंकंबलकमंडलुछत्रचामरयानदानानिकुर्यात्।अन्नदानंब्राह्मणपूर्वकेषु
सर्वप्राणिषुकुर्यात्।एतत्सर्वंराजविषयं।तथाहि।सामान्यग्रामेषुशक्त्याजपहोमब्राह्मण
तर्पणंकुर्यात्।महाव्याधिशांतये।तदुक्तंब्रह्मांडपुराणे॥ ॥ग्रामेचेद्दुर्भूतंयस्मिन्दुरितास्सु
नदा५ र्यदानराः॥प्राणिच्छिद्राणिजायंतेराजाकुर्यात्तुशांतिकं।एवंकृतेविधानेतुग्रामशांतिर्न
चेद्द्विज।नश्यंतिव्याधयःसर्वेसुरायतनपूजनात्॥ ॥इतिश्रीब्रह्मांडपुराणोक्तदेशन
गरसामान्यग्रामोपद्रवंजनपीडाशमनविधानं॥ ॥अथजनमारशांतिः॥ ॥जनमारसमु
त्पत्तिंवक्ष्यामिचसशांतिकं।यदालोकःसमाविष्टःपीडनैर्बंधनैःप्रजाः।क्लेशयत्यनिशंराजाः

क्लेशयत्यनिशं राजा न च धर्मं समाचरेत्॥ तथा च काशीखंडे॥ साग्रं श[illegible]नं योजनानां
देशः सर्वो निकृन्त्यते॥ घोरै राजकृतैर्दोषैः प्रजानामपि सुव्रत॥ यदि प्रजा नेवश्यास्युस्तस्य पा
पपरायणाः॥ क्रोधलोभसमाविष्टाः साध्वाचारविवर्जिताः॥ पूज्यन्ते नैव वेदज्ञा वेदा विप्रास्तपा
पि हृन्॥ नास्वधर्मानि स्कृतास्तु ततो रुद्रः प्रकुप्यति॥ अतः कोपि स जगवानुकूता नो प्रिय एव हि।
कुरुते स विकारांश्च उत्पातांश्च पृथग्विधान्॥ ताराग्रहोल्का रुद्रांश्च राहुकेतूग्रदर्शनं॥ उदयास्त
ब४ मये चंद्रसूर्यबिंबविपर्ययः॥ विपर्ययग्रहे नक्षत्रे तो ह्व विपर्ययः॥ विकारान्मृगसिंहानां विकल्पानो
त्वणानि चान् भूमिकंपो पतनिर्घातिःशातो ह्लानि जविक्रिया॥ अतिवृष्टिरनावृष्टिस्तथैव ऋतुविपर्य
यः॥ दृष्टयोऽदुग्धदानाश्च रोगयुक्ताभवंति च॥ एतद्राजकृतं पापं विषयेनात्र संशयः॥ ब्रह्मवैवर्ते॥ ५३
राजा च कुरुते पापं ब्रह्महत्यादिदारुणं॥ यं राजानं इतिहस्मा स्त्रीवधं कुरुते नृशां॥ तेन रा

ष्ट्रं हि सा पृथ्वी मनसा त्वयमाक्रयात्॥ कालस्फोटादयो दोषा वै घाविज्ञातलक्षणाः॥ अनवत्पोष
धैर्नैव मंत्रतंत्राणि चैव हि॥ आशुमृत्युकराश्चैव लोकानां रोगकारिणः॥ रुद्रप्रकोपजास्तस्मा
ज्जनमारोतिजायते॥ तस्मात्प्रसादयेद्देवं पार्वतीवल्लभं शिवं॥ गाणपत्येन विधिना अपर्वशि
रसा तथा॥ यामलेनैव विधानेन कुर्याद्देवप्रसादनं॥ रुद्रसूक्तं तथा गाथा विष्णुसूक्तं तथैव च॥ ब
ह्मपद्मारान्विविधान्त्वरेषु निवेदयेत्॥ आवाहयित्वा सगणं रुद्रं गौरीसुतापतिं॥ त्रिवर्षे
विधिस्तत्र कार्यो नान्यत्र वेश्मनाः॥ त्र्यंबकेण मंत्रेण होमं तत्र प्रकल्पयेत्॥ समिधो ब्र
ह्मवृक्षस्य कुर्यात्सहस्रकं॥ साज्यं च पायसं चैव सहस्रं जुहुयात्सुधीः॥ सहस्रं बिल्वपत्रै
श्चाल्वविच्छिन्नैर्द्विजोत्तमैः॥ जुहुयात्सहस्रं पष्टिनिस्त पाच तिलसर्पिषा॥ सर्वं स्विष्टकृतं चैव जपेच्छां
तिं द्विजोत्तमः॥ ततोभिषेचनं नृणां सर्वेषामपि कारयेत्॥ आचार्यब्रह्मऋत्विग्भ्यो होमदानं प्रदापये

त्।गामाचार्याय साधौं च सवत्सां च पयस्विनीम्। सदक्षिणां सवस्त्रां च सालंकारां सताजनां।
नामगोत्रं समुच्चार्य प्रीं मुखायनिवेदयेत्। वक्ष्यमाणेन मंत्रेण दाता चैवोत्तरामुखः। धेनुस्त्वं
पृथिवीरूपा सर्वपापक्षयंकरी॥ जनस्यास्य च सर्वस्य मृत्युं नाशय शोभने। इति धेनुदान
मंत्रः॥ सप्तधान्यानि विप्रेभ्यो दद्याद्राजा समाहितः। भूमिदानानि भूरीणि विविधं वस्त्ररंगमा
न॥ दद्याच्छकटदानं च धुर्यान्योसं नियंत्रितं। ततश्च रुद्रसदने गत्वा गौरं सुसंस्कृतं। दीपैर्नीरा
जयेद्देवं॥ दशांगेन च धूपेन धूपयेत्प्रयतः पुमान्। शतपत्रादिपुष्पाणि पूजनार्थं प्रतिपादयेत्।
विलेपयेच्चंदनेन श्वेतं सकर्पूरं सुसंस्कृतं॥ नैवेद्यैस्तोषयेच्छिवं। तांबूलं दापयेद्दिव्यान् नविणांक
नकादिना। एवं संपूज्य देवेशं प्रार्थयेत्सज्जनो नृपः। तत्र प्रार्थनामंत्रः॥ देवदेव महादेव सर्वपापविनाश ५४
न। जनमारकृतां पीडां संघोनाशाय शंकर। इति संप्रार्थ्य देवेशं कुर्याच्चैव प्रदक्षिणां। जपेत्शैवीं

स्तुतिं धीमान् श्रद्धया परया युतः। प्रसादितस्ततो रुद्रो जनमारो निवर्त्तते। ब्राह्मणान् भोज
येत्पश्चात्सहस्रशत संख्यया। रुद्रार्चनं गवां दानं गायत्री जप उत्तमः। निवारयति विघ्नानां
राशीन्नात्र विचारणा। शिवपूजा शिवध्यानं शिवाराधन सत्क्रियां। ये कुर्वंति सदा नित्यं ते
विघ्नान्नाशयंति वै। यो राजा मंगलाविष्टो धर्मकीर्त्तिपरायणः। न त्वेतस्य राष्ट्रेषु जनमा
रः कदाचन। उपवासेन भूपालो विधानमिदमाचरेत्। सत्कार्यः सचिवः श्रीमान् सपुत्रः
धै ४ सपुरोहितः। धर्ममंगलगीतैश्च नृत्यैश्च विविधैस्तथा। घंटया दीप्तवाद्यानं हृष्टपुष्टजना ह
तः। तथाच गर्गवचनं। उपोषितो नृपः स्नातः शुक्लवस्त्रसमावृतः। आत्मरक्षाविधानंश्च
शांतिमेनां समारभेत्॥ ॥इति गर्गेणोक्तं जनमारशांतिविधानं॥ ॥अपस्तुमल्पता
काविधानं॥ ॥तथाच गरुडपुराणे॥ रामगरुडसंवादे॥ यदा रामस्त्रिकूटाद्रौ नागपा

शैस्तु पीडितः। नारदस्य वचः श्रुत्वा सस्मार विनतासुतं॥ तदासौ काश्यपी वीरः समागत्य
रणांगणं। प्रणाममकरोत्तस्मै रामायामिततेजसे॥ निवार्य पन्नगास्त्रं तन्मेघनादसमीरितं।
दृष्ट्वा रघुवीरं तं ससैन्यं च सलक्ष्मणं॥ उवाच प्रणिपत्याथ रामं भक्तैर्द्रखगेश्वरः॥ ॥
श्रीगरुड उवाच॥ ॥आश्चर्यमिदमत्यंतं यद्भवानस्मरद्धि मां॥ सति वीरे महारौद्रे सगणे
च हनूमति। सुग्रीवे च नले नीले सुषेणे जांबवत्यपि। अंगदे दधिवक्त्रे च तारे च तरलेन पा॥
मैंदे सति महावीरे किं मेऽत्रास्ति प्रयोजनं॥ ॥राम उवाच॥ ॥तव कीर्तिमुपागम्य विद्रुताश्च
भुजंगमाः॥ एतेषु सत्सु वीरेषु किमु सैन्यमपीड्यत्॥ ॥गरुड उवाच॥ ॥राम देव महाबा
हो कपीनां चरितं शृणु। आत्मनोपि समाविष्टा माकुरुष्वात्र गर्हणं। साक्षात्त्वं भगवान्विष्णु ५५
र्लक्ष्मीस्तु जनकात्मजा। सौमित्रिः फणिराजोऽयं रुद्रांश्च कपयः स्मृताः॥ सुग्रीवो वीरभद्रोऽयं

त्वं तु रेषमतो नलः। विद्धि द्वाशरपे नूनं गिरिशो नील एव च। महायशास्तु षेणोऽयं जांबवां
श्चाप्यजे कपात्॥ अहिर्बुध्न्योंऽगदो वीरो दधिवक्त्रः पिनाकधृक्। अयुताजित्त्वयं तारः स्थाणु
त३ श्च तरलो मतः॥ मैंदो त्वर्गतनुः साक्षाद्धनुमान्भगवान्स्मृतः। अवतेरुर्महारुद्रास्त्व
दर्थे रघुनंदन। अवसन्सर्वदेशेषु नानापर्वतमूर्द्धसु। धृत्वा च कपिरूपाणि अवतेरुर्महीत
ले। सर्वेऽपि कपितां प्राप्ताः कारणं तन्ब्रवीमि ते॥ पुरा देवासुरैः सिंधोर्मथिता न्त्वाधयो भव
न्॥ नानापीडाकराः सर्वेऽद्भुता विस्फोटकादयः। नैरेव व्याधिभिः सर्वं पीडितं जगतीतलं॥ रु
षयोपि च पाजाश्च ब्रह्माणं शरणं ययुः। ऊचुश्च जगतां नाथं ब्रह्माणं कमलोद्भवं॥ त्वाहि त्रा
हि जगन्नाथ व्याधिभ्यो जगतीमिमां॥ पीडितां दारुणैर्दोषैर्हरोधैश्च मरुल्वणैः। त्रिदोषै
र्जर्जरीभूतां विन्नमे व्याकिलीकृतां। औषधानि न सिध्यंति मंत्रयंत्राणि चैव हि। पीडयंति

महारोगाः मानवानां दुःखकारिणः। एतत्ते कपितं सर्वं ब्रह्मंश्चतुरानन। आश्वास्य सकला
न्नैरोग्यान् निर्ययौ कमलोद्भवः। हनूमत्स्थाने महादिव्यं भुक्तिमुक्तिप्रदं नृणां॥ हनूमानानम्यदे
वेशाद्ब्रावाच चतुराननः॥ व्याधीनां चेष्टितं सर्वं हनुमानां पुरतः सुधीः। तच्छ्रुत्वा ब्रह्मणो वाक्यं
हनुमाएकादशात्मनः। समाश्वास्य विरंचिं ते वीरनादयः सुराः। संनूयवान रेवंशो स्य सुग्रीव
प्रमुखाद्भ्ये। पर्यटन् पर्वताग्राणि मंडलानि च सर्वशः। नादयंतो जगत्सर्वं बुबुकारैः सुदारु
णैः। स्वेडितैः क्रीडितैस्तेषां व्याधयो नाशमाययुः। ततस्तु सकलं दृष्ट्वा विरंच्यं चेष्टितं महत्।
तुष्टो भगवान्ब्रह्मा ददौ तेभ्यो वरान् बहून्॥ ॥ब्रह्मोवाच॥ ॥युष्मास्तु कपिमुख्यास्तु मृ
तसंजीविनी कला। आज्ञास्तु सर्वजगति वेगोस्तु मनसस्समः। युष्मान् स्मरंति ये मर्त्याः पू ५६
जयंति नवतन्तूः। पताके विविधास्तत्वा चित्रतोरणसंयुताः। नृत्यगीतोत्सवाद्यानि रवाद्यानि जे

ता का १

ये १ ह्यपेहीर्च सर्वशः। युष्मानुद्दिश्य ये मर्त्या यैः कुर्वंति कृतात्मनो। हविःपुण्यतमं हन्ता स्ते
षां सिद्धिर्न संशयः। पायसेनैव साज्येन तथैव तिलसर्पिषा। यजंति नवतां ह्वं दंते यांति प
रमं पदं। पठंति रुद्रम रविजं गायत्री चैश्वानरास्तथा। मानस्तोके न इति वा मनो ज्योतिरपा
पिवा। नवतां यजनं विन्नं गायत्र्या वा प्रकीर्त्तितं। एवं ये मानवा लोके विधानं परिकुर्वते। व्या
धिमुक्ताः सुखासीना देहांते न यांति यमक्षयं॥ ॥गरुडउवाच॥ इति रामपुराद्वृत्तं कपीनां
कपितं मया। तेषु हनुमत्सु सर्वेषु हनुमान् हनुनायकः। विधानं तत्र कर्त्तव्यं यत्रास्ति हनु
मत्तनुः। गोपुरे हनुमन्मूर्त्तिः शिलायां च प्रतिष्ठिता। तत्र सर्वं प्रकर्त्तव्यं विधानं सुरसत्तम॥
श्रीरामउवाच॥ ॥केनकेन प्रकारेण क्रियते कपिपूजनं। पताकाः कीदृशीस्तत्र क
र्तिकार्या विहंगम॥ हवनं कतिसंख्याकं किं द्रव्यं को जपो त्रवे। किं दानं केन विधिना तस्म

माघस्य सुव्रत॥ ॥श्रीगरुड उवाच॥ ॥ज्ञनमारे समुत्पन्ने ग्रामे वा पत्तने पि वा॥ अनन्तवत्यौष नप२
धैनैवमणिमंत्रपुरस्क्रिया॥ विधानं तत्र कर्त्तव्यमेकादश्यां तिथौ रवौ॥ प्रातःकाले समुत्थाय
ततः शौचो द्विजोत्तमः॥ स्नात्वा गंगाजले पुण्ये तिलामलकसंस्कृतः॥ एकादश द्विजान् श्रे
ष्ठान् सोपवासान् निमंत्रयेत्॥ जागरं तैस्तु कर्त्तव्यं सर्वोपस्करसंयुतः॥ आदौ तु मंडपं क्ल
प्तास्ते वस्त्रापि सुशोभनं॥ पुष्पमंडपिकां मध्ये मंडपस्य प्रकल्पयेत्॥ पंचामृतेन स्नपनं रु
द्रस्य परिकल्पयेत्॥ ततस्तु कुसुमैः पूजा शतपत्रादिभिः शुभैः॥ चंदनं च सकर्पूरं देयं रु
द्रानुलेपने॥ दत्वांगं धूपमादद्याद्दीपैर्नीराजयेत्ततः॥ नैवेद्यं विधिवद्द्यात् तांबूलेन च
संयुतं॥ एकादश पताकास्तु पदेषु परिकल्पयेत्॥ यथा यस्मै समुद्दिष्टा पताका च सुशो ५७
भना॥ तस्य तस्यैव रूपं तु तस्यामेव प्रकल्पयेत्॥ एवं कृते विधाने च स्थापनाकेषु तोरणे॥ स१

प्रातःकाले च सासाश्च जागरांते द्विजोत्तमाः॥ ततः स्नानानन्तरं तोये होमं कुर्युः समाहि
ताः॥ पायसेन तु साज्येन तथैव तिलसर्पिषा॥ अयुतं हवनं कृत्वा ततः पूजां प्रकल्पयेत्॥
पताकां हनुमद्द्वारे तस्यैव च निक्षपयेत्॥ राजद्वारे तु सौग्रीवीं सोरवेणीमापणे न्यसेत्॥
नलनील पताके तु शिवद्वारे तु विन्यसेत्॥ राजद्वारे गदस्यैव तारस्य तु रत्नवास्य॥ जां पुर४
बवन्मैंदयोर्ग्रामाद्दक्षिणोत्तरयोर्दिशिः॥ दधिवक्त्रपताकां च नैरवस्यालये न्यसेत्॥ द्वार
द्वारे५ देशे जनानां च कृत्तमूर्तिर्विलेखयेत्॥ चित्रिताः पंचवर्णैश्च यामं सूत्रैश्च वेष्टयेत्॥ मत्यई
कारयेद्विप्रान्नक्त्या ब्राह्मणतर्पणं॥ दद्याद्वस्त्राणि ऋत्विग्भ्यः सालंकाराणि नृपतिः
छत्राणि करपत्री च पादुकाश्च विशेषतः॥ धेनुं पयस्विनीं दद्यादाचार्याय सदक्षिणां॥ वस्त्रकां२
सदक्षिणां सवस्त्रां च सालंकारां गुणान्वितां॥ ब्राह्मणे महिषीं दद्यात्तथैव पृथिवीपतिः॥
श्राल्लणेभ्यो मठं १

अन्ये न्योब्राह्मणेभ्यश्च सप्तधान्यानि भूरिशः। लवणं सघृतं चैव तैलं च सगुडं तथा ॥ ग्रा
म्यारण्यानि भूरीणि द्रव्याणि विविधानि च। एतत्कृत्वा विधानं तु राजा क्षेममवाप्नुयात् ॥
रोगरवात्र निर्दिष्टो जपः सर्वसुलक्षणः। अर्घविवाडनं वास्तं मानस्तोकइतिस्फुटं। एत
द्धि गुर्जरदेशे प्रसिद्धं ॥ ॥इतिविधानमालायां इन्द्रमत्स्यतोकाविधानं ॥ ॥अथगाम्पोक्तिं गो
शांतिविधानं ॥ व्याधयस्ते दश प्रोक्ता गवां वक्ष्यामि तानि ह। उद्विग्नो रुदयया डीपतनो मो
इनस्तथा ॥ गोलिंगः पूतनाश्चैव दारुणः खुरकस्तथा। कालिजो लंबकर्णश्च कर्णच्छिपस्त
था परः ॥ एकादशैते गृष्टीनां व्याधयः परिकीर्तिताः। तेषां रूपं समुत्थानं याहशांत द्रव्य
कं। शांतिकर्माणि निर्दिष्टं याहशं तत्र निर्मितं। रात्रौ गोष्ठेषु या गावो वित्रसंतियतस्ततः। उ
द्विग्नोनामस व्याधिस्तत्र चैव प्रजायते। प्रजायतश्शांतिप्रकर्षं दर्शयिति। अक्षप्रमोचनं ५८

४ पदिजिक्का तिनिर्निलाग वांचैव प्रजायते। तृणग्राहे प्यशक्तं विंघा तं नकलिंगकं। यासां नेत्राणि स्त्राविनि स्त्र ४

यत्र कुर्वंति च व्रजंति च। रुद्रोगं तं विजानीयाद्गोषु रोगं विचक्षणः। गोणितं यत्र कुर्वंति
पुरीषं मूत्रयंति च। प्रवेपमानाः स्खलिताः पवनो व्याधिरुच्यते। फुंवार वांश्च कुर्वंति तिमं
डलानि तथैव च ॥ उत्पतंति पतंत्येव मोहनं तं विदुर्बुधाः ॥ यासां मूत्रं पुरीषं वा रक्तो न्नवत्प्र
वर्त्तते ॥ यदुतं ष्ठतनं विद्याद्गोषु रोगं समुत्थितं। वर्त्ति सलिलं बकुम शक्ति [illegible] विलीयंते तं विद्या
भा ५ द्दारुणं गदं। उत्कोथ यत्र मते घ्रा — लेभी घ्रातिमारुतं ॥ कर्णच्छिपइति ज्ञेयो गोषु व्या ना ५
धिर्विचक्षणैः। खुरेणयानशक्नोति याउंपंगुवदाउरा। खुरकं तं विजानीयात् गोषु रो
गं समुत्थितं। यासां स्फुटंति गात्राणि रोमाण्यूर्ध्वी नवंति च। उक्तो कर्णेश्च लंबंते विद्यात् तं लं
बकर्णकं। इत्येते व्याधयो दृष्टा अन्ये पि विविधास्तथा। गर्गेण मुनिना तेन तस्ये शांति वि
धानकं ॥ आदौ तु कारणं तेषां व्याधानां वक्ष्ये निश्चयात्। मुंडो नग्नः कषायवसना मुं

अथ परिचारकाः॥ व्यंगांश्च स्खलितांश्चैव दूरतस्तान्विवर्जयेत्॥ चित्रांश्च कुष्ठयुक्तांश्च तथा
पापकृतानपि॥ अंतेवसायिनश्चैव दूरतस्तान्विवर्जयेत्॥ छिद्रांश्च कुष्ठयुक्तांश्च तथा पापकृ
तानपि॥ अंतेवसायिनश्चैव दूरतस्तान्विवर्जयेत्॥ एते गोपानकर्त्तव्या गवां व्याधिकरा
यतः॥ नार्ककाष्ठेन हन्याद्गां नोपलेन न तत्पेवच॥ शुष्ककाष्ठेन नो हन्यात्कदाया नैव ता
डयेत्॥ जंबुल्लवांम्रधात्रीणां वटोदुंबररोहिणां॥ अश्मंतकस्य शाणस्य यष्टिं सार्थं प्र
कल्पयेत्॥ शांतिं तत्र प्रवक्ष्यामि धेनूनां हितकाम्यया॥ अश्वत्थेवापलाशे वा समे देशे प
वापुनः॥ मेडास्थाने च कदलेगवां गोष्ठे पवापुनः॥ व्रात्यो वा गोलकश्चापि कुंडश्चापि वि
शेषतः॥ वैश्यो वा सुव्रतस्तेषां मन्त्रावे कर्म कृतू नवेत्॥ सुव्रत इति श्राद्धनामा व्रात्यादय स्त्रि ५९
षु वर्णेषु वा संति तस्मात्कारणात्सुव्रतः॥ शूद्रो वैश्यस्तेषां सर्वेषामप्यत्रावे ब्राह्मणो नवति॥

ऊर्द्ध्वग्रामयग्रस्तं ब्राह्मणं ग्रामश्चापि वा॥ मोचयन्मुच्यते पापाज्जन्ममरणांतिकात्॥ हंति कृष्णाहितं कुर्वन्
विप्रानिर्यदि जायते॥ न दोषभाक् च तत्र स्यादिति बूयात् स्वधर्मविज्ञः॥

गवां कृत्ये दुष्टम पाचरेत्॥ अतः कारणाद्विष्णुवचनं॥ मत्कर्म कुर्वतां पुंसां कर्मलोपो
भवेद्यदि॥ तत्कर्म ते प्रकुर्वंति तिस्रः कोट्यो महर्षयः॥ तथा च वामन पुराणे॥ गवार्थे
ब्राह्मणार्थे वा निंद्यमप्याचरेद्बुधः॥ तस्येह कीर्त्तिमाप्नोति च परत्र प्रदृश्यते॥ अतः का
रणात्॥ निंद्यमप्याचरन्विप्रो गवार्थे न च दोषभाक्॥ कर्त्ता चिकित्सिमान्स्नात्वा गोशां
तिं परिकल्पयेत्॥ मंडपं कारयेत्स्थूलं चतुरस्रं सुशोभनं॥ भूमिं समार्जयेत्तत्र पुष्पप्र
करशोभितां॥ विन्यसेत्कुंकुमं तत्र सपत्नीकं चतुर्भुजं॥ सुवर्णमूर्त्तिं सुस्निग्धं स्वर्णनावि
भ्राजितं॥ तस्याप्यत्रावे ताम्रं वा रक्तचंदनजं ततः॥ कुंकुमेनापि संलिखेत्खटिकातदभा
वतः॥ चंदनेन प्रियं तस्य स्वर्णादीनामभावतः॥ अंजनेन लिखेत्कालीं भक्तत्याचाष्टबाहु
कं॥ त्रिशूलं दंडमरुं चोर्ध्व खड्गं च कषमुत्तमं॥ एवमायुधमीरंतिर्दक्षिणेर्ध्व प्रदक्षिणे॥ त

पैवयोगनाथांतांतत्पत्नीपरिकल्पयेत्।। चक्ररवड्गांगमलयंमुसलंरवेटकंतथा।। घंटांपात्रं
गदांचैवकालिकायांन्यसेत्तथा।। पूर्णौर्द्धं नौऊलेनैवतयोरग्रेऽ विन्यसेत्।। वंशपात्रेस्तु द
जैत्रेचकंनयोर्वक्त्रयोर्न्यसेत्।। दधिनक्तस्यापिंडौतु तयोरुपरि विन्यसेत्।। हेत्रस्यपनि
नेतेनमंत्रेणसर्वमाचरेत्।। गौरी।। मिमायमंत्रेण तस्यैवपरिकल्पयेत्।। मूलमंत्रेणवाकु
यद्गियच्चावासमाहितः।। प्रतिष्ठां विधिवत्कुर्यात्कालत्रयवणपूर्वकं।। स्वस्तिवाच्यांस्ततो
विप्रान्वृणयाद्ग्निकर्मणि।। पक्कमांसंतपाचामंतथैवडिमपिंडकाः।। आमशाद्वेनापक्कं
मांसंडिमशाद्वेनापक्कान्नपिंडाः।। सर्वपंचपंचसंख्याकाः कलशायोरग्रतोविन्यसेत्तान्।।
सुघृतेनस्तुतैलेनसार्षपेणसुयोजयेत्।। दीपान्स्तुसंघृतान्पंचैवचनार्वतोमुष्टिकान्ततो
नान्।। तिपिस्थखक्तमनिपद्धिधानेस्मिन्प्रयुज्यते।। खादिरोदुंबराश्वत्थपलाशानांतु...

स्मृताः।। समिधोबिल्ववृक्षस्यमरुस्त्वंचपूपकपूपकं।। शमीवृक्षस्यचतथा यज्ञतरोरपिमु
खमग्नेः प्रकर्त्तव्यंयथाविधिविचक्षणैः।। क्रव्यादस्यतथामांसंछागस्यचहयस्यच।। केशां
श्चमानवांश्चैवसत्त्वनंचवचापवै।। सार्षपेणत्वतैलेनघृतेनचगुडेनच।। मुक्ता।। निकार
यित्वाथ धूपार्पंच द्विजोत्तम।। सुरा रुधिरसंयुक्तंमांसंपक्कंतथैनरं।। दिशांचविदिशां
चैवबलिंकुर्यात्प्रयत्नतः।। एतद्विधानंकेवलस्यमंडपस्यविषयमितिनसंदसीमंत्रेणु
दृष्टंकर्त्तीविजयमाप्नोतिगवांक्षेमकरोयतः।। शांतिमेतांप्रयुंजीतसावित्रीमनुसास्म
रेत्।। एषाद्विवेदमानाऽत्र द्विजैः पूर्वमुदाहृता।। कृष्णछागस्यमेदांसिरुधिरंचविशेषतः।।
भ्यां २ कर्णौ ग्रह्यतस्यैवजुहुयाच्चनातद्विजः।। सघृतंचसतैलंचसर्षपांश्चविमिश्रयेत्।।
एवंयोनजनेतविद्वान्कृष्णोगस्यप्रमाणनं।। ज्ञायतेनात्रसंदेहोगर्गस्यवचनंयथा।।

पुष्पकस्यरुधिरंछागस्यापिचशावयेत्।रक्तकुक्कुटमांसानिपतनंशमयत्यलं।मोऽ
कंनाशायत्याशुशाम्यास्वसमिधोघृतं।त्वशारंपावकेनानानात्रकार्यविचारणा।पांडु
रछागमांसानिहृदयंरसनांतथा।मधुसर्पिर्युतंकृत्वाजुहुयात्सूतनाशने।अश्वत्थो
दुंबराभिश्वखादिराणिस्तथैवच।जुहुयात्सर्पिषाविद्वान्कालिंदस्यविमोक्षणे॥ ॥
शाम्यासहपलाशेनसर्पिषापाकेकेनच।आसुरेणचमांसेनव्याधिःशाम्यतिदारुणः॥
कलग्रीवस्यवाजस्यछागस्यवापिसमाहितः॥शोणितंसर्पिषायुक्तंजुहुयात्खुरकोऽक्वे।
सा३ छागस्याप्यतिहृष्टस्यवोहृदयशोणितं।अरिष्टाह्लवनसंयुक्तंकृतंकंडुविनाशनं।घृतंसर्ष
पतैलंसर्वंचहृदयंकुक्कुटस्यच।यपोपनीतास्समिधोशवाय्यध्वंबकर्णके।गवांशांतिंपुष्पो ६१
दिष्टांयःप्रयुंज्याद्द्विजोत्तमः।कारयेद्योगवामर्थेवाजपेयशताधिकं॥तेनपुत्राश्चपौत्रा

श्चधनंधान्यंतथैवच॥गावश्चपरिवर्धंतिलोकेकीर्तिमवाप्नुयात्॥ ॥गोवधमन्त्र॥ ॥
ब्राह्मणेब्रह्मरूपेनश्रावयेत्प्रणवेनयः।सशिवःशाश्वतोदेवोगवामारींव्यपोहति।यो
ना३ र्चयेत्तंचसदाभक्त्याविल्वैर्भवदैविल्वकैः।सशिवःशाश्वतोदेवोगवांमारींव्यपोहति।नित्यं
रुद्रबलोपेतोरुद्रभक्तिसमन्वितः।घंटाकर्णगतोदेवःशिवस्थानविधायकः।लंबोदरेण
देवेनगजवक्त्रेणसंस्कृतः।सशिवःशाश्वतोदेवोगवांमारींव्यपोहति।त्रांबरेणहरेणापि
रविणायःप्रणम्यते।सशिवःशाश्वतोदेवोगवांमारींव्यपोहति।श्रीमतारुधिरांगेणघंटा
कर्णगतेनयः।नित्यंप्रणम्यतेतत्त्वाप्रहृष्टेनान्यचेतसा॥शिवायदेवदेवायमहादेवायतात्त्वि
ने।रुद्रायस्थाणवेनित्यंहरायोग्रायतेनमः॥परमेशायसिद्धायमंत्रसिद्धिप्रदायिने।त्रि
यंबकायदेवायअनंतायनमोनमः॥अनिमंत्र्यसदातोयंएतैर्मंत्रैर्यथाक्रमं।प्रोक्षयेत्तु

गवांदेहंततःसिद्धिंनिवेदिश।एवंयःपठतेगोषुरोगार्त्तस्तुविशेषतः।गोशांतिकंसदाकाले
गोषुशांतिंनिवेदिश।प्रातःप्रातस्तुसततंगोशांतिकमिदंपठेत्।गवामुत्सवकालेषुप्रस्थाने
वासमागते।आयुष्मान्बलवान्रोगीश्रीमानर्थपतिर्भवेत्।एकतःसर्वशस्त्राणिसएकस्त
त्कलितंबुधैः॥गोशांतिरेकतश्चैकासहस्राख्यगराशी।विशांखेद्वारकायांचगोविंदस्यवि
लोकनं॥तस्मात्सुलभतराशांतिर्गवांसत्यंवदाम्यहं॥ब्राह्मणस्यपरित्राणंगवांवाशिकस्य ८५
वा।तपाचांश्वमेधावन्तपस्नानादष्टसिद्धिमाक्रयात्॥गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश।
तस्माद्गवांसकर्त्तव्यात्सुपचारक्रियाबुधैः॥गंगावगाहनंमातुःपादपंकजसेवनं।नारतश्च्यव
एंतेत्यःपुण्यंधेनुर्च्चिकिल्सितं॥गवांतेभजकर्त्तारःप्रपापाश्चैवविधायकाः।योगयुक्तारणेधी ६२
राःचत्वारस्तेहरेःकराः॥गवामंगेषुयेदोषाउद्दिष्टाद्याःप्रकीर्त्तिताः।अज्ञानांमहिषानांचवि

ज्ञेयास्तेनसंशयः॥ ॥इतिश्रीनृसिंहभट्टविरचितायांविधानमालायांगर्गप्रोक्तंगोशांतिविधानं॥ ॥अपाम्वशांतिरभिधीयते॥ ॥ग्रहरुद्रादिवैकल्याद्भवंत्यश्वास्तुरोगिणः।तदा
निर्गमयेत्स्थानात्कल्पयेदृषाविधानकं।पूजयेच्छंकरंदेवंपार्वतीसहितंविभुं।नारायणंश्रि
यायुक्तमैत्रेस्तल्लिंगकैर्नृप।प्रारभेतनृभुवनन्दत्वेग्रामस्यचचतुष्पथे॥सुरामांसोपहा
राद्यैर्गीतवाद्यादिनर्त्तनैः।ग्रहस्थानानिसमुद्दिश्यबलिंचपरिकल्पयेत्॥आदौरेवनकंपूज्यं
पश्चात्त्वग्रहदेवताः।पूजयेदग्निषेकंचसूर्यस्यपरिकल्पयेत्।सूर्यकांतशिलायांवायंत्रेवा
न३ ताम्रजेऽर्चयेत्॥अर्कपट्टेपवारक्तचंदनैर्वासमालिखेत्।सूर्यरूपसमासीनंचिंतयेद्रू
पंतपा।सप्तभिर्वाजिभिःश्रेष्ठैर्युक्तंरूपमुत्तमं।ध्वजेनसहितंराजन्चिंतयेद्वाजिशांतये॥
वाजिभिर्विजयोराज्ञांवाजिभिःस्वर्गसंस्थितिः।गुणैर्निर्दोषिरहितैर्महावेगपरायणैः॥यस्यपश्

न्यंधनंनस्ययस्यान्नंतस्यजीवितं॥सुत्तगंमुनिभिः प्रोक्तंयस्याश्वास्तस्यमेदिनी॥ तस्मात्सर्वप्रय
त्नेनचिंतयेद्वाजिनांहितं॥ आग्निषेकंचसूर्यस्यसहस्त्रकलशैस्तथा॥ कुर्यात्जातवेदसमितित्रृचा॥
उद्घंनयेत्यनेनवा॥ अष्टोत्तरंयुतंतत्रयंजपंकुर्यात्तद्दशांशेनचरूघृतान्याजुहुयात्॥ एतदुक्तंस्कं
दपुराणे॥ ॥देशमन्यंनयेच्छिप्रमन्यानपिमहद्भयेत्॥ रेवतंपूजयेत्तत्रमहाकालीहरंहरिं॥
सहस्रकलशैःस्नानंरवेरेवंप्रकल्पयेत्॥ अश्वानांव्याधयोयत्रतत्रब्राह्मणभोजनं॥ प्रकुर्या
त्प्रयतोवाजिनाशःक्षिप्रंप्रशाम्यति॥ तत्रग्रहान्प्रदर्शयति॥ ईश्वरस्यकुवेरस्ययमस्यवरु
सो३ णस्यचाबृहस्पतेरुद्रानसः नोमस्यापविवस्वतः॥ ग्रहानानाविधाघोराःप्रवराह्यकविंदातिः॥
तत्रमाहेश्वराःसप्तमहारौद्राःप्रकीर्तिताः॥ चत्वारोराक्षसास्तेत्यांमुनिभिःपरिकीर्तिताः॥ च ६३
यारोदास्तेराज्ञोवैतेविघ्नंतिचरंगमान्॥ एवंप्राणहरारोजन्क्रूरान्दृष्ट्वावर्जितः॥ यावत्का

स्तमश्वशांतिकस्यकर्मणस्तावंतंकालमाह॥ त्रिदिनंचैवसप्ताहंदशाहंपक्षमेवच॥ तत्र
कुर्याद्यथाप्रोक्तंजपमष्टोत्तरायुतं॥ तावंतमपिहोमंचकर्मकांडेप्रकीर्तितं॥ एवंरक्षोग्रह
हतानांवाजिनांमहदुल्बणं॥ जायतेचबहूनांरोगाणांसमुदायतः॥ देवानांचप्रसादेन च३
पूजितानांयथाविधि॥ जायतेरोगनिर्मुक्तिर्नात्रकार्याविचारणा॥ तस्मात्देवपरोनित्यंतुविस्ना
तउपक्रमेत्॥ अश्वशांतिंमहाराजंकुर्याच्चैवसमाहितः॥ प्रस्नानसमयेस्नातानलंकृत्यतुरंग
मान्॥ विप्रैःसहस्वयंस्नायादित्याहभगवान्मुनिः॥ ततइत्यस्यार्थः॥ ममासैकर्मणिअश्वाप्रस्ना फे४
प्यस्वयंस्नायात्इति॥ मनसोरुच्चादानानिदद्यात्॥ यतःकारणात्॥ गृहनक्षत्रगत्याराजन्तत्रापी
डितसतिराज्ञःसर्वसंपदःपीड्यंतेइत्यस्तिज्योतिःशास्त्रेतच्चाह॥ शालिहोत्रोक्तायांअश्वशांतौ॥ स्ना
स्तो नेर्मुक्तिस्नापितानांसद्याव्येवापसैगृहे॥ हयानांजायते॥ घोरामनैकोनामसंशयः॥ यस्यवाजन्मन
सं१ वा१ र१ अ२

त्तत्रं कर्मजंवाथमानसं।संघानिकंसामुदायंतथावैनाशिकंचयत्।जन्मनक्षत्राच्चतुर्दशमषो
डशाष्टदशात्रयोविंशतिनक्षत्राणांमानसादयःसंज्ञाः।पीड्यंतेयस्यराशिक्षसूर्याद्यैर्यदिवा
राकुणातथा।विविधैर्वतिपोत्पातैस्तस्यस्याद्वाजिपीडनं।यस्यब्राह्मणाःकुप्यादेवावापितरस्त वा३
था।रोगैर्नानाविधैस्तस्यपीड्यंतेवाजिनोन्दशा।इयमारोनवेतस्ययःसाऽसकरोन्नृपः।रात्रौ
चवाजिशालायांनास्तिदीपोनिरंतरं।तेनदोषेणघोटानांसंभवंमशागदाः।जेंजपकर्षणंना ति५
स्तिदिवानास्त्येवघर्मर्षणंमक्षिकावारणंनास्तिनास्तिशुद्धिर्जुवोपिच।कृशाश्चव्याधियुक्ताश्च नै३
जायंतेनात्रसंशयः।उरःप्रमाणःकर्त्तव्यःस्थानस्यैवसमुच्छ्रयः।शाल्यस्पोद्धरणंकार्यंतुवस्तैर्न द४
विचक्षणैः।अश्वमंतकस्यवाम्रस्यछागस्यनिंबापस्यच।बदर्याश्चैर्थजं स्वाम्बस्थानस्तेनाःसु
नावशाः।कंग्दारुप्रकर्त्तव्यमिति रिवकुमोत्तमैः।शालोछ्रायोविधेयोत्रशिल्पशास्त्रेणानृतुज्ञा।

५ जन्मर्क्षमाद्यंदशमंचकर्मसांघातिकंषो ड्शमृक्षमाद्यात्।अष्टादशंतत्समुदायसंज्ञंप्राकुःत्रयोविंशतिजंविनाशं।५

जेंजपकर्षणंरात्रौनैवकार्यंप्रघर्षणं।एतद्दर्शंसर्वमश्वानांव्याधिदंभवेत्।रैवंतकस्यपूजात्र
तथावास्कप्रपूजनं।कृत्वाविशोध्यसमयंघोटांस्तत्रनिवेशयेत्।पीडितेजन्मनक्षत्रेस्नानंविधिन
माचरेत्।।पीडकस्तत्रग्रहःपूज्यःतथानक्षत्रमेवच।विनायकोपिसंपूज्योगणपत्येनकर्मणा।
मित्रस्वसंमितश्चैवतथाशालंकटंककौ।कूष्मांडोराजपुत्रश्चपूज्याश्चैवांबिकातथा।पीडितंग्रह
नक्षत्रंग्रहैःक्रूरैर्नयावहैः।उत्पातैर्विविधैस्तत्तुकथ्यतेत्रसमासतः।षड्जानरःस्योन्नृपतिर्नवर्द्धः
तःखेव४ कूरान्नरिस्केवरपीडितं।ऊर्वीनपूज्यंरवलुतस्यराज्ञानरोपवाक्लेशानिवारणार्थं।मूर्त्यंचविंशंख
मानसंततन्नेःषड्भिरिस्थंपुरुषोपिषक्तः।विभ्वंनरेशेनवतिःस्वजातिदेशानिषेकोभ्रुवनेः
प्रदिष्टःयत्केउसूर्यात्मजनौगयुक्तंबिनेरवक्रोपइतेक्रजेन।उल्काइतंइयतग्रहणाइतंवाप्र
राकु२ पीडितंयद्धिउपाकरेणाजन्मत्रेप्रतिहतेतनुनाशःकर्मणाफैहतिर्दशामतोपाउशोभवतिबांधव

तं१ च४ फ नह१

पीडाष्टादशेतनुनृतां धनहानिः प्राणिनामसुहृतिस्तु विनाशोमानसेविकलतामनसःस्यात्।
ज्ञातिनेनवतिगेचविनाशोदेशनेनवतिदेशविनाशः। नृपीडितेसत्पनिषेकधिष्ण्येनवेन्नृणां
२०३ तनुदेशपीडा।घोटोपपीडेपत्नंमंप्रयातिस्नानैर्युतःस्नातिपूर्योन्निप्रोतैःस्नानमशेषदोषासांघा धनोनिधा
तिकर्तृत्वनवान्छिनत्ति।मस्वर्णरूपंसमुदायधिष्ण्येनतन्नेप्रदद्याद्द्विदधीतहोमं।वलन्तसिद्धार्थक स्य जन्म
सर्वगंधयुक्तैर्जलैःस्नानमुशंतिशस्तं।सरूपसाविच्यन्निमंत्रितांबुपूर्णैर्घटैर्भोउशान्तिर्विनाशोतन्ने क्षत३
न्निशेषौकोमणिबीजरौप्यसर्वौषधीस्वर्णयुतैःप्रशस्तः।यानासनोर्वीवसनानिगात्रशक्त्याप्रद
भ३ द्याद्द्विजपुंगवेभ्यः।होमंचकुर्याद्विदुर्वयाचवेनानोकोपद्रवनाशमिच्छन्।कार्योक्षहोमोघृतपाय
सान्नोतर्प्याद्विजाम्मानसतापत्न्यौ।स्नायात्सिरीषातिबलाबलेनमदांबुनिचंदनसंयुतैश्च।स्ना ६५
नंप्रतत्नेत्वन्निषेकधिष्ण्येसमस्तरत्नैःसलिलप्लुतैःस्यात्।स्वजातिधिष्ण्येपिचसर्वबीजैःसवारिनिः

सर्वसुखायराज्ञो।[illegible]णिनामसुहृतिस्तुविनाशोमानसेविकलतामनसःस्यात्।(ज्ञातिनेन)
(वतिगेचविनाशोदेशनेनवतिदेशविनाशः।नृपीडितेसत्पनिषेकधिष्ण्येनवेनृणांतत्रतुदेशपीडा।)
(घोटोपपीडेपत्नंमंप्रयातिस्नानैर्युतःस्नातिप्रियतानिधास्यो गोक्षीरयुक्तैरपपूर्णकोशैःफेनैःसि
२१४ ताशेषतनोर्हविस्यात्।तपास्तन्मूत्रयुतैःपयोभिःस्नानंनृणांजन्मनिपीडितेस्यात्।अन्त्यारम
घामिषजुकदशार्दमंधाम्यहोमीहुतैःकृतकर्मपीडं।प्रियंगुसिद्धार्थकनीरुदूर्वाशतावरीस्नान
निरस्तदोषः।सांघातिकेत्वेऽनिडितेनिरस्यमघान्निषेकेयमनोबभूव।दूर्वासमिद्भिर्विदधीतहो
मंदानंचदद्याद्धनवानुरूपं।अश्वत्थसिद्धार्थकदेवदारुप्रियंगुबिल्वैर्यवचंदनाद्यैः।[illegible] परिपी देशार्दे३
डितेध्वजाइयस्तंबेरमस्थानतःशेलाग्राह्वषशृंगक्षत्रधरणोर्गर्भागणासकृदान्।वल्मीकासर
सोद्विजातिनवनाकुशालयासंगमादानीयार्थमृत्तोनिधायकलशेराज्ञान्निषेकंश्रियै।लेंडापक

र्षाणां यत्र कृतं भवति वाजिनाम्। तत्रैव परिकर्त्तव्यं गंधर्वाणां च पूजनं। गंधर्वराजेन तुरंगमाः।
आरोपे स्थापिता यत्र तत्पापं चिविवर्जितैः। स्थानापकर्षणं कृत्वा कृतपूजा विधीयते। कृतराजेन शा
लिहोत्रशास्त्रं उच्चैःश्रवा हयः पूज्यस्तु रंगाधिपतिस्तु यः। इयमारे समुत्पन्ने तस्मात्तं परिपूजयेत्॥
इमां शांतिं प्रवक्ष्यामि तन्मे निगदतः शृणु। ब्राह्मीं भूमिं च संशोध्यस्तु त्रियां वा समाहितः। गोमये
न उपसंलिप्य तां भूमिं परिशोधयेत्। अहोरात्रोपोषितो भूत्वा सोपवासः पुरोहितः। रात्रौ जागर
णं कृत्वा तस्यां भूमावनालसः। तूर्याणां च निनादेन गीतनृत्यविनोदितः। चंदनैः कुसुमैर्दिव्यैः कुसुमैः कु
प्रकरेन्महीं। धूपैस्तु धूपितां सम्यक् दीपैर्नीराजितां शुभां। एवं रात्रिमुषित्वा तां प्रातःकाले पुरोहि
तः। स्नात्वा शुक्लांबरधरः शुक्लमाल्यानुलेपनः। सोष्णीषो लंकृतः शक्त्या सहायैः शुचिभिः सह। चत्वा ६६
रो ब्राह्मणाश्चास्य स्के द्वौ पासुरतं ङिताः। ऋग्वेदपारगो ह्येको द्वितीयो यजुषां वरः। तृतीयः सामवि

सहाये १

श्री १ न्मुखश्चाथर्वणस्यापि पर्ववित्। सर्वे स्वंगाः कुलीनाश्च शुचयः शीलसंयुताः। अर्हत्वा वैरसंवी
ताः पवित्रचरितास्तथा। तेषामत्रावेस वैषामेको नास्ति तथाविधः। तस्मात्तावेडि कर्त्तव्यो कृक
शारवातत्त्ववित् द्विजः। तस्याप्य त्रावे कर्त्तव्यो यजुर्वेदपरायणः। सर्वेषामपि नावेद्य मीमांसात
त्त्वकोविदः। आचार्यं तं प्रकुर्वीत पुराणार्थविदांवरं। धर्मशास्त्ररतं नित्यं निष्णातं सर्वकर्मसु।
पावनं तं विजानीयात् कर्मसिद्धिप्रदं नृणां। कुलीनं वेदवेदार्थं वक्ति सेवापरायणं। तथा नाग
वते॥ नार्हे तथा प्रियजमानइ विवर्जिताने श्रोतत् घृतकृतमदनं कृतत्रुम्मुखेन। यच्चाब्राह्मणस्यमु
खत श्चरतो नु घासं उष्टस्यमभ्य विडितेर्निज कर्मपाकैः। अन्यच्च। यश्चैं स्तु वा कुरुते वाचं यश्च
मीमांसते पवा। तावुभौ पुण्यकर्माणौ पंक्तिपावनपावनौ। तस्मात्कारणात् विधाने कोविद्गुरु
पः। मंडपे विस्तृते सम्यक् तन्मध्ये कुंडमुत्तमं॥ लक्षणोक्तं प्रकुर्वीत यज्ञविद्याविशारदः। पंडितो

मंडलं कार्यं चतुरस्रं सुशोभनं। तंडुलैर्लक्षणोपेतैः रचितं सुमनोहरं॥ विदिक्षु विन्यसेत्
कुंभान् पूर्णानोषधिवारिणा॥ रसांश्च विन्यसेत्तेषु ईशान्यादिक्रमेण तु। सर्पिषा पयसा
दध्ना च मधुना च यथाक्रमं॥ कुंभांस्तान्पूरयेद्विद्वान् सार्द्रतान् सक्रमुमांस्तथा। संवीतान्व
स्त्रयुग्मैश्च वंशपात्रैः प्रपूरितान्॥ संपूजयेत्ततो देवान् कुंभेषु च दिगीश्वरान्। प्राच्यादिसुरवा
दिग्भागेष्वर्चयेदिन्द्रतः सुरान्॥ न्यस्तेषु देवकोष्ठेषु सवस्त्रेषु विशेषतः। कृत्वा सर्वमयान्सर्वा
नुपचारैः पृथक् पृथक्। यस्य यस्य च यद्द्रव्यं यच्छान्त्यानिधाक्रमात्। तद्द्विगेनैव मंत्रेण का
र्यसिद्धिविधायकं। तेषामेवाथ मंत्रैस्तैर्होमं कुर्याद्विधानवित्। साज्येन पायसेनैव जुहुया
व३ त्पृथक् पृथक्॥ ऋग्वेदी पूर्वदिग्भागे जपेच्छांतिसुत्तमां॥ अयुतं वा सहस्रं वा तत्पाच तिलसर्पिषा॥ ६७
बिल्वपत्रैस्तथा पुष्पैः पक्वैर्नानाविधैः शुभैः। जुहुयाद्धीफलैस्तद्वत् बीजपूरैर्मनोरमैः। खर्जूरै
र्नारिकेलैश्च सितया गुडेन च। साज्यैश्च तंडुलैश्चापि होमं कुर्यात्पृथक् पृथक्॥ यजुरध्ययनो
गु

तु१
विप्रो वरुणं जपत्तन्नवेत्। याम्ये सामगतिर्विप्रः कौबेरे पर्ववित्तु जपेत्। तेन तेन प्रकारे
ण हवनं कुर्युरंजसा। यथासंख्योदितं कृत्वा हवनं ज्ञानवेदिभिः। शांतिपाठं ततः कुर्युरितरैः
ब्राह्मणैः सह। होमावशिष्टे सर्वैस्तैर्द्रव्यैः स्विष्टकृतं नवेत्। ततो होमबलिं कुर्यात् यथाशास्त्र
मतंद्रितः। ग्रहाणां रोगशांत्यर्थं या पूजा परिकीर्तिता। तां तु वक्ष्ये समासेन भेषजैः सह संमतेः।
इंद्रादीनां पृथक् पूजां च तत्सर्वं विनिवृत्य च। ईशानादि च तत्सर्वं ततः कुर्यात्सुरक्रियां। ईशा
तु४ न्यामग्निकुंडाच्च पूर्ववद्दक्षिणस्तथा। नमो कुर्वीत देवानां मंडलेष्वपि पूजनं॥ अत्र विप्रास्त्र
यः कार्या नि वकार्यस्तथा पर्ववित्। आग्नेये त्वपदिग्भागे वह्निपूजा विधीयते। ईशान्ये पूजनं वा का३
यं२ योः पूर्वदेवेशमर्चयेत्। सावित्रं तु जपेन्मंत्रं यजुर्वेदविशारदः। आग्नेये बकुचश्चैव सोम्ये सा
मवित्तुत्तमः। सर्वतंत्रं तु कर्तव्यं पूर्वोद्दिष्टं विधानतः। उत्पातेषु च सर्वेषु ज्वरगेषु नृपस्य च। प्राय

श्चित्तं प्रकुर्वीत ततः सर्वप्रयात्म्यतिं दिग्भागे ऽशोत्तरे नागे स्थंडिलं च प्रकल्पयेत्। त्रिरात्रोपोषि
तस्तत्र शांतिं कुर्याद्विचक्षणः॥ कश्चिन्निमंत्रितः पूर्वं त्रिरात्रमुपवासितः। उपवासित इति को
र्थः। त्रिरात्रं तत्र निवासकारको ब्रह्मचर्येण। उदकुंभाश्च चत्वारः स्नापनीयास्तु दिशिं। रस
पात्राणि देयानि पूर्वादिकं न मुखोपरि। शिरःस्नातः ततो ह्यीषोय पावक्ततमंडनः। शुक्लवासा
जितक्रोधो बकूचेन समाहितः। आहूतोनु रूयाद्वक्रौष्टितेन सुसमाहितः। पितामहाय रुद्रा
य स्कंदाय वरुणाय च। अश्विन्यां चैव सूर्याय इन्द्राक्रायच तथाग्नये। वायवे चापरस्मै त्रिंशे देव्यै
तथैव च॥ गंधर्वेभ्यश्च सोमाय उच्चैःश्रवसे एव च॥ देवताया स्तवेन तत्रोत्पातस्य तु कारणं॥ मं
डले स्मिन्बलिं दद्यात्सम्यक् विधिवत्परिकल्पयेत्। शतमष्टाधिकं कृत्वा प्रति देवं द्विजोत्तमः ८०
ततश्च पूजनं कार्यं देवानां च विशेषतः। पायसे घारिकादीपधूपमाल्यानुलेपनैः। पायसे रि

ति बकुवचनं। येनकारणेन तत्र दद्येपायसं केवलं तंडुलसंस्तवमितिन यस्यकस्यचित्पायसं।
मधुना पयसा चैव ब्राह्मणान्भोजयेत्ततः। एकैकं देवमुद्दिश्य दशसप्तादि पंच वा। पल संख्या
त्र निर्दिष्टा स्वर्णस्यैवमनीषिभिः। तथैव रजतं देयं ताम्रं कांस्यं च दक्षिणां। दक्षिणा इति धनि
क विषयं। याजकानां द्विजश्रेष्ठानामेकं वा प्रदापयेत्। या या देवता भीनयेन पूजितातां त
स्मै तस्मै सालंकारां सपात्रां सवस्त्रां सदक्षिणां दद्यात्। हस्तमुद्राकर्णमुद्रा वस्त्राणि सर्वेभ्यः
समानत्वं परिकल्प्य दद्यात्। ब्रह्मणे महिषीं दद्यात् अश्वं सोपस्करं दद्यात्। आचार्याय। त
तस्तु वाचयेत्स्वस्तिसंपूज्य कुलदेवतां। रैवतकं ततः पूज्य ततोश्वान्परिपूजयेत्॥ ततस्ते
षजं कार्यमश्वानां रोगमुक्तये। तथाहि। अश्वकंदस्य मूलानि कुमारीकंदमेव च। व्योषं
च सर्षपैर्युक्तं पयसा परिलोडयेत्। व्रीहिणां पिष्टसंमिश्रं दद्यात्पलचतुष्टयं। केवलं चैवमश्वानां

एकैकस्मिंघटपक्वान्नपचन्॥ बलानैतेनेन घोटानां मंगानि परिमर्दयेत्। ततस्तु सर्वरवाद्यानि
मृन्मयेषु च भाजनेषु। निधाय अश्वान्नीराजयित्वा ईशान्यां दिशि प्रक्षिपेत्। वक्ष्यमाणेन शि॰ ३
मंत्रेण स च मंत्रः। एह्येहि नगर्वं देव अश्वान्मुंच मशाग्रहा अनेन बलिदानेन क्षेत्रायुंक्ति अश्व ३
हरोनव ॐ फट्स्वाहा॥ ततो गृहे विशेत्स्वात्मा कृतमंगलकौतुकः॥ रक्षोघ्नं च प्रदद्यात्तु धन
न्ये विप्राय नृसिंघ। रक्षोघ्नशब्देन तिलाः नृसिंहशब्देन पुरुषनारायणं। राज्ञो विजयदं पुण्यं
धनधान्यविवर्द्धनं॥ तुष्टिदं पुष्टिदं लोके सर्वविघ्नहरं स्मृतं॥ ॥इति श्रीविधानमालायां शा
लिहोत्रोक्तं अश्वशांतिविधानं॥ ॥अथ गजशांतिविधानं॥ ॥यदा तु कुंजराणां तु रोगोत्प ६९
त्तिस्तु जायते॥ यदा गजजय इच्छो नो विज्ञेयः पृथिवीभुजा॥ तदुक्तं वामनपुराणे॥ कुंजर
ग्रहसंस्तोमात् गजानां जायते गदः॥ नरास्संपूजयेद्विंदुं पुष्पगंधादिभिः सुधीः॥ विश्वतस्तु

ह्रं १

सर्वशोभनानां। तिलतंडुललाजान्नयवसिद्धार्थशालिभिः॥ यवैर्वेदवज्रमध्यस्थे कुंडे चैव हवनं स्मृतं॥
दध्ना च पयसा चैव घृतेन मधुना तथा। कोणस्थेषु यजिः प्रोक्ता मध्यमे सकलैरपि। यवैर्वे
वज्रमध्यस्थे अस्यामर्षः। इतरेषु कुंडेषु हवनं नास्ति स्थापयेच्च ततः कुंभान्नष्टसु दिक्षु शाव ३
च। वस्त्रयुग्मैः परिछिन्नान्सर्वौषधिसमन्वितान्॥ सर्वरत्नैस्तु संयुक्तान्गंधपुष्पादकैरपि।
शरावरप्रमाणं च घटं तु केनेच मध्यमं॥ तीर्थोदकेन संपूर्णं सर्वरत्नैः समन्वितं। सर्वौषधिसमा
युक्तं स्तु वर्णहृदयं स्मृतं॥ हृदयशब्दो गर्भवाचकः। तंडुलानां च वक्षेण न्यसेत्तं सुस्थिरं दृढं। च
तुरः कलशानन्यांश्च वक्षस्य समीपतः॥ कोणेषु च तथा विद्वान्मंडपस्य तथा घटान्। तथा त्रा
ष्टिनजलौषधीरत्नवस्त्रयुग्मैर्युक्तानिति। सर्वे प्रधानकलशेनरसिंहान्तर्निरविं। चक्रवांरवग ६८ ३
दाशार्ङ्गवज्रासिद्धारशक्तयः॥ पूर्वादिक्रमयोगेन ध्यातव्याः सकलेष्वपि। बहिरत्राकादिदिक्

पालान् तत्र तत्र च संस्मरेत्॥ प्रधानकुंडान्पुरतः कुर्याच्चिकाख्यमंडलं॥ तत्र संपूज्य देवेशं प
श्चाद्धोमादि साधयेत्॥ मुख्ये कुंडे ततो धामान् जुहुयात्तिलसर्पिषा॥ ततः स्विष्टकृतेत्यादि स
मानस्क विधिक्रमः॥ एवं कुंडेषु जुहुयुर्विधिवत्प्रयताद्विजाः॥ एवं समाप्य विधिवत् होमं तत्र
पुरोहितः॥ संस्पृश्योदकुंभं च जपेद्दशसहस्रकं॥ गायत्रीं शिरसा सार्द्धं विप्रैः सह सुचिन्नतैः॥ मं
डपस्थेषु कुंभेषु प्रत्येकं च सहस्रकं॥ पर्यंतकलशान्स्पृष्ट्वा जपेत्तत्र सहस्रकं॥ अनंतरेषु कुंभेषु ते
गायत्र्या प्रणवेन च॥ कृत्विग्भिर्युगपत्कार्यं होमं तत्र च पूर्ववत्॥ प्रतिकुंभं सहस्रं च जपेत्तानत्युपस्पृ ग्रंथ ४
शान्॥ पूजयेद्द्रोकपालादान् गंधादिभिरतंद्रितः॥ सर्वलिंकारशोभाढ्यां दिव्यलक्षणलक्षितान्॥
तल्लिंगैर्मंत्रिकैश्चैव देवान्संतर्पयेद्बुधः॥ अनुहृत्य वारणान्सर्वान् तपार्चैव वरंगमान्॥ सर्वलिंका ७१
रशोभाढ्यान्सर्वांस्तान्तर्पयेद्बुधः॥ ब्रह्मकुंभोदकेनैव वर्स्नपयेत्तत्र साधकः॥ राज्ञो नाराजनां कु

र्युरित्यादिसूक्तैरैंद्रैर्द्विजोत्तमः॥ पूजयेत्प्रयतो नूत्वा विप्रहर्देः समाहृतः॥ अनेनैव च मंत्रे
ण जुहुयाद्युतत्रयं॥ अष्टाधिकं च मतिमान् पायसेन च सर्पिषा॥ समाहृत्याजपेद्विद्वान्साष्टं
चैवायुतत्रयं॥ कुंजरा हि यदा रोगपीडिताः सुमहीपतेः॥ तत्रैवं पूजयेत्सम्यक् कृत्वा हरिं भगवा
न्शिवः॥ पद्मपुराणे॥ पंचाशद्ब्राह्मणेभ्यश्च गाः प्रदद्यान्नृपोत्तमः॥ सुवर्णदक्षिणां तत्र प्र
त्येकं निष्कमेव च॥ सहस्रं ब्राह्मणान्भोज्यास्तद्वस्त्रैरलंकृताः॥ ततः प्रेतपिशाचेभ्यो बलिं द
द्याद्विधानतः॥ सुरामांसं च पिष्टं च सघृतं पायसं तथा॥ द्वारावदशकं पूर्णं तेन कृत्वा क्षिपेन्नि
शि॥ ॥इति पद्मपुराणोक्ता गजशांतिः॥ ॥तथा च गरुडपुराणे॥ ॥सनत्कुमारवचनात्॥ अ
पराजा प्रकुर्वीत गजानां शांतिकं परं॥ गजानां रोगनष्टानां तत्कृत्वा तोदयेत्सति॥ नादंतिक व
लानां तु दर्शं च तस्य कृत्तिसंततं॥ तथा प्रशांतनिर्वेदा भवंति मदवर्जिताः॥ विहीनगतयश्च त्वर्पः॥

विमानास्त्रस्त सर्वांगः सुप्तोनष्टपराक्रमः॥ नष्टशोनःस्मशानेनोनष्टसंज्ञोतिजायते॥ नानाव्या
धिसमुत्पान्निःपीडान्निःपाद्यतेनरः॥ इतिव्याधिसमाक्रांतेष्वेवंहस्तिषुन्नृपतिः॥ कुर्यात्तुशांति
कंराजागजरक्षणतत्परः॥ रोगनाशायदानाय दानणास्त्यजंति बलमांगिकं॥ तत्तापिशांति
कुं ४ कंकार्यंगज विघ्नोपशांतये॥ पुर्व्वारंभेषुसर्वेषुगजशांतिंसमारभेत्॥ मंडपंचतुरस्रंचद्वाद
शारंचकारयेत्॥ तन्मध्येइषुमानंचकुंडंकुर्याद्विचक्षणः॥ दक्षिणेपश्चिमेयोनीवितस्तिप्रमि
४ कोणकुं तेमुन्ने॥ कुंडंत्रिमेखलंकार्यंवितस्त्युच्छ्रयशान्वितं॥ केचिन्मतेनवृत्तंस्यात्कुंडंसर्वगुणान्वितं॥
तत्पुरस्ताद्दक्षिणतःकुंडंहस्तप्रमाणकं॥ अन्यत्तुकारयेद्विद्वान्पश्चिमेचोत्तरेतथा॥ सावकाशं
चांतरालंकुंडानामंतरेतथा॥ त्रिकोणंदक्षिणेकुंडंपश्चिमेवर्त्तुलंतथा॥ उत्तरेचतुरस्रंचहस्तेवंकुं ७०
डस्तुतिस्तथास्मृता॥ अर्कखादिरपालाशशमीबिल्वतरूद्भवाः॥ समिधःपूर्वतःप्रोक्तामध्येबिल्व

हां १ र्यात्तत्रशास्त्रैवमंत्रवित्॥ अन्येष्वयंविधिःकार्योयतोराजाहरेस्तनुः॥ एवंकृत्वाविधानंचस्वस्तिवाच्योपो
रि २ द्विजोत्तमैः॥ दक्षिणाश्चततोदद्याद्विप्रेभ्योनृमिकल्पवित्॥ आचार्यंपूजयेत्पश्चाद्ब्राह्मणांश्चैवऋत्वि
जः॥ दासेभ्यश्चतदासीभ्योदद्याद्वस्त्राणिनूरिनः॥ समस्तकरणाधीशांग्रामणीप्रमुखान्नरान्॥ पूज
येत्धनधान्याद्यैःसन्मानेनप्रतोषितान्॥ ततोभेरीनिनादेननिःसाणानांमहारवैः॥ शंखानांकहला
नांचगजानांबृंहितैस्तथा॥ घोषान्निस्करगाणांचनादयन्जगतीतले॥ प्रविशेत्नृपतिःसम्यक्मंडि
तंराजमंदिरं॥ पुनस्तत्रनृपालोसौस्वस्तिवाचनतत्परः॥ दानंदद्याद्द्विजातिभ्यःपरिगृह्यानिषेचनं॥
वाजिशालांचसंप्रोक्षपहस्तिशालांतथैवच॥ सिद्धार्थान्तंदुलान्पुष्पप्रकारांश्चतिलानपि॥ प्रकि
रेस्स्वयमुर्वीशोगजानांशांतिहेतवे॥ शालामध्येनृसिंहंचसुदर्शनमनामयं॥ पूजयेद्गंधपुष्पैश्च
दीपैर्नीराजयेत्ततः॥ ततोनृतबलिंदद्यादन्नैर्बहुविधैर्वरैः॥ ततःसंवेशनंमंत्रैराचार्यःकारयेत्सुधीः
२९

गजानामभिषिक्तानां तथा चैवापि वाजिनां ॥ हृष्टपुष्टमना राजा चिरं राज्ये महीयते ॥ ॥ इति श्री विधा
गरुडपुराणोक्तं शांतिविधानं ॥ ॥ अथ करभशांतिविधानं ॥ ॥ तत्र भविष्योत्तरे कृष्णयुधिष्ठिरसंवादे ॥
युधिष्ठिर उवाच ॥ ॥ दासेराणां कथं कृष्ण रोगमुक्तिस्तु जायते ॥ ब्रूहि केन विधानेन क्रियमाणेन मु
ज्ञा ॥ ॥ कृष्ण उवाच ॥ ॥ पुरा हि राजन्नित्राच्चानामधिपेन विराट्पुरे ॥ कपित्थं च वटाधस्तात्क्रमेणैकवि
धानकं ॥ उत्पद्यंते महारोगाः करभेषु महोल्बणाः ॥ विधानं तत्र कर्तव्यं तेषां रोगोपशांतये ॥ ग्रामादुत्तरतो
ऽरण्ये मंडपं परिकल्पयेत् ॥ तत्र मध्ये प्रकुर्वीत कुंडं हस्तमितं शुभं ॥ तस्मिन्कुंडे तिलैर्होमः साज्यैः पूर्ववनं का
रयेद्बुधः ॥ अयुतं वाष्टाधिकं चैव गजाज्ञानां च तथैव च ॥ पायसेन च साज्येन कुर्यात्सहस्रं सुधीः ॥ बलिं
प्रकल्पयेत्तत्र पंचखाद्यैः प्रयत्नतः ॥ आचार्याय ततो दद्यात्कंचकं च सनूपुरकं ॥ ब्राह्मणान्भोजयेत्तथा
सहस्रं तु सलक्षणान् ॥ भूमिदानं ततः कुर्याच्चर्मद्वयसंमितं ॥ पर्वतस्य च समीपे च यान्भूमिं हित्वा पिंग ७२

ला ॥ सा दत्ता य द्विविप्राय पापमुक्तिस्ततो भवेत् ॥ पिशाचाधिपतिरुवाच ॥ ॥ एतस्मिन्विहिते वैरप
विधाने श्रद्धयान्वितः ॥ तदा करभरोगाणां विमुक्तिर्जायते ध्रुवं ॥ ॥ इति श्री विधानमालायां स्कन्द
उष्ट्ररोगशांतिविधानं ॥ ॥ अथ खरशांतिविधानं ॥ ॥ खराणामुदरे रोगो जायते पादतः क्व
चित् ॥ अथवा सर्वदेहेषु च तदा शांतिं प्रकल्पयेत् ॥ शुचिः शुक्लांबरधरो राजा सह पुरोध
सा ॥ स्वामी वा तेषु कुर्याच्च विधानं विधिवद्बुधः ॥ त्रिंशद्वा विंशतिर्वापि नव वा च ततः परान् ॥ विभ
वानुसारतः कुंभान्निर्व्रणान्शुभलक्षणान् ॥ तंडुलोपरि संस्थाप्य सर्वांस्तान्कलशान्सुधीः ॥ सौ
षधीः सशुवर्णांश्च वस्त्रैरावेष्टितानपि ॥ पूजयेत्तेषु सर्वेषु वह्निध्यानपरो द्विजः ॥ चतुर्भुजं सप्तजि
ह्वं त्रिनेत्रं मेषवाहनं ॥ मेषशृंगं च पिंगाक्षं शक्तिपाशासिधारिणं ॥ एवं तेषु स्मरेद्देवं हव्यवाहं
महाद्युतिं ॥ कुंभानां पूर्वतः पंक्तिर्विधातव्या प्रयत्नतः ॥ दक्षिणोत्तरतः सर्वा गंधपुष्पादिपूजिताः ॥

तस्यास्क पश्चिमे भागे स्थंडिलं कुर्यात्सुधीः। समिद्भिश्च विषाचैव सहस्रं च पृथक् पृथक्। ततस्त्वपा
यसेनापि जुहुयाद्धृतसंस्रवम्॥ उक्तं च॥ अष्टोत्तरायुतं कुर्याद्दग्निसूक्तेन च द्विजः। चरुणा सघृतेनैव
द्विजः कुर्याद्दतंद्रितः॥ एतस्मिन्विहिते वैश्यविधाने विधिवद्बुधैः॥ शांतिर्भवति रोगाणां खराणां नात्र
संशयः॥ ॥इति श्री विधानमालायां खर रोगशमनं विधानं॥ ॥अथ सारमेयशांतिः॥ ॥पद्मपुराणे॥
इंद्र सत्यव्रत संवादे॥ ॥इंद्र उवाच॥ ॥अहं तु मृगयायुक्तो सिंहासुत्तवसत्पतां॥ अटामि कानने घोरे
जंगले देश संयुते॥ मृगयाक्रीडमानो हं राजवेषधरः प्रभुः। श्वानां वृंदैः समाकीर्णो जिघांसुः श्वापदान्
बहून्॥ अकस्मादेव विप्रर्षे सारमेयाः प्रपीडिताः। व्याधिभिर्विविधैर्ब्रह्मन्वद तद्रोगशांतिकं॥ भेषजा
नि न सिध्यंति विहितानि भिषग्वरैः। विद्या विज्ञात रोगाणां नाशार्थं हि द्विजोत्तम। विधानं क्रियते स ७३
म्यक् एतन्मुनिमतं मत॥ ॥ऋषिरुवाच॥ ॥विधानमास्ति देवेंद्र श्वानां रोगोपशांतिकृत्। यासां

ति गर्हितानां तु सेवोक्ता मुनिभिः श्वनां। महाव्याधिगृहीतानामकस्मादेव सुव्रत। नश्यंति व्याधयः
सर्वे सारमेयांगसंभवाः। विना पस्मारमेकं हि सर्वेषां श्वानां यतः॥ ॥इति श्री विधानमालायां सारमे
यशांतिविधानं॥ ॥अथ पनक्षत्रशांतिः॥ ॥अथ पनक्षत्रशमनविधानं॥ यस्मिन्नृक्षे भवेत्पीडा तस्य
ऋक्षस्य देवतां॥ प्रतिमां स्वर्णजां कृत्वा पूजयेत्प्रयतः शुचिः॥ गोमयेनानुसंलिप्य मंडलं तु प्रकल्प
तं॥ चतुरस्रं च संवीतं तंडुलैश्च कृतान्तरैः॥ कृत्वा तु स्थंडिलं तत्र यत्नतः कल्पयाम्हदा॥ वेदिस्थाने सु
धीः कुर्यात्तंडुलानां महत्त्वयं॥ तत्र प्रमाणं खारी वा द्रोणो वा द्वादशाढकाः स्मृताः॥ अभावे पंच वा द्रोणा द्रो
णं वा तदभावतः। ईशान्यां कोणदेशे तु कलशं स्थापयेत्सुधीः। निधाय रुद्रवर्णं तत्र कलशे शक्त्युपे
तया॥ पीठं तु पूर्वतः स्थाप्य वने वस्त्रेण वेष्टितं॥ स्वस्तिकं तंडुलानां च कृष्णानां तत्र संलिखेत्। कृष्णा
नामि तिप्रयत्नकर्मनिष्पन्नानां। तन्मध्ये देवतास्ति स्तोन क्षत्र त्रिपत्र यस्य वै। यस्मिन्नृक्षे रोग उत्पन्नस्त

नि १

पु २ स्य पूर्वापरे सुधीः ॥ उड्डूँमीं पूजयेद्यत्नादधिप्रत्यधिदैवते ॥ प्रकटीकृतचिह्नस्य रोगस्य चन्द्रवित्र
हे ॥ यस्मिन्दिने ततः पूर्वे षष्टिनाड्यः संभवः ॥ ततस्तु पुरतस्तद्वत्तस्मात्पूज्यमुडुत्रयं ॥ देवतायस्य
नक्षत्रस्य मंत्रस्तल्लिंगएव च ॥ द्रव्यं च तस्य यद्युक्तं प्रधानं प्रोक्तं तं तपा ॥ तत्सर्वं विदुषानीयशेमंत
त्रप्रकल्पयेत् ॥ ईशान्ये नगवान्विष्णोर्नाम्नाद्वादशकस्य वा ॥ वक्ष्यमाणा निनामानि श्रृण्वन्नृपतिकुंज
र ॥ हरिर्नारायणो विष्णुर्गोविंदो गरुडध्वजः ॥ उपेंद्रो माधवोऽनन्तात्मा वस्त्रीकोजनार्दनः ॥ पद्मना
भोऽच्युतो नाम्ना विष्णोर्द्वादशकं स्मृतं ॥ गणेशं पूर्वतो गस्तं दुर्गामपि च पूर्वतः ॥ अग्नेर्दिशि तु संपूज्य देवं
क्षेत्राधिपं सुधीः ॥ उत्तरे रुद्रमूर्तिं च पूजयेत्प्रयतः पुमान् ॥ पंचोपचारसंयुक्तां पूजां तत्र प्रकल्पयेत् ॥
स्वगृह्योक्तविधानेन कुर्याद्दग्निमुखं सुधीः ॥ कलशं जलपूर्णं च वस्त्रयुग्मेन वेष्टितं ॥ निधाय सर्वौष ७४
धीस्तत्र पंचपल्लवसंयुता ॥ पंचस्थानमृदा कुंभे चालवालं प्रकल्पयेत् ॥ इमं मे वरुणेत्येवं जल

म १ मंत्रेणावा पुनः ॥ सर्वे समुद्राः सरित इति मंत्रं स्मरन्पठेदित्यर्थः ॥ यच्छिद्रितेविशाइत्यादि स्मृत्वा जपेद्बु
द्धिमान् ॥ आवाहयेद्घटे देवं वरुणं पयसां पतिं ॥ एवं नक्षत्रशांत्यर्थं विदध्यात्पूर्वपीठिकां ॥ ततो न
क्षत्राणि ऋक्षाणां चामनं परिकल्पयेत् ॥ सामान्योयं विधिः प्रोक्तो नक्षत्राणां प्रपूजने ॥ सर्वौषधीनां
दुःप्राप्तौ त्ववेदेकाद्यातावरा ॥ सर्वेषाममपि गंधानामभावे चंदनं मतं ॥ जातपत्रं सुमनसां धूपानावे
च गुग्गुलुः ॥ नैवेद्यानामभावे तु पायसं स्मृतमुत्तमं ॥ मंत्राणामप्यभावे च गायत्री मंत्र उत्तमः ॥
अष्टोत्तरसहस्रं च तथाष्टशतमुदाहृतं ॥ जुहुयात्प्रयतो धीमांस्ततः पूर्णाहुतिर्भवेत् ॥ होमद्र
व्यस्य दुःप्राप्तौ तिलाः प्रोक्ता मनीषिभिः ॥ ॥ इति विधानमालायां मूलेसर्पशांतिविधानं ॥ ॥
अथ नक्षत्राणां पापकेन नक्षत्रशमनं ॥ अश्विन्यां चाप्यहोरात्रमपवादद्रवासराः ॥ पीडोत्प
न्नस्य रोगस्य नात्र कार्या विचारणा ॥ देवते अश्विनौ तत्र द्विजौ उक्तकवर्मकौ ॥ सुधाकलशसंयु

क्तौकमंडलुधरौकृतौ॥ देवस्यत्वेतिवा आदेव्या गायत्र्या पूजनं स्मृतं॥ नीलोत्पलं च पूजायां धूपः
सघृतगुग्गुलुः॥ क्षीरोदनं च नैवेद्यं समिधः क्षीरवृक्षजाः॥ प्रधानं पायसं प्रोक्तं तिलाश्चैव घृतप्लु
ताः॥ अष्टोत्तरसहस्रं च तथैव शतमुच्यते॥ एवं रोगः शमं याति दानैः पुष्पैस्तु भेषजैः॥१॥ नर
णां मरणं रोगाद्दिनानां नामक विंशतिः॥ विप्ररेणुमनुष्याणां च वर्षैरोगसंस्थितिः॥ यमस्तु देवता २।३
तत्र कृष्णवर्णो द्विबाहुकः॥ तुलायवारुनः श्रीमान्पाशदंडधरः प्रभुः॥ यमाय सोमं यमोय मस्त्रि
ष्टुप्॥ इति पूजादिमंत्रः॥ कृष्णागुरुः सुगंधधूपो गुग्गुलुरेव च॥ कृष्णसौविरिका पुष्पं अपवाकरवीर ।३४
कं॥ गुडापूपं च नैवेद्यं मधाज्यतिलकं हविः॥ पूर्वसंख्या समुद्दिष्टा हवने नात्र संशयः॥२॥ अप
कृत्तिका॥ कृत्तिकायां दिनोक्तौ निवसन्तोक्तानि मनाषितिः॥ अग्निस्तु देवता तत्र रक्तवर्णो ज ७५
वाहनः॥ चतुर्भुजो घृतनामत्रस्रुवसूत्रवरदान्वयः॥ अग्निं दूतं मेधातिथिरग्निर्गायत्रीति पूजामंत्रः॥ र

क्तचंदनमेवात्र सुगंधः परिकीर्तितः॥ पुष्पाणि करवीरस्य रक्तस्य च विशेषतः॥ केवलः सर्पि
षो धूपो दीपाः सप्त प्रकीर्तिताः॥ घृतोदनं च नैवेद्यं घृतं चैव प्रधानकं॥ हवनस्य परीमाणं सहस्रं
च तत्प्रमाणं॥३॥ रोहिण्यां च दिनान्यष्टौ क्लेशो भवति देहिनां॥ प्रजापतिस्तु तस्यापि देवता परि
कीर्तितः॥ रक्तवर्णश्चतुर्बाहुर्हंसारूढश्चतुर्मुखः॥ पद्मपुष्पाक्षवरदान्वयस्तो निरामयः॥
ध्वजे कमंडलुर्यस्य दर्शनं सुष्टिर्गुणाकरः॥ प्रजापते हिरण्यगर्भेर्नः प्रजापतिस्त्रिष्टुप्॥ पूजामंत्रः॥
गंधार्पे कुंकुमं देयमोषधीनां च चंदनं॥ क्षीरोदनं च नैवेद्यं पंचधान्यं प्रधानकं॥ तिलाश्च तंडुला
मुद्गायवगोधूमकाल्पा॥ एतेषां समुदायस्तु पंचधान्यं प्रकीर्त्यते॥ तथा मार्कंडेयपुराणे॥ तिलो
व्रीहिर्यवो मुद्गो गोधूमः पंचमः स्मृतः॥ अनेन पंचधान्येन प्रीयतां परमेश्वर इति॥४॥ मृगशीर्षे दि
नान्येव पंच रोगस्य देहिनां॥ सोमो हि देवता तस्य श्वेतवर्णोऽमृतान्वितः॥ दशाश्वरथमारूढः श्वेतांबा

ॐकुमं २ पिनिगद्यते। द्विजुजोऽपगदयुक्तोऽन्नयपाणिःससोमराट् ॥ आप्यायस्वगोतमःसोमोगाय
त्री।पूजामंत्रः।चंदनंलेपनंतस्यकुंकुमंदधूपनंमतं॥ दशांगश्चापितथायंत्रनैवेद्यंपायसंतथा॥ प्र धूपो २
धानद्रव्यंगोक्षीरंघृतंवाधेनुसंभवं॥ तावतीचैवसंख्यात्र हवनेपरिकीर्तिताः॥ ५॥ आर्द्रायांच
मृतौरोगाद्दिनान्येवैकविंशतिः॥ रुद्रोधिदेवतातत्र वृषारूढश्चतुर्भुजः॥ त्रिशूलंखट्वांग
धरोवरदान्नयहस्तकः॥ नमःशंभवेत्यस्यहिरण्यगर्भऋषिःप्रोक्तइति॥ चंदनंचसकर्पूरंगंधंप्रदाप्य
दापयेद्बुधः॥ पूजायांधत्तूरंपुष्पंदशांगोधूपएवच॥ नैवेद्यंपायसंसाज्यंप्रधानंमधुसर्पि
षी॥ अष्टोत्तरसहस्रंचशतमष्टोत्तरंनृणां॥ जुहुयाद्भयतोविद्वान्महारोगोपशांतये॥ पुन
पद्मा २ नर्वसौजायतेरोगःस्वारोरिजायतेनृणां॥ सप्तरात्रंचपीडास्यात्तस्यरोगस्यदारुणा॥ अदिति ७६
स्तस्यरुद्रस्यदेवतापरिकीर्तिता॥ चतुर्भुजापीतवर्णासाद्रसूत्रकमंडलुः॥ वरदाभयहस्ता

साकायस्विसमियीवृत्ता॥ अदितिर्द्यौरित्यस्यगोतमोऽदितिस्त्रिष्टुप्॥ ॐकुमंचहरिताच
गंधस्तस्यांप्रियंकरः॥ अगस्तिपुष्पजापूजागंधोमलयजःस्मृतः॥ गुडोदनंचनैवेद्यंप्रधा
नंपायसंमतं॥ संख्याहोमस्यविज्ञेयाशतमष्टोत्तरंतथा॥ ७॥ रोगपीडानवेतस्यपुष्पर्क्षेदि
नसप्तकं॥ चतुर्भुजःपीतवर्णोदेवतात्र बृहस्पतिः॥ दंडाक्षसूत्रपाणिस्तुसाभयःसकमं
डलुः॥ बृहस्पतेअतियदर्योबृहस्पतिस्त्रिष्टुप्॥ पूजामंत्रः॥ ॐकुमेनानुलिप्तांगोवारिजैःपूजि
तोगुरुः॥ साज्येनबिल्वगर्भेणधूपनीयःपुनःपुनः॥ गुडमंडकनैवेद्यंप्रधानंघृतपायसं॥ होमसं
ख्याशतंसाष्टंपुष्पर्क्षेपरिकीर्तिता॥ ८॥ अश्लेषायांसप्तरात्रंदिनान्येवैकविंशतिः॥ सर्पस्तत्रदे
वतानत्रमहामंडलिरूपधृक्॥ विशोषात्रिशिराश्चंडःषड्भुजःपिंगलोचनः॥ आयंगोःसार्प
राज्ञीसर्पगायत्रीपूजामंत्रः॥ कालोद्भवानिपुष्पाणिगंधःकुंकुमकेसरं॥ सघृतोगुग्गुलुर्धू

शांप:४

पः साज्यं क्षीरान्नभोजनं ॥ गव्यं घृतं प्रधानं स्यात्तद्दूत्ते सूर्यदैवते । होमसंख्यासमुद्दिष्टा ६१
न्नमष्टोत्तरं शतं ॥ ॥मघायां मरणं रोगाद्दिनान्येवैकविंशतिः ॥ पितरो देवतातत्र कृष्णः
वर्णास्त्रिभुजाः ॥ कृष्णाद्धसूत्रवरदाः कमंडलुधरास्तुताः ॥ आयं तु नः पितर इत्यस्य
हेमस्वपितरास्त्रिष्टुप् ॥ गंधार्घ्यं चंदनं देयं पूजाचंपकजामता ॥ धूपार्थं गुग्गुलुः साज्यः तिलपिष्टं च
भोजनं ॥ प्रधानद्रव्यमुद्दिष्टं साज्यास्तिलतंडुलाः ॥ होमसंख्यासमुद्दिष्टाशतमष्टोत्तरं तथा ॥
पूर्वाफाल्गुनिकायां च रोगः पक्षप्रमाणतः ॥ भगस्तदेवतातत्र पद्मारूढस्तु लोहितः ॥
अनया अस्त्रामान् भग एव न संशयः ॥ भग एव वसिष्ठो भगस्त्रिष्टुप् ॥ इति पूजादिमंत्रः ॥ ॥
रक्तचंदनलेपस्तु पुष्पं स्यात्करवीरकं ॥ धूपो बिल्वरसः प्रोक्तो नैवेद्यं तु शरामताः ॥ साज्या ७१
स्तव्रीह्यास्तत्र प्रधानं द्रव्यमेव च ॥ होमसंख्यासमुद्दिष्टा शतमष्टोत्तरं तथा ॥ उत्तराफाल्गुनी

रोगो दिनान्येवैकविंशतिः ॥ अर्यमा देवता पद्ममध्यस्थः पद्मवर्णकः ॥ पद्मानयकरः श्री
मान् स्वर्णमूर्तिर्महाद्युतिः ॥ मानो मित्रो दीर्घतमा अर्यमा त्रिष्टुप् ॥ इति पूजादिमंत्रः ॥ पु
ष्पं तु मधुवृक्षस्य तथा कुंकुमकेसरं ॥ धूपार्थं गुग्गुलुः साज्यो नैवेद्यं घृतपायसं ॥ घृतौ
दनं प्रधानं स्यात् उत्तमं भगशांतये ॥ होमसंख्यासमुद्दिष्टा शतमष्टोत्तरं तथा ॥ ॥हस्ते यदि गदो
त्पत्तिर्मृत्युर्वै जायते नृणां ॥ दिनानि पंचदश वा प्रायः क्लेशाय कल्पते ॥ सविता देवता तस्य स
प्ताश्वरथवाहनः ॥ द्विभुजो रक्तवर्णः स्यात्पद्मासनसमाश्रयः ॥ आकृष्णेनेति हिरण्यस्तू
पः सविता देवता त्रिष्टुप् ॥ करवीरैः पूजितो रक्तै रक्तचंदनलेपनैः ॥ सघृतं कोपा एव नियोजितो
धूपः प्रोक्तो मनीषिभिः ॥ नैवेद्यार्थं मपूपांश्च दधिप्रोक्तं प्रधानकं ॥ होमसंख्यासमुद्दिष्टा शत
मष्टोत्तरं बुधैः ॥ चित्रायां जायते रोगो दिनान्येवैकविंशतिः ॥ एके पंचदश प्राहुः त्वष्टा नक्षत्र

देवता।पद्मस्थंचित्रवर्णःस्यात्ध्यायतेसचतुर्भुजः॥पद्माहस्तसूत्रवलयःपद्मानयकरःप्रभुः॥
अग्नेपत्नीरितिकएवमेक्षातिपिःत्वष्टागायत्रीमंत्रं।गंधरक्तकुंकुमंश्रेष्टंजपाकुसुमपूजितं।सा
ज्येनधूपनंतस्यनैवेद्यमोदनंस्मृतं।चित्रान्नंचप्रधानंस्याच्चित्रारोगापनुत्तये।होमसंख्यासमु
द्दिष्टाशतमष्टोत्तरंतपा॥स्वातौमासद्वयंरोगःप्राणिनांजायतेध्रुवं।वायुश्चदेवतांतत्रमृगारूढ
श्चमेचकः।असिचर्मधरःश्रीमानूर्ध्वभुजःपरिकीर्तितः।वायवायाहिदर्शतमधुच्छंदावायु
र्गायत्रीपूजादिमंत्रः।गंधश्चकृष्णागरुःप्रोक्तःसएवधूपनंमतं॥धत्तूरैःकुसुमैःपूजापवनस्यापि
सु३ दर्शिता॥दधिभक्तंतुनैवेद्यंयवान्नाज्यःप्रधानकं।होमसंख्यासमुद्दिष्टाशतमष्टोत्तरंतपा।विशा १८
खायांनृणांरोगोवासराःपंचविंशतिः।इंद्राग्नीदेवतेतत्रगजारूढौवाहनौमतौ।चतुर्बाहूसुवर्णस्य
निजरत्नविशारदौ॥पाशांकुशधरौयुक्तौतथान्नयविराजितौ।इंद्राग्नीआगतंसुतमित्यस्य

विश्वामित्रइंद्राग्नीगायत्रीतिपूजामंत्रः।कुंकुमंचंदनंगंधःशतपत्रैस्तुपूजनं।धूपस्तु
देवकाष्ठस्यनैवेद्यंगुडपायसं॥क्षीरोदनंप्रधानंचविशेषोरोगमुक्तये।होमसंख्यासमु
द्दिष्टाशतमष्टोत्तरंतपा।दिनानिदशरोगस्यानुराधायांविदुर्बुधाः॥पद्मासनोरक्तवर्णो
मित्रस्तस्यास्तुदेवता।पद्मान्नयकरःश्रीमानूर्ध्वभुजःपरिकीर्तितः।मित्रस्यचर्षणीधृतोविश्वा
मित्रोगायत्रीतिपूजादिमंत्रः।कुंकुमेनानुलिप्तांगःपुंडरीकैस्तुपूजितः॥धूपितश्चंदनेनैव
नैवेद्यंतत्रशरामतं॥प्रधानंसौरणःकंदःसाज्यएवनिगद्यते।एवंसंपूजितोमित्रोनवेद्रोगविमु
क्तये॥होमसंख्यापूर्ववत्॥ज्येष्ठायांज्वरउत्पन्नोवर्त्ततिदशवासराः।इंद्रोस्यदेवताप्रोक्ता
नक्षत्रस्यविशेषतः॥गजपृष्ठेसमारूढोदिव्यसिंहासनेविभुः॥श्वेतवर्णोवज्रधरोऽन्नयपाणिर्म
हाभुजः॥इंद्रोवाविश्वतश्शतिमधुच्छंदाइंद्रोगायत्रीतिपूजनमंत्रः॥चंदनेनसुगंधेनचर्चितांगो

दिवसान्तिः॥ पद्मपूजाविधानेन कर्पूरागुरुधूपनं॥ घृतौदनं च नैवेद्यं प्रधानं स्वरणो मतः॥
होमसंख्या पूर्ववत्॥ मूले मृत्फलं विप्रो गादपवा पंच वा षट् चैव वासरात्। रोगमुक्ताः प्रजायंते
व्याधिग्रस्तास्तु देहिनः॥ निर्ऋतिर्देवता तस्य प्रेतारूढस्तु मेचकः॥ खड्गखेटकधारी च दिग्
म्बरः परिकीर्तितः॥ मोक्षणं कथवा॥ निर्ऋतिर्गायत्रीति पूजादिमंत्रः॥ कृष्णागुरुविलिप्तांगः कृष्णसौ
वीरपूजितः॥ मुस्तावालकधूपेन धूपितं शांतिकृद्भवेत्। समांसपूरिकान्नं च नैवेद्यं परि
कल्पितं॥ प्रधानं मूलकं साज्यं वा ज्वेधानप्रियं करं॥ मद्यस्तं जुहुयात्तस्य रक्षः सं परिशांतये॥
एवं विप्रस्य कुर्वीत मूलरोगोपशांतये॥ ॥पूर्वाषाढाविधे ऋक्षे यदि रोगोऽत्र जायते॥ मृत्फलस्तु ७९
नियतस्तस्य यस्य व्याधिनिपीडनं। अपवा सप्तरात्रं च सप्तविंशतिवासराः॥ जलं तु देवतास्त
स्य शुक्लवर्णस्तु नागतिः॥ वरुणोस्य जलस्यापि स्वामी पूज्यतमो मतः॥ स्फोटिको सुवर्णस्यन्न
वा

त्वा वै पूज्यपते विभुः॥ मकरासनसंविष्टः पद्महस्तो न वेदिह॥ तत्वायामेति वरुणो गायत्री
ति पूजादिमंत्रः॥ विलिप्तश्चंदनेनाशु कर्कारैस्तु सुपूजितः॥ रौजजं धूपनं चात्र नैवेद्यं गुड
मंडकं॥ रोगा निर्मुक्तिदाः प्रोक्ताः सहतारकशालयः॥ प्रधानं नव्यमुद्दिष्टं सेर्बुद्धशास्त्रविशा
रदैः॥ होमसंख्या समुद्दिष्टा नाम्नष्टोत्तरं तथा॥ ॥उत्तराषाढिकाषाढा त्रिरात्रं रोगकारिणी॥
विश्वेदेवा देवताश्च श्वेतवर्णाश्चतुर्भुजाः॥ वरदाभयहस्ताश्च साक्षसूत्रांबुजाजनाः॥ विश्वेदेवा
सः आगतेत्यस्य नरवाजो विश्वेदेवा गायत्रीति पूजादिमंत्रः॥ गंधार्घ्यचंदनेन तेषां पुष्पं स्याच्छतप
त्रकं। अगार धूपनं दद्यान्नैवेद्यं पंचनद्रकं। समिधः क्षीरवृक्षस्य तंडुलाश्च प्रधानकं॥ अष्टो
त्तरशतं होमः रोगोत्पत्तिं नृणां दहेत्। श्रवणे तु समुत्पन्ना पीडा स्यात्षष्ठिवासराः॥ केचिन्न वदि
नान्याकृ विल्कि स्तत्रैव देवता। मूर्त्या तु कृष्णवर्णस्यात्पन्नगारानवाहनः॥ शंखचक्रगदापाणिः पीतवा

साक्षसूत्रधरोजः॥इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्रीतिपूजामंत्रः॥श्रीखंडलेपनंतत्रमालतीकु
सुमंततः॥दशांगंधूपनंतत्रसकर्पूरंप्रदीयते॥मंडकान्क्षीरसंयुक्तान्नैवेद्यंकरयासह॥त
स्मिन्होमेविधातव्यंप्रधानंरक्ततंडुलाः॥शतमष्टोत्तरंदविद्धिपनंरोगशांतये॥सार्धमासोगदो धा३
त्पत्तिर्धनिष्ठायांप्रजाते य॥वसवोदेवतास्तत्रश्वेतवर्णाश्चतुर्भुजाः॥वरदाभयपाणिस्तसा
क्षसूत्रकमंडलुः॥त्रायंतामिहदेवाविश्वामित्रऋषिश्चसर्वानुष्टुप्॥इतिपूजादिमंत्रः॥सकर्पू
रंचंदनंचगंधस्तत्रगुलावकं॥पुष्पंशतपत्राख्यंदत्तगुग्गुलुधूपनं॥गुडाज्यपूरिकादेया
नैवेद्यार्पेमनीषिभिः॥समिधःशमीदुग्धस्यप्रधानंहव्यमितवे॥शतमष्टोत्तरंसंख्याहवने
परिकीर्तिता॥ ॥त्रयोदशादिनारोगोक्लेशातन्निषाभिधे॥वरुणोदेवतातस्तत्रमकरो ८
परिसंस्थितः॥यष्टिपाशौधरःश्रीमान्गदापद्मद्वयस्तथा॥गौरवर्णश्चतुर्बाहुःश्वेतवस्त्रेण

रा १

वेष्टितः॥रोचनंगंधमुद्दिष्टंचंपकंकुसुमंतथा॥दशांगोधूपनेतस्यनैवेद्यंपायसंतथा॥वंसमि
धोवंजुलस्यापिप्रधानंक्षीरसंयुताः॥इमंमेवरुणेत्यस्यवरुणोमेधातिथिर्गायत्रीतिपूजा
शा३ दिमंत्रः॥संख्यात्रशतमुद्दिष्टंसार्धंरोगोपशांतये॥ ॥पूर्वाभाद्रपदायांतुसमुत्पन्नेवाति
दिदिने॥अथवाक्लेशकारीणिदिनान्येवैकविंशतिः॥अजैकचरणोदेवोदेवतास्यप्रकीर्ति
ता॥खड्गचर्मधरोवाग्मीभुजद्वयसमायुतः॥त्वाष्ट्रोदेवारत्निष्टइत्यस्याजएकपात्॥सिंधुद्वी
पोगायत्रीतिपूजादिमंत्रः॥हरिद्राचंदनंधूपःपुष्पंस्याच्छतपत्रकं॥नैवेद्यंमोदकाःपूपाःपाय
संसाज्यमुत्तमं॥प्रधानंवापितत्सर्वमुद्दिष्टंमनीषिभिः॥सहस्रंहवनंसंख्याशतंवापरिकीर्ति
ताः॥दशरात्रंत्नवेक्लेशोहिर्बुध्न्येदिदिनोमहान्॥विपः॥जोडितांबरसंवीतोजसन्मकर
कुंडलः॥गंधार्थेचंदनंतस्यपुष्पमागस्त्यमेवच॥उत्तनोहिर्बुध्न्यइतिऋजिश्वाहिर्बुध्न्यस्त्रिष्टु

अखंडितफलानिस्युः प्रधानं यत्र रात्रिविनः॥ शतमष्टोत्तरं संख्या हवने परिकीर्त्तिता।५

पूः॥ इति पूजादिमंत्रः॥ दशांगो धूपनं तस्य नैवेद्यं क्षीरषष्टिकाः॥ घृतोदनं प्रधानं च प्रोक्तं वेदार्थ
कोविदैः॥ शतमष्टोत्तरं होमः रेवत्यामष्टरात्रं च मरणं वा प्रजायते॥ पूजा च देवता तत्र पद्म
वर्णो बिजासनः॥ द्विभुजः पद्मपाणिः स्यात्पद्मगर्भप्रियो विभुः॥ पूषणं नु देवं वामदेवः पूषा
नुष्टुप्॥ इति पूजादिमंत्रः॥ रक्तचंदनगंधाढ्यो मंदारकुसुमप्रियः॥ धूपार्थे गुग्गुलुस्तस्य साज्यः प्रो
क्तो मनीषिभिः॥ तिलतंडुलपिष्टेन नैवेद्यं परिकीर्त्तितं॥ ५ ॥ इति श्रीनृसिंहभट्टविरचितायां विधा
नमालायां नक्षत्रशांतिविधानं॥ ॥ इति शरारसंबंधिपापशमनानि विधानानि प्रोक्तानि॥ ॥
अथ नागृहारिष्टशमनानि विधानानि वक्ष्ये॥ तत्र सुमुहूर्त्ते नरचिते सुदृढे गेहे उत्तमे अनिमि
त्ते सति यदारिष्टानि जायंते तानि वक्ष्ये॥ ॥ तथाहि॥ ॥ अकस्मात् दृश्यते गेहे छत्राकं व्रततीत ८।
रुः॥ शरघा पटलं सर्पा निर्गमं सलिलनो मुखात्। तैलपायिमशगो अश्वरदाश्च पिपीलिकाः॥ वृश्चिका

मत्कुणा देशाः तथा च विषमक्षिकाः॥ एतेषां दर्शनं पापं सद्मस्वामिभयप्रदं॥ तद्दोषशमनं प्रोक्तं वि
धानं पूर्वसूरिभिः॥ भुक्ते निपीडितु नेवारे विघ्नशांत्यै विधानकं॥ आचरेत्प्रयतो विप्रान् गृह्योक्तेन च
कर्मणा॥ श्वेतसर्षपतैलेन तिलैर्वामलकैः सह॥ स्नायान्नदीजले प्रातर्गृहस्वामी हितेच्छया॥ शुक्लां
बरधरः श्रीमान् शुक्लमाल्यानुलेपनः॥ कृत्वा उत्तमं उपंगैश्च उरस्त्रं गुणान्वितं। कारयेत्स्थंडिलं
तत्र स्थालीपाकं यथा तथा। स्वस्तिवाचनपूर्वं च होमकर्म समारभेत्। पालाशीः समिधो कृत्वा
रवादिरी वसिद्धकं॥ अयुतं जुहुयाद्विप्रान् गायत्र्या घृतपायसं॥ तिलैः सब्रीहिकैः साज्यैर्व्या
हृतीः परिकल्पयेत्॥ अपूपान् जुहुयात्पश्चात्स्वाहायसे च कृते समति॥ मोदकान् जुहुयात्पश्चाद्दोद
नं क्षीरषष्टिकाः॥ खर्जूरी नारिकेलानि सितो चापि यथा विधि॥ कदलानि च बिल्वानि बीजपू
रफलानि च। शांतिपाठं पठेद्विप्रान्सर्वारिष्टोपशांतये। विप्रोन्मिमत्रहस्वं च शक्तितिंमतशांतीश्रुतौ।

स्कंडिलान्पूर्वतः पीठे पूजिते माधवे सति॥ दुर्गयाश्च पिराजेंद्र विद्ध्यात्मनिपूजनं॥ मरुत्स्व कलश
स्नानेः स्नापिते गिरिजापतौ। नैवेद्यं पायसं दद्यात्सर्वारिष्टोपशांतये॥ दशपते यद्गृहे रिष्टजननं स्व
तर्जितन्॥ दद्याद्विप्राय कस्मैचिद्वस्त्रालंकारसंयुतं। गां प्रदद्यात्सवत्सां च सुव्रतां। जांच पय
स्विनीं॥ देवस्य त्वेत्यनेनैवमन्निषेकं प्रकल्पयेत्। एवं विधे विधानेकृते सति महीपते। गृह
रिष्टानि सर्वाणि नश्यंत्येव न संशयः॥ ॥इति त्वविष्णोत्तरे गृहारिष्टशमनं विधानं॥ ॥सनत्कुमा
र उवाच॥ ॥ष्टणु षण्मुखवक्ष्यामि गृहारिष्टं परं हितं॥ अकस्मान्मणिके त्वग्नेज्वलनं षण्मुखेष्टितं
णे॥ स्तुत्वितं वरुणं विद्यान् गृहिण्यामरणप्रदं। तच्छांत्यै विदधीत त्वं विधानं वारुणं शुभं॥ सुव
र्णप्रतिमां कुर्यात्जलाश्रयपतेः शुभां। निष्ककृत्यप्रमाणेन मकरं राजतं तथा। तदूर्ध्वं तो परिस्था
प्य वंशपात्रे सवस्त्रके॥ शतपत्रैस्तथा पापसैः श्वेतैर्वा किरवीरकैः। कल्हारैः कुसुमैश्चैव पूजयेत्प्रय ८२

तस्कृतं। चंदनेनानुसंलिप्य दशांगेनैव धूपयेत्॥ प्रधानं पायसं प्रोक्तं हवनं घृततंदुलैः। प्रधानं
पायसं साज्यं यजित्संख्याशतानि षट्॥ कदाचित्त्वं त्वग्नियमिति आजीगर्तेः शुनःशेप ऋषिः। वरु
णो देवता। गायत्री छंदः। इति हवनमंत्रः। ततो जपेत्सुधीः सूक्तं वारुणं प्रयतः पुमान्॥ होमांते
वरुणं दद्यादाचार्याय सवाहनं॥ दोग्ध्रीं धेनुं सुश्वेतवर्णां गां च दद्यात्स दक्षिणां॥ मणिकं नूतनं
दद्याद्ब्राह्मणाय कुटुंबिने॥ तिन्नं त्वस्कानवं तत्र स्थापयेद्देविकोपरि। मंत्रघोषैश्च विप्राणां तू
र्याणां च महास्वनैः। विवाहविधिवत्कार्यं प्रतिष्ठा मणिकस्य च। विप्रांश्च भोजयेत्पश्चाद्घृतपा
यसान्सदक्षिणान्॥ स्त्रीश्च संभोजयेत्तास्यो दद्याद्वस्त्राणि कंचुकीः। कर्णपत्राणि साधूनि कं
ठसूत्राणि चैव हि॥ हरिद्राकुंकुमं दिव्यं चंदनं सांजनं तथा॥ एवं कृते विधाने च सुशांतिर्जाय
ते गृहे॥ ॥इति मणिभंगविघ्नशमनं॥ ॥अथ पेषणी भंगशमनं॥ ॥यदा तु पेषणी भंगो जा

यते त्रिरिविवाहने। स्त्रियाश्चैत्तेन कस्याश्चित्तस्य विघ्नोऽस्ति जायते॥ वैधव्यं जायते नारी प्रसन्नैव
र वर्त्तिनी॥ पेषण्यां वा प्रयत्नाद्भार्या मात्मना चास्त्तहस्तवेत्। विधानं तत्र कर्त्तव्यं नरोहिणेनतमि
च्छता। पेषणी सप्तकं कार्यं वरवर्त्तिसमन्वितं। दृढोपलं सुसंस्निग्धं पेषणीलक्षणान्वितं॥ अ
त्तेतिथौ शुभे वारे शुभेयोगे विवाहने॥ स्नात्वा शुक्लेन तैलेन शुक्लवस्त्रसमावृता। ब्राह्मणा
न्वाचयेत्स्वस्ति ततो होमं च कारयेत्। गौरीर्मिमायेति ऋचा। पूजा होमौ प्रकल्पयेत्। स्थंडिलस्यो
त्तरे भागे स्थापयेत्पेषणीं शुभां॥ वरवर्त्तिसमायुक्तामष्टसौभाग्यसंयुतां॥ सौभाग्यैश्चैवमंत्रै
श्च सौभाग्यवसुसंयुतैः॥ पूजयेच्छतपत्राद्यैः पार्वतीपरमेश्वरौ। सुवर्णरजताभ्यां च विदधीत तन्मू
र्त्तयोः। अर्धनारीश्वरं स्तोत्रं जपेत्तत्र समाहितः। आचार्यो विद्वविप्राद्यैः सनार्यः शुभलक्षणैः। वस्त्र ८३
युग्मेन संवेष्ट्य पेषण्यां स्थाणुमेश्वरौ। ततश्चरुघृताभ्यां च हवनं हि निगच्छतोऽष्टोत्तरसहस्रं च

हुत्वा जाते वेशान्तं मतं। होमावसाने विप्रेभ्यो दक्षिणां परिकल्पयेत्। ततस्तादृषदः सर्वाः प्रसन्ना
न्यसरितो जल्पैः॥ हरिद्रया च तैलेन संलिप्य प्रयतांगना। सूत्रैश्च वेष्टयेत्सर्वास्त्रिवृत्या छिन्नया
सुधीः॥ हुत्वाष्टकं च सौभाग्यं पुरंध्रीषु निवेदयेत्। ततः कंचुकिकाः सप्त निदध्यात्पेषणीषु च॥ क
र्णपत्राणि तांबूलं कंठसूत्राणि चैव हि। तत्सर्वं विनिवेद्याथ पुरंध्रीषु च पंचसु। पंच पेषणीकाद
द्यादेकामाचार्ययोषिते। सप्तमीं पेषणीं गेहे स्वकीये स्थापयेद्बुधः। तत्रस्थौ दंपती देवी देवौ च प
रिपूजयेत्। आचार्याय प्रदातव्यो विदुषे स्त्रीत्रियायच॥ संभोजयेत्तु विधिवन्मिथुनानि य
थेच्छया॥ सप्त वा पंच वाद्वे वा वित्तशाठ्यविवर्जितः॥ दत्वा तांबूलदानानि प्रार्थयेत् लक्षणया
गिरा॥ अनुव्रजेत्स्वसीमां तं दंपती शुभगतेषु वै। आचार्यश्चाप्यनुव्रज्य प्रविशेन्निजमंदिरं॥ त
तस्स्वगोत्रसंपन्नां पारणां परिकल्पयेत्॥ एवं कृते विधाने च विघ्नानश्यंति तत्क्षणात्। फलं च व

कृते गेहे धनधान्यसमाकुले। अस्तुय्याज्ञायते तस्याः संततिः पुत्रपौत्रकी॥ ॥इति श्रीवि
धानमालायां पेषणीनंगविधानं॥ ॥अथ नंडोच्छायपक्षिपातजनितविघ्नहरं विधानं॥
नंडोच्छायस्य पंक्तिश्चेन्निपतेद्दुर्निमित्ततः। अरिष्टं तद्विजानीयात्सद्दनाधिपतेर्ध्रुवं॥ तच्छांत्यै
त्वरितं कार्यं विधानं विधिवित्तमैः॥ नंडानां पंक्तयः पंचदश विप्रेभ्यएव च॥ त्रियंबकेन मंत्रे
णहोममादौ प्रकल्पयेत्॥ समिधाहवनं कार्यं पालाशीनां शतं बुधैः। प्रधानं पायसं साज्यं प्रा
यश्चित्तं घृतं स्मृतं॥ कृत्वा स्विष्टकृतं विद्वान् शांतिपाठं पठेत्सुधीः॥ नंड पुंड्रं प्रत्नमाया अलवा
लेन तान्यसेत्॥ ब्राह्मणान्भोजयेत्पश्चाद्दक्षिणाभिः सुतोषयेत्॥ आचार्यं पूजयेत्कृत्वा वस्त्रालंका
रभूषणैः॥ एवं कृते विधाने च कल्याणं तत्र वर्द्धयेत्॥ ॥इति श्रीलं... संहितोक्तं नंडोच्छायपर्पंक्ति ८४
पातजविघ्नशांतिविधानं॥ ॥अथातो गृहस्तंभाधारस्तंभविधानं॥ नारदे॥ श्रीवत्सलंकहंससंवादे॥

चंद्रहास उवाच॥ ॥भगवन्गेहस्तंभे गृहाधारे च नृपते॥ महाविघ्नप्रदे न्हणां कथं शांतिस्तु जा
यते॥ ॥श्रीवत्स उवाच॥ ॥स्तंभे नेत्रभेयत्रश्रेष्ठ गृहाधारे पयाविते॥ विधानं तत्र कर्तव्यं नरे नृपते२
णहितमिच्छता॥ धनधान्यसमायुक्तं गेहं देयं विपश्चिता॥ अनावेस्य गृहं त्यात्यं त्यागात्मा वेयजे
न्नहविः॥ व्रीहीस्तिलसमायुक्तान्सघृतान्जुहुयात्सुधीः॥ अष्टोत्तरसहस्रं च प्रधानं पायसं
स्मृतं॥ अष्टोत्तरसहस्रं च जुहुयात्तरुणाजसः॥ त्र्यंबकेन मंत्रेण गायत्र्या वा समाहितः॥ होमां
ते विधिवत्कृत्वा मंत्रैश्चैवाभिषेचनं॥ ततो वस्त्राणि विप्रेभ्यः प्रदद्यात्सुसमाहितः॥ आचार्यं प्र
णिपत्याथ दानमानैस्तु तोषयेत्॥ रजतं कांचनं दद्यात् धेनुं दद्यात्पयस्विनीं॥ एवं कृते विधा
ने च गृहशांतिर्भवेद्ध्रुवं॥ ॥इति श्रीगृहस्तंभजातस्तंभनंगदोषशमनविधानं॥ ॥अथाग्निद
ग्धगृहपुनराधानं॥ ॥श्रीवत्स उवाच॥ ॥अग्निदग्धे यदा गेहे पुनर्वासं विधीयते॥ तदा विधा

नमुद्दिष्टमृषिभिस्तत्वदर्शिभिः॥ कुड्यादि पातयित्वा च भूमिं च निखनेत्सुधीः॥ विधाय समतां
तत्र जलैरापूरयेत्ततः॥ कर्दमेन समालिप्य स्थंडिलं मार्जयेत्ततः। पंचामृतैः समभ्युक्ष्य मंडपं
च विधीयते। विदधीत ततः शांतिं वारुणीं ज्ञानवेदसीं॥ वारुणैरेव मंत्रैश्च वारुणीं परिकल्पय
न्॥ पलाशीः समिधस्तत्र वंजुलीर्वा शतं शतं। जुहुयात्स घृता राजन् तथा वैश्वानरीं पुनः॥
वा ५ वैश्वानरैश्च मंत्रैश्च समिधः खादिरास्तथा। अर्कस्यश्च साज्याश्च संख्यया च शतं शतं॥ स्थंडिले
द्विविधातव्ये मंडपाभ्यंतरे शुभे। आचार्यैर्यो समुद्दिष्टो ऋत्विग्भिः सह भूपते। वैश्वानरं त्रिशतां
तो च प्रधानं च घृतोदनं॥ उत्तिष्ठ ब्रह्मणस्पते इति मंत्रेण हवनं परिकल्पितं। अष्टोत्तर सहस्रं ८५
च जुहुयात्प्रयतो द्विजः॥ मनोज्योतिर्जुषतामिति स्याद्वारुणीयजिः। अष्टोत्तर सहस्रं च ह
वनं परिकल्पितं॥ पायसेन प्रधानेन साज्येनैव च भूपते। होमांते वह्निवरुणावाचार्याय प्रद

पयेत्। स्तुत्वा हेममयौ सम्यक् सालंकारौ देसे द्दक्षिणां। आचार्याय स्वयस्तस्मै दद्यात्तं वि
धिवन्नृप। ऋत्विग्भ्यश्च धनं देयं वस्त्रालंकारसंयुतं॥ गामेकां च ततो दद्यात् ब्राह्मणाय
कुटुंबिने॥ वरुणप्रीतये मेषमग्निप्रीत्यर्थमेव च। एवं कृते विधानेन पुनर्गेहं समारभे
त्॥ आयव्ययौ विशोध्यात्र नैव कार्या विचारणा। ब्राह्मणान्भोजयेन्नित्यं यथाशक्ति य
थावसु। यावत्समाप्यते गेहकर्म राजकुलोत्तमा। एवं प्रशाम्यति स्थाने ह्यनलनस्योपघात
जा॥ ॥इति अग्निदग्धगृहपुनराधानविधानं॥ ॥अथ ग्रामारिष्टनामनानि विधाना
नि॥ ॥जंबूकाः श्वा काकाघ्राः कुरंगो वारुकस्तथा। ग्राममध्ये यदायांति ते सर्वे रिष्टसू
चकाः॥ ॥तथा च मत्स्यपुराणे॥ ॥ग्रामे वा नगरे वापि दिवासंक्रमते यदा। वृकादिश्वाप
दो रण्यो रिष्टं सूचयति दृष्टं॥ दस्यूनां न भयं त्वंतमग्रे स्यापि प्रजायते॥ राजिके देवि कं तत्र
ध्रु

ज्ञायते नात्र संशयः॥ ॥तथा च भारते॥ ॥गृध्रादि विहगा यत्र श्वापदाः शाखाकादयः॥
दृश्यन्ते फलदास्तां ग्रामे प्रविष्टा यदि वासरे॥ यदि वा फलमुद्दिष्टं तदर्द्धं निशि जायते॥ अर्द्ध
फलं दृश्यन्त्येते श्रुत्वा ये विनिवेशिताः॥ स्वेच्छया ये प्रतिष्ठास्ते ह्यसंपूर्णफलदा ध्रुवं॥ वि
धानं तत्र कर्तव्यं पौरैर्वन्हिलतापि वा॥ चतुःपथे शिवद्वारे तथा राजनिवेशने॥ मंडपं का
रयेत्स्थूलं चतुरस्रं सुशोभनं॥ पताकातोरणैर्युक्तं हृतं वस्त्रैर्मनोरमैः॥ तन्मध्ये स्थंडिलं कृत्वा
हवनं च समारभेत्॥ गणेशं पूजयेत्तत्र हेमपाठे सवस्त्रके॥ दुर्गामपि तथा भूतां क्षेत्रनाथं तर्दु
तथा॥ आ तू न इंद्र क्षुमंतमिति मंत्रेण गणनायकं॥ पूजयेत्स्नापयित्वा च नानातीर्थभवैर्जलैः॥
जपाया कुसुमैः कालसंभवैर्वसुरक्तकैः॥ क्षेत्रस्य पतिनेत्येवं क्षेत्रनाथं प्रपूजयेत्॥ गौ ८६
रीर्मिमायेति तथा दुर्गां दुर्गार्त्तिनाशिनीं॥ चंदनेन विलेप्याथ सकर्पूरेण साधुना॥ साधुनेति

मध्वेनेत्यर्घः॥ ततस्तु धूपयेद्धूपैर्दशांगैस्स घृतैस्तथा॥ दीपैर्नीराजयेत्पश्चान्नैवेद्यैः परितोष
येत्॥ तांबूलमर्पयेत्तेभ्यः॥ पुरस्ताद्भक्तिपूर्वकं॥ ततस्तु नाममंत्रेण प्रार्थयेत्प्रयतः शुचिः॥
एवं पूजादिसंस्कारैः पूजितं देवतात्रयं॥ प्रणम्य विधिवद्धोममाचार्यस्तु समारभेत्॥
विहिते विधिवत्कुंडे हुत्वा वन्हिमुखं सुधीः॥ पालाशीः समिधः सम्यक् अयुतं चाष्टपक
ष्टपक॥ प्रीतये गणराजस्य तथा क्षेत्राधिपस्य च॥ दुर्गाप्रीत्यर्थमेवाथ तथा च तिलसर्पिषा॥
तथा च पायसेनापि बिल्वपत्रैस्तथापि वा॥ द्राक्षाकदलखर्जूरी प्रियालबीजसंभवैः॥
अयुतं होमसंख्या च समुद्दिष्टा मनीषिभिः॥ द्राक्षादिफलसंघातैर्नैव संख्या समाकृताः॥
लक्षणं च यथोद्दिष्टं फलभागेषु कोविदैः॥ तत्रैव न संदेहः साज्यं सर्वं समाहुतं॥ प्रधानं
पायसं तत्र सर्वत्रेति विदुर्बुधाः॥ ततः स्विष्टकृतं हुत्वा प्रतिपूजा विधीयते॥ आचार्यं पूजयेद्

स्व हिरण्यरजतादिभिः। ततश्च विप्रवर्येभ्यः सप्तधान्यानि दापयेत्॥ बलिं दद्यात्प्रयत्नेन
ग्रामस्य सर्वतो दिशः। तैलं तक्रं विमिश्र्याशु प्रक्षिपेत्सर्वतोदिशं॥ उद्योस्कः सर्वजगतो ग्रा
३ स्तं॰ मस्यास्य विशेषतः। उद्योयस्यं नृपस्यास्य पौरैः सह निरंतरं॥ इत्फचौर्यमिश्रघोषैर्द्वर्याणां
च प्रतिस्वनैः॥ दानं दद्यात्प्रयत्नेन गोहिरण्यादिशक्तितः॥ ब्राह्मणान्भोजयेत्पश्चाद्विधि ८४
मोर्ध्वं न कारयेत्॥ एवं कृते विधाने च विघ्ना नश्यंति तत्क्षणात्॥ कल्याणं जायते ग्रामे नात्र
कार्या विचारणा॥ ॥इति श्री आरण्यश्वापदप्रवेशजनितग्रामारिष्टशमनं विधानं॥ ॥अ
न्यच्च कात्यायनीखंडे॥ ॥ऊं वातं विना वृक्षा निपतंति महीतले॥ उन्मूलंति जलाघातं विना
। क्लिश्यंति दग्धवत्॥ अपुष्पाः पुष्पिता वृक्षा अफलाः फलिता यदा॥ अपर्णा दर्शयंत्येव पर्णा ८१
नि विविधानि च। अन्येषां फलमन्येषु लग्नानि व्रततीषु च॥ इक्षूणां सस्यमायाति तपैव तु

विपर्ययः॥ अजला वापिकास्तोयैः पूर्णाः स्युर्जलदं विना। वर्षास्वपि घनो नित्यं जलश
निस्तु जायते॥ तदा महद्भयं विद्यात्पुरस्य विषयस्य च। विधानं तत्र कर्त्तव्यमुत्पन्नारिष्ट
शांतये॥ नृपो वा ग्रामणीर्वापि पौरो यश्चाधिकश्च कैन। कुर्याच्छांतिं प्रयत्नेन श्रेयो बुद्धिपरायणः।
पुरे कृतं विधानं च देशारिष्टविनाशनं॥ ग्रामे कृते ग्राम एवारिष्टं नाशमाप्नुयात्॥ वृक्षो यः क्लि
न्नतां प्राप्तस्तस्मिन्कुर्याद्विधानकं॥ आलवालं प्रकुर्वीत क्लिन्नवृक्षतले सुधीः। जलैस्तु पू
रयेत्स्वच्छैर्जपेत्सूक्तं च वारुणं। विप्रांघ्रिशौचनोयं च तीर्थतोयेन धीयते। तत्रापि प्रक्षि
पेन्नुमुत्पन्नारिष्टशांतये॥ यस्मिन्यस्मिंस्तरौ दृष्टमरिष्टं तत्र तत्र च। गोमूत्रं प्रक्षिपेन्मूले मू
लमंत्रेण बुद्धिमान्। जपं सहस्रनामानि विल्वस्तक्षिपुरस्सरः। ततस्तु विडितस्थूले मंडलेन रु
संनिधौ॥ जुहुयात्पायसं सम्यक् अयुतं संभृतं सुधीः। सुवर्णरजतं वापि दद्याद्दाचार्यतुष्टये।

वस्त्रयुग्मं ततो दद्यात् गामेकां च पयस्विनीं॥ द्विजानामयुतं सम्यक् भोजयेत्पाकसंचयैः॥ क
च२ दलानि साज्यानि शर्करासहितानि च॥ यथेष्टं प्रयतो दद्यात्कुर्यादित्त्वं वचनं॥ ब्राह्मणोत्तमः कु
र्वश्चैवं पाठं पठेत्सुधीः॥ घृतं च प्रबलं देयं पायसं शर्करान्वितं॥ सखंडं तैलपक्वं च व्यंजना
नि बहूनि च॥ भोजयेन्मिथुनान्येव गौरीशांकरतुष्टये॥ एवं कृते विधाने च विघ्नशांतिस्तु जाय
ते॥ ॥इति श्रीहस्तोद्भवारिष्टशमनं विधानं॥ ॥अथ कदलीपुष्पप्रसवजनितविघ्नशमनं॥ ॥ न५
पद्मपुराणे॥ ॥उमामाहेश्वरसंवादे॥ श्रीमहेश्वर उवाच॥ ॥यदा याम्यमुखा देवि कदली तु
प्रसूयते॥ तदा ग्रामपतेर्नाशं विद्धि नात्र संशयः॥ एवं विघ्ने समुत्पन्ने विधानं तत्र कारयेत्॥
सूतके वोपचर्यास्याः कदल्या इति मिच्छता॥ दशैव जागरं कार्यं होमं कुर्यात्ततः परं॥ कदल्येव ८८
द्यस्तु सर्वत्र विजयी भवेत्॥ मातंगिनी महामंत्रं त्रिषु लोकेषु दुर्लभं॥ सुरवैः पायेन ह्यासं
ति प्रोक्तं तव वरानने॥ त्रिपुरा भैरवी सिद्धिस्तथा त्रिपुरसुंदरी॥ राज्यलक्ष्मीर्महाराजलक्ष्मीस्तथै १८१
व च वनेश्वरी॥ मातंगिनी महामारी बाला वश्या महातथा॥ एताः सिंहासनस्थास्तु विद्या इति वि

दो विदुः॥ एतासां स्मरणं यस्य मंत्रपूर्वं दिने दिने॥ स राजसु भवेन्मान्यो नात्र कार्या विचारणा॥
एवं तु कथितं भद्रे नारदस्य च धीमतः॥ महाकारुण्यमनसा तेनासौ सुभगे मुनिः॥ किं स्याद्यत्र
फलं नृणां नात्र कार्या विचारणा॥ ॥इति श्रीविधानमालायां मत्स्यसंहितोक्तं मातंगीविधानं॥
अपोदकशुद्धिविधानं॥ ॥उदकी सूतकी चैव पीड्यमाना ज्वरादिभिः॥ स्नाते तदा त्तमाकार्या
स्पृष्ट्वा जातकृतिः॥ तथा च वदिष्टस्मृतौ॥ ज्वराभिपीडिता नारी सूतकी च तथोदरी॥ स्पृष्ट्वा स्पृ
ष्ट्वा स्नानैः शुध्या परैस्तैर्भवेत्॥ आर्तस्नागास्रीरस्य के शाद्यात्परिकल्पिताः॥ पादांगुल्यव
धि प्रोक्तो मंत्रैर्वारुणसंभवैः॥ तथाहि॥ केशाग्रे१ केशमध्ये च२ केशमूले च मस्तके॥४ ललाटं५ भ्रू
तले६ कर्णौ७ नेत्रे८ नासापुटे९ तथा॥ ओष्ठौ१० दंता ११ चौ॥ चिबुके१२ रसना१३ हृदयमेव च॥ कं
ठस्तु१४ स्कंधयुग्मं च१५ बाहुयुग्मं तथैव च१६ कर्पटौ च१७ कराग्रं च१८ तथा वक्त्र१९ स्तनद्वय२०

स्तनयोर्मध्यभागश्च २१ कटिद्वयस्समंततः परं । उदरं २३ नाभिदेशश्च २४ तथा पृष्टिः २५ कटिस्त
था ॥ २६ ॥ जघनं २७ योनिभागश्च २८ ऊरू २९ जानू ३० सक्थिनी ३१ जंघे च ३२ गुल्फे
द्वे च ३३ पादांगुल्यो ३४ नखानि च ३५ विलिख्य संस्पृशेद्विद्वान् एकैकं शुद्धिहेतवे ॥ सूतकां
पंचदश प्राजापत्याननुशुद्धिहेतवे दद्यात् । ततो निषेचयेन्नारीं गृहीतान्यंशुकानि च ॥ ब्रा
ह्मणान् भोजयेत्पश्चात्तस्माद्दृषिवचो महत् । तथाहि । सोमः शौचं ददौ स्त्रीणां गंधर्वश्च शु
भां गिरं ॥ पावकः सर्वमेध्यत्वं मेध्या वै योषितो यतः ॥ ॥ इति श्रीविधानमालायां वशिष्टस्मृ
त्युक्तं उदक्यासूतकी शुद्धिविधानं ॥ ॥ अथ विरजापात्राविधानं ॥ ॥ आदित्यपुराणे ॥
सूर्यउ ॥ ॥ यस्य नास्ति सुतः पुंसो यस्य वैधव्यसंयुतः ॥ महारुद्रैर्गृहीतात्मा स गच्छेद्विरजं प्रति । १८२
तत्र पात्राविमयः । गंतव्यं श्वो दिने येन पात्रायै विरजस्य वै । आद्येऽह्नि दिवसे तेन भोजनीया द्विजो

त्तमाः ॥ लक्ष्मीनारायणप्रीत्यै स्त्रिभिः सार्द्धं महामते ॥ पंचाशन्मितु पुनान्ये वस्त्रालंकारवापि स
माहितः ॥ वस्त्रैस्तु दक्षिणादानैर्यथावित्तं वमात्मनः ॥ निष्पाद्य विधिवत्कृत्वा गृहे स्तेत्य वि
धिं सुधीः ॥ भुंजीयाद्धस्वयं पश्चात्ततस्तस्य कुटुंबिनी ॥ समाप्य विधिवत्सायं विधिं सायंतनं
सुधीः ॥ न्यूमिशा यास्त्रियासा द्यस्त्रियासार्द्धं महामते । नियमं ब्रह्मचर्यस्य गृहीत्वा दृढमात्म
नस्सः । प्रातःकाले समुत्थाय दंतधावनपूर्वकं । प्रातर्विधिं समाप्यैव निर्गच्छेद्विरजं प्रति ॥ ॥
तत्र यात्रानिर्गममंत्रः ॥ ॥ अद्य प्रभृति यात्रायै गृहीत नियमः स्वयं । दर्शनेश्शुरइं मातः
कमले तव पादयोः । इति कृत्वा विधिं सम्यक् स्वस्तिवाच्य द्विजोत्तमः ॥ हृष्टपुष्टमना वक्ष
निर्गच्छेत्सुखस्तिकृये ॥ योयेन वर्त्मना याति विरजं तीर्थमुत्तमं ॥ तत्र वर्त्मनि यान द्योघोषाः
सागरबुद्बुदयः ॥ नास्तु कवल्पते ॥ गोतमी तपती तीरे तु कृष्णा भीमरथी तथा ॥ तद्वर्त्मखलुसा ध्रुनां

नृणांविरजयायिनां॥प्राप्यस्नानंप्रकर्त्तव्यंशेमश्राद्धंयथाविधि।विरजत्रासेदृष्ट्वाप्रणिपत्यमु
कुर्मुकुः॥दृष्ट्वागंगात्रयंस्नानंपुण्यंकर्पूरितंस्मृतः॥अमासोमसमायोगेविरजेफलमुत्तमं।आ
दित्येसूर्यतीर्थगमनंनरास्यतेबुधैः॥ब्राह्मंमुहूर्त्तमुत्थायस्ना त्वागंगाजलेमले।आदित्यंता
स्करंतीर्थउदुंबरतलंवरं॥जलंदृष्ट्वामहापुण्यंदेवानामपिदुर्लभं॥तत्रस्नात्वामहातीर्थेवि
दध्याज्जलतर्पणं॥प्रातविधिंसमाप्याथहिरण्यश्राद्धमाचरेत्।तर्पयित्वापितृन्देवान्हिरण्याद्यै
र्महाधनैः॥अन्नदानंततोदद्यात्ब्राह्मणायसदक्षिणं॥कलशंस्थापयित्वाथयज्ञवृक्षस्यदक्षि
णे॥तस्योपरिविधायैववंशपात्रंमनोरमं॥तस्योपरिन्यसेद्वस्त्रमछिन्नंमचकुंकुमं॥स्थाप
येत्तत्रदेवानांब्रह्मादीनांत्रयंशुभं॥तत्वास्वर्णमियंवस्त्रप्रत्येकंपलसंख्यया।तदर्द्धेनप्रकर्त्त १८३
व्यंयथावित्तवमात्मनः॥संस्नाप्यसादरंदध्नामधुनाज्येनसर्पिषा।एकैकशोयुतंविद्वान्गंध

धपुष्पाक्षतादिभिः॥धूपैर्दीपैश्चनैवेद्यैस्तांबूलैश्चसदक्षिणैः॥ततोवन्हिमुखंकृत्वाजुहुया
त्तिलसर्पिषा।एकैकशोयुतंविद्वान्मंत्रैरेतैःपृथक्पृथक्॥तेचमंत्राः॥ब्रह्मजज्ञानमितिब्र
ह्मणोमंत्रः।तद्विष्णोःपरमंपदमितिविष्णोः।अस्मेरुद्राइतिरुद्रस्य।होमांतेचविधिवद्दद्यात्पू
र्णंदद्याद्धिरंचये।विष्णवेमेचरुंदद्यात्सोपधानंसदक्षिणं॥रुद्रायवृषभंदद्यात्सुरत्नंसंचध
रंधरं॥ब्राह्मणान्भोजयेत्पश्चात्संपूज्याचार्यमादरात्॥मूर्त्तिर्निवेद्यतस्मैतान्अन्येभ्योभूरिद
क्षिणा॥एवंनिष्पाद्यतत्सर्वंप्रार्थयेद्यज्ञपादपं॥तत्रप्रार्थनामंत्रः॥हेमक्षीरमहाविष्णो
चतुराननशंकर॥पूजितेत्वयिवृक्षेचपूजिताःसंतुदेवताः।कामान्मेसफलान्सर्वान्विधे
हिसततंप्रभो॥इतिसंप्रार्थ्यतंवृक्षंकृत्वाचैवप्रदक्षिणां।प्रणम्यविधिवद्भक्त्यात्यागच्छेन्नि
जमंदिरं॥आगत्यमंदिरंविप्रान्भुंजीयात्कार्ययासह॥इत्यादित्यवारेउदुंबरपूजाविधानं॥

उद्वासनानि वस्त्राणि तथा कर्णावतंसकान्। ब्राह्मणेभ्यो प्रयोगतान्दद्यात्कर्णसूत्राणि चैव हि। रूप्याणि विविधान्येव ज्ञानकोशा ३ नये सुधीः ३

अमासोमसमायोगे प्रातरुत्थाय मानवः॥ तत्वा गंगा त्रये स्नानं निर्गच्छेद्विरजं प्रति॥ य
त्र गंगा त्रयस्यौघो मिश्रीभवति निश्चयात्॥ विरजे नागयतो नृणां गदाधर समीपतः॥ त
त्र स्नानं प्रकुर्वीत महापातकशांतये॥ ततस्तु बुद्धिमान्गच्छेन्मतार्थं सुचिव्रतः॥ त
त्र स्नानादिकं कृत्वा पश्येत्पूर्णामेश्वरं सुधीः॥ तत्र मंत्रः॥ रामपत्नी महाभागे पुत्रपसूत्रे निरा
मये॥ गृहाणेमानि सूर्पाणि मया दत्तानि जानकि॥ ॥इति सूर्पप्रतिपादनमंत्रः॥ ॥कंचु
की वस्त्रयुग्मे च तथा कर्णावतंसके॥ कर्णसूत्रे च यूषान्निः प्रीयतां गिरिनंदिनी॥ ॥इति वस्त्रा
दिसमर्पणमंत्रः॥ ॥स्नातं वा यत दृष्ट्वा तथैव पंचविंशतिः॥ द्वादशाद्वादशा दृष्ट्वा तोषयेत्
जनकात्मजां॥ ततस्तु सूरिदानानि कृत्वा तत्र महामते॥ निर्गच्छेद्भक्तितीर्थस्य समीपे श्रद्ध १५४
यान्वितः॥ तत्र स्नात्वा जले पुण्ये वैरजे भक्तिसंयुतः॥ तर्पयित्वा पितॄन्सम्यक्कुर्याच्चतिलस

र्पिषा॥ अग्निं हुत्वा मितिन्द्वचा गायत्र्या वा समाहितः॥ अष्टोत्तरशतं विद्वान्मेषं दद्यात्सदक्षि
णां॥ मेषाजान्ते प्रदद्याच्च पट्टमोर्णं द्विजातये॥ तदन्नावे यथाशक्ति स्वर्णं दद्याद्द्विजात
ये॥ तद्दानमंत्रः॥ ॥मेषवाह महाबाहो सप्तजिह्व सुरेश्वर॥ प्रीतो भवानलस्त्रीमान्मेषे दत्ते
सुरेश्वर॥ ऊर्णपट्ट मनुध्येयं स्वर्णबीजं तव प्रभो॥ त्वं गृहाण देवेश पापं संहर सत्वरं॥
॥इत्यौर्णपट्टदानमंत्रः॥ ॥ततो निर्गम्य गोविंदवधत्रं तां कमलां सतीं॥ संप्राप्य प्रयतो न
त्वा दंजवत्स्वतो मुकुः॥ तत्र स्नात्वा जले पुण्ये स्त्रियो दृष्टिनिपातने॥ पुष्पाणां प्रकरैर्देवीं कम
लां परिपूजयेत्॥ चंदनेनानुसंलिप्य धूपयेद्धूपसंचयैः॥ दीपैर्नीराजयेत्पश्चान्नैवेद्यैः परि
तोषयेत्॥ कर्पूरसमवेतेन तांबूलेन प्रतोषयेत्॥ नव्ये च रवाससी देवीं कमलां परिधापये
त्॥ मुक्तमुक्तः प्रणम्यैव वर्णयेत स्तोत्रसंचयैः॥ ततस्तु मार्पयेद्भक्त्या च त्वा चैव प्रदक्षिणां॥

निर्गत्य स्नानतस्तस्मात्तारातीर्थमनुव्रजेत्॥ दृष्ट्वा तज्जलकल्लोलं क्षीरसंकूपसंयुतं॥
अकस्मात्संस्कृतं तोयं स्नायाद्बुद्धेन तेजसा। तत्र दद्याद्घृतं तैलं राजतं पात्रदंतपा। मुक्ताफल
निशारत्नं विद्रुमाणि तथैव च॥ सनत्कुमाराय यथा। वित्तशाठ्यविवर्जितं॥ ततस्तत्तत्पयः
पीत्वा चुलुकैः सप्तभिः सुधीः॥ समुच्चरेच्च पापानि यथा नाकः स्मृणोत्पलं॥ यानि घोराणि पा
पानि विलयं यांति तानि वै। तस्मादुत्तरतो गत्वा गान्धर्वंतीर्थमुत्तमं॥ ततस्नानस्तकताराख्ये ना
गविदानमादिशेत्॥ चामरं व्यंजनं छत्रं पादुका करपत्रिका॥ वस्त्रयुग्मेन चान्नानि चरत्नस्त
त्राणि चैव हि॥ नागर्वं च समुद्दिश्य ब्राह्मणाय निवेदयेत्॥ ततस्तूत्तरतो देशे देवसिद्धेश्व
रि सुधीः॥ ताम्रनागं च विन्यस्य देवमूर्त्तिषु बुद्धिमान्। पूजां प्रकल्पयेत्स्रजत्वाक्षतधान्यैः सु १८५
शोभनैः॥ ततो गदाधरं देवमाव्रजेत्प्रयतः पुमान्। गयाश्राद्धं प्रकुर्वीत यथाविधि यथावसु॥

तातानि गत्यैवैराजलक्ष्मीमानस्य भक्तिमान्। गंगात्रयजलं पीत्वा मंदिरं स्वं समावि
शेत्। तत्र दद्याच्च दानानि हेमरौप्यादि शक्तितः॥ तत्र विरजोदकप्राशनमंत्रः॥ ॥
येमऊक्षिगता दोषाये मगर्भविमोचकाः। ते सर्वे विलयं यांति विरजांभो निषेवणात्।
एवं वृत्ते विधाने च विरजे विरजा भवेत्। सर्वव्याधिविनिर्मुक्तो जीवेत्तच्छरदां तं समाः॥
लभते पुत्रसंपत्तिं सर्वान्कामानवाप्नुयात्॥ ॥इति श्रीविधानमालायां विरजयात्रावि
धानं॥ ॥अथार्धोदयविधानं॥ ॥अगस्त्य उ०॥ ॥भगवंस्त्वत्प्रसादेन श्रुतोयं व्रत
विस्तरः॥ अर्धोदयं च मे ब्रूहि दुर्लभं हि चराचरे॥ जीवितप्राणिनां पुण्यं यदि लब्धमेप्रभो।
कथं कार्यं च तेन किं स्यात्फलं कपयषण्मुख॥ ॥स्कंद उ०॥ ॥श्रूयतां पुण्ययोगोयं दुर्लभो
र्धोदयः किल। तिर्यग्भिर्मनुष्यदेवानां दुःप्रापः सर्वकामकः॥ माघामायां व्यतीपाते आदित्ये विष्णु

दैवते। अर्द्धोदयः स विख्यातः सहस्रार्कग्रहैः समः॥ तथा च। अमार्कपातश्रवणैर्युक्ता चेत्पुष्य
माघयोः॥ अर्द्धोदयः स विज्ञेयः सूर्यग्रहशताधिकः॥ पुरा कृतं वसिष्ठेन रामचन्द्रेण सुव्रत॥
सनकाद्यैर्मनुष्यैश्च बकुन्तिर्मुनिसत्तमैः। अग्निष्टोमसहस्रैश्च इष्टं लभति कं जनः। व्रतानां
यज्ञतीर्थानां फलं येन तत्तल्लभेत्। मानसे विष्णुतीर्थे च यत्पुण्यं स्नानदानतः॥ अर्द्धोदय
विधानेन लभते तेन फलं नरः॥ नारी वा पुरुषो वापि दम्पती वा समाहितौ। विरोधसंचारी वा कुर्या
दर्द्धोदयव्रतं॥ अश्वमेधायुतं पुण्यमिष्टापूर्त्तं च यद्भवेत्॥ गवां च रक्षणे पुण्यं तदर्द्धोदयलब्ध
ल्लभेत्॥ वाचि सत्यं दृढा लक्ष्मीः संततिर्धनपायिनी॥ आयुर्यशो निवृद्धिश्च विधानेन लभते नरः॥ १८६
इन्द्राग्नियमलोकेषु निर्ऋत्यै च पयःपतौ॥ यद्वायव्यकुबेरेषु ईशानेषु विधानतः॥ कोटि
दानेन धेनूनां प्रतायेनार्थवासिनः॥ अर्द्धोदयविधानस्य कलां नार्हति षोडशीं॥ ब्रह्मलोका

धिपतित्वेन स्वर्लोकपालनेन यत्॥ फलं प्रोक्तं मुनिवरैस्तत्फलं लभते हि सः॥ ततो हि
रण्यगर्भस्य प्रजानां परमेष्ठिनः॥ अर्द्धोदयविधानस्य फलं प्राप्नोत्यविच्युतं॥ ततो विष्णुः
सुवर्णस्य त्रैलोक्याधिपतिर्भवेत्॥ शंखचक्रगदाधारी वनमाली हरिः स्वयं॥ ॥अगस्त्य उ०॥
स्कंद केन विधानेन कर्त्तव्यं व्रतमुत्तमं॥ अर्द्धोदयाख्यं देवेश तद्ब्रूहि मम पृच्छतः॥ ॥
स्कंद उ॥ ॥कृतं कृतं वशिष्टेन त्रेतायां रघुणा कृतं॥ द्वापरे धर्मराजेन कलौ वृद्धिरेण च॥
अन्यैर्देवमनुष्यैश्च घनवैर्द्विजसत्तम॥ कृतं धर्मोदयं सम्यक् सर्वकामफलप्रदं॥ माघमासे
तु पौषे वा दर्शे सूर्यदिने श्रुतौ॥ पूर्वाह्णे संगमे स्नात्वा श्रचिन्त्वा समाहितः। सर्वपापविशुद्ध्यर्थं
नियमस्थो भवेन्नरः॥ त्रिदैवतं व्रतं देवा करिष्ये भुक्तिमुक्तिदं॥ भवंतो सन्निधौ मे द्य त्रयो देवा
स्त्रयोग्नयः॥ ॥इति नियमस्वीकरणमंत्रः॥ ॥ब्रह्मा विष्णु महेशानां स्तुवर्णपलसंख्यया कर्त्त

व्यं ब्रह्मविष्ण्वीशाय यथाध्यानं प्रयत्नतः॥ वित्ताभावे पलार्द्धेन तदर्द्धार्द्धेन वा तथा॥ सार्द्धद्रोणत्रयं
द्रोणैर्द्रोणेन नां तिलपर्वतः॥ ब्राह्मणेनैव प्रकर्त्तव्यो नात्र कार्या विचारणा॥ कर्त्तव्यो विष्णुरूपा
त्मा गिरिः पूर्वोक्तसंख्यया॥ शय्यात्रयं ततः कुर्यादुपस्करसमन्वितं॥ देवानां त्रयमुद्दिश्य क
र्त्तव्यं तत्कृतं क्रमात्॥ ब्रह्मविष्णुशिवप्रीत्यै दातव्यं तु गवां त्रयं॥ हिरण्यभूमिधान्यादि दानं
वित्तवसारतः॥ दातव्यं श्रद्धयोपेतं ब्राह्मणेभ्यः प्रयत्नतः॥ मध्याह्ने तु नरः स्नात्वा शुचिर्भूत्वा स
माहितः॥ तिलपर्वतमध्यस्थं पूजयेद्देवतात्रयं॥ आदौ ब्रह्मपूजा॥ नमो विश्वसृजे तुभ्यं सत्याय
परमेष्ठिने॥ देवाय देवपतये प्रजानां पतये नमः॥ ॐ ब्रह्मणे नमः॥ पादौ हिरण्यगर्भाय वै नमः॥ १८७
ऊरू त्वां धात्रे नमः॥ जानुभ्यां जंघाभ्यां परमेष्ठिने नमः॥ वेधसे च नमो गुह्ये पद्मोद्भवाय
स्तनयोः॥ हंसवाहनाय नमः॥ कटिदेशे सनातनाय नमः॥ दक्षिणवक्त्रे सामवेदाय नमः॥ पश्चिम

वक्त्रे अथर्ववेदाय नमः॥ उत्तरवक्त्रे यजुर्वेदाय नमः॥ पूर्ववक्त्रे ऋग्वेदाय नमः॥ ततो लोकपालपू
जा॥ एवं ध्येयं त्वं हिरण्यगर्भपुरुषप्रधानव्यक्तरूपक॥ प्रसादसुमुखो भूत्वा पूजां मे सफलां कु
रु॥ इति प्रार्थनामंत्रः॥ ॥नारायण जगन्नाथ नमस्ते गरुडध्वज॥ पीतांबर नमस्ते त्वं जनार्दन
नमोस्तुते॥ अनंताय नमः पादौ विष्णुरूपाय वै नमः॥ ऊरू त्वां च मुकुंदाय जानुभ्यां गोविंदा
य नमः॥ जंघाभ्यां च युगध्येय प्रद्युम्नाय नमः॥ पद्मनाभाय नमो नाभौ भुवनोदराय नमः॥ उ
दरे वत्सासि कौस्तुभ वत्सलेन नमः॥ चतुर्भुजाय भुजाभ्यां नमः॥ वदने विश्वतोमुखाय नमः॥
सहस्रशीर्षमौलौ॥ आदित्यचंद्रनयन दिग्वासो दैत्यसूदन॥ पूजा दत्ता मया तुभ्यं गृहाण
करुणाकर॥ ॥इति विष्णुपूजामंत्रः॥ ॥अयमेव प्रार्थनामंत्रः॥ ॥महेश्वर महेशान नमस्ते
त्रिपुरांतक॥ जीमूतकेशाय नमो नमस्ते वृषभध्वज॥ ईशानाय नमः पादौ जंघाभ्यां चंद्रशेखर।

जानुभ्यां पादयोरेव पादाभ्यां शंकरः स्मृतः॥ उमाकांताय गुह्ये च नाभौ वै नीलरुग्लोहितं॥
उदरे रक्तवस्त्राय कण्ठे नागोपवीतिने॥ नोगीयुक पूजयेद्रुद्रं नीलकंठं स्तकंठगः॥ मुखे पंच
वक्त्राय मौलौ चैव कपर्दिने पूजयेत्॥ अंधकारे प्रमेयात्मानं मैत्रो कानकाय च। पूजा दत्ता
मया भक्त्या गृहाण वृषभध्वज॥ ॥इति महेश्वरपूजामंत्राः॥ ॥इति पूजाक्रम प्रोक्तो मंत्रैरे
तैः प्रयत्नतः॥ आचार्यं पूजयेद्भक्त्या वस्त्रालंकारभूषणैः॥ हस्तमुद्रा कर्णमुद्रा पादं छत्रं क
मंडलुः॥ श्वेतवस्त्रयुगं देयं ब्राह्मणे सर्वतस्तये। पीतवस्त्रयुगं विष्णोर्जो हितं शंकरस्य तु॥
पंचामृतेन स्नपनैः पूजये कुसुमैः स्वकैः। स्वकैरिति कमलैर्ब्रह्मणः। विष्णुं कंसं पूजयेद्दामा
नूत्रलशीदलपूजया। शंकरं पूजयेत्पश्चाद्बिल्वपात्रैरखंडितैः। तत्कालसंभवैर्द्रव्यैः पूजये
त्तु यथाक्रमं॥ यथाशक्त्या तु कर्त्तव्यं व्रतमेतत्सुदुर्लभं॥ जीवितं प्राणिनां चैव अनित्यं तं यथा॥ १८८

अथ व्रतांगहोमविधिः॥ ॥देवतात्रयमुद्दिश्य शास्त्रदृष्टेन कर्मणा। प्रजापतये विश्वरूपा
य रुद्राय इति मंत्रेण वह्निं संस्थाप्य तक्तितः। ततो होमं प्रकुर्वीत यथाविभवसंभवं। अ
ग्नये प्रजापतये स्वाहा। अग्नये विश्वरूपाय स्वाहा। अग्नये रुद्राय स्वाहा। ॐकारपूर्वमु
च्चार्य मंत्रमेतं द्विजोत्तम। त्रिदेवत्याय जिह्वा च स्वाहांतपरिकल्पिता॥ होमस्तु चरुणा का
र्यो घृताक्तेन द्विजन्मना॥ प्रजापते न त्वदेतान्य इति मंत्रेण प्रजापतये होमः। इदं विष्णुरिति
विष्णवे। त्र्यंबकमिति महादेवाय। तैर्मंत्रैर्घृतहोमः। ब्रह्मणे विष्णवे रुद्राय स्वाहेति पू
र्णाहुतिः॥ धर्मांत इति मंत्रं धर्मध्येर्नामभिः यजवितमुच्चार्य आहुतिं निक्षिपेत्। होमाव
साने गां दद्यात्। तरुणीं रूपसंपन्नां सुशीलां च पयस्विनीं॥ स्वर्णशृंगीं रौप्यखुरां ताम्रपृष्ठीं
सवत्सकां॥ रत्नपुच्छीं तथा वस्त्रां घंटाभरणभूषितां॥ चामरैः पंचभिर्युक्तां कांस्यदोहां स

दक्षिणां॥ आचार्याय सुशीलाय श्रोत्रियाय कुटुंबिने॥ दत्वा तां धेनुकां धीमान्सर्वकामान
वाप्नुयात्॥ तेन दत्तं कृतं तत्र तेन इष्टं यज्ञैः सहस्रधा॥ अर्द्धोदयस्य सामर्थ्याद्विधानस्य विधान
तः॥ पूरितं पायसेनैव साज्येन च सदक्षिणं॥ कांस्यपात्रं मुनिश्रेष्ठ दद्याद्विप्राय सुव्रत॥
सूर्यमुद्दिश्य विप्रर्षे महापापोपशांतये॥ एवं कृते विधानेस्मिन्सर्वान्कामानवाप्नुयात्॥
इति श्रीविधानमालायां स्कंदपुराणे अर्द्धोदयव्रतविधानं॥ ॥अथ कपिलाषष्ठीविधानं॥
भाद्रे स्कंधे तिथौ षष्ठ्यां [illegible] रोहिण्यां भौमवासरे॥ व्यतीपाते महायोगे कपिलाषष्ठिरुच्यते॥ ष्
र्यसंयोगे महापुण्ये नृणां तापानुसारतः॥ तदा धर्मस्य सिद्ध्यर्थं विधानं क्रियते बुधैः॥ सूर्य
नारायणो देवः स्वर्णमूर्तिं सुलक्षणां॥ पलेन कारयेद्धीमान्तदर्द्धार्द्धेन वा पुनः॥ रूप्यं रौप्यम १८९
यं कुर्यात्पलैरष्टभिरावृतं॥ सप्तभिस्ताम्रगे साई ध्वजास्तंनसमन्वितं॥ तत्र तं विन्यसेद्देवं सूर्यं

नारायणं प्रभुं॥ द्विभुजं पद्महस्तं च गरुडाग्रजसारथिं॥ पुण्यकालेयदा राजन्कृतस्नानो
नरोत्तमः॥ यो वा को वा क्रियायुक्तः कुर्यादेतद्विधानकं॥ तर्पयित्वा विधिवद्देवान्श्रद्धया
परया युतः॥ विधानं प्रारभेद्धीमान्सर्वकामप्रसिद्धये॥ स्वस्तिवाचनपूर्वं च हवनं कारयेद्बुधः॥
अग्निवक्त्रं ततः कृत्वा तिलाज्यं जुहुयात्ततः॥ सहस्रसाविच्या तत्र तद्धनं स्मृतं॥ स्विष्टकृतं स
र्पिषा॥ होमादौ पूजितं सूर्यं होमांते प्रतिपूजयेत्॥ पुष्पैः कालोद्भवैर्गंधैर्नैवेद्यैश्च यतः पुमान्॥
सकर्पूरेण धूपेन धूपयेत्तदनंतरं॥ दीपेनीराजयेत्स्निग्धैर्नैवेद्यैः परितोषयेत्॥ वासोयां
कपिलां साध्वीं बहुक्षीरां सुलक्षणां॥ सुप्रजामितिजीवत्प्रजां अव्यंगां च वत्सां। नवाम्रपल्लववा
सां पीतनेत्रां घटस्तनीं॥ समश्रृंगीं सुताचारां सालंकारां सवत्सकां॥ तां गां यत्नेन संपूज्य वस्त्रयु
ग्मेन वेष्टयेत्॥ दंडवत्प्रणिपातेन प्रणम्यांजलितत्परः॥ आचार्याय सुशीलाय सुवर्णयिप्रदाप

येत्॥ तत्र दानमंत्रः॥ सर्वदेवमयी दोग्ध्री सर्वलोकमयी तथा। सर्वलोकनिमित्तां गां सर्वदेवन
मस्कृतां॥ प्रयच्छामि महासत्वामक्षय्याय शुभामिमां॥ या लक्ष्मीरिति। या लक्ष्मीः सर्वभूतानां
या च देवे व्यवस्थिता॥ धेनुरूपेण सा देवी मम पापं व्यपोहतु॥ गावो ममाग्रतः संत्विति। गा
वो ममाग्रतः संतु गावो मे संतु पृष्ठतः। गावो मे हृदये संतु गवां मध्ये वसाम्यहं॥ आचार्यस्य
गोत्रनामान्युच्चार्य हृष्टस्तुष्टो यजमानः प्राङ्मुखाय ब्राह्मणाय तां कपिलां दद्यात्॥ ततः
पूर्वं पूजितं सूर्यनारायणं विदुषे ब्राह्मणाय दद्यात्॥ तत्र दानमंत्रः॥ घृस्रणेजगतां नाथ वि
श्वात्मन्विश्वतोमुख॥ दानेन तव देवेश मम नश्यतु पातकं॥ ॥इति दानमंत्रः॥ ॥ततः संपा
दिते दानेऽन्येभ्यो दीयतां वसु। यथासंख्यं यथावित्तं यथाविधि यथासुखं॥ एवं कृते विधाने
स्मिन्गृहमागत्य सुव्रतः॥ ब्राह्मणान्भोजयेत्पश्चात्ततो भुंजीत चात्मना॥ सूर्यपर्वशतान्येव

सोमपर्वसहस्रकं॥ राजेंद्र कपिलाषष्ठ्याः कलां नार्हति षोडशीं॥ कृत्वा तु कपिलाषष्ठीविधानं
विधिपूर्वकं॥ ब्रह्महा मुच्यते पापैर्नात्र कार्या विचारणा॥ ॥इति श्रीविधानमालायां भ
विष्यत्पुराणोक्तं कृष्णयुधिष्ठिरसंवादे कपिलाषष्ठीविधानं॥ ॥अथ गोदावर्यां सिंहस्थे बृह
स्पतिपूजाविधानं॥ ब्रह्मांडे ब्रह्मनारदसंवादे॥ ॥नारद उ०॥ ॥ये त्वया प्रापिता देवा संसार
स्तु विमानवाः॥ तेषामुद्धरणोपायं तीर्थं किं कथितं विभो॥ ॥श्रीब्रह्मोवाच॥ ॥अस्ति विख्यात
मतुलं पापाब्धेस्तरणं परं॥ गोदावरीति विख्यातं त्र्यंबकनारचितं पुरा। ब्रह्माद्रिगिरिवराज्जातं
तीर्थानामुत्तरोत्तरं॥ शतयोजनविस्तीर्णं पूर्वसागरगं शुभं॥ ब्रह्महत्यादिपापानां गोमतीक्ष
यकारिणी॥ दृष्ट्वा सनातमुनिश्रेष्ठ प्राणिनां तव पापिनां॥ गंगाद्वारे कुशावर्ते बिल्वके नीलप
र्वते॥ स्नात्वा कनखले तीर्थे पुनर्जन्म न लभ्यते॥ ॥इति मोक्षतीर्थपंचकं॥ ॥अथ ब्रह्महत्याश

मनंविधानं॥ ॥गोदावर्यंपिप्पलनगरे॥ अरुणावरुणयोर्मध्येयत्रप्राचीसरस्वती॥ ततश्चकाशिसमं
प्रतिष्ठानाख्यंतीर्थं॥ विश्रुतःपिप्पलेश्वरोयंगोदेयंजाह्नवीकिल॥ प्रतिष्ठानमिदंकाशीसिंहस्थेच
बृहस्पतौ॥ तथाचत्र्यंबकेचैवगंगासागरसंगमे॥ सर्वत्रसुलभागोदात्रिषुस्थानेषुदुर्लभा॥ अ
तःकारणात्सर्वत्रपावनात्रीसुनाप्राणिनासिंहस्थेचगुरौसतिगौतमीतीरेगंतव्यं॥ ॥तत्रादौया
त्रामुखप्रयोगः॥ ॥अद्यगच्छामिगौतम्यादर्शनेप्सुरतंद्रितः॥ यात्रानियमामासाद्यजपन्नाराय
णान्निधं॥ इतिस्थित्वायदागंगांप्राप्तस्तदास्तांजलिर्भूत्वाप्रणमेच्छांगांदंडवत्प्रणिपातेनदक्ष्व
वरीप्रियः॥ प्रणमंतिसकृद्येत्वांतेनयांतियमालयं॥ देविगौतमिपापौघमग्नंमांत्वंसमुद्धर॥ जुंगं
तेतेतटेमातःकुरुमोक्षस्यभाजनं॥ ॥इतिगोदावरीदर्शनप्रणिपातमंत्रः॥ ॥ततःमुंडनंचोप
वासंचसर्वतीर्थेष्वयंविधिः॥ इतिन्यायेनतीर्थविधिंकृत्वासिंहस्थस्यबृहस्पतिपूजामारभेत॥

सौवर्णंत्रिदशाचार्यंकृत्वातस्यात्मशक्तिसंख्यया॥ तंडुलोपरिविन्यस्तेकलशेस्थापयेद्बुधः॥ ऊंव
केचविन्यस्यवंशपात्रंसवस्त्रकं॥ तत्रसंस्थापयेद्विद्वान्प्रतिमामत्रतत्परः॥ बार्हस्पत्ये
नसूक्तेनतोषयेद्देवमंत्रिणं॥ बृहस्पतेतिमंत्रेणजुहुयात्तिलसर्पिषा॥ अष्टोत्तरसहस्रंच
शतंवाष्टाधिकंतथा॥ होमांतेविधिवद्दद्याद्गामेकांचपयस्विनीं॥ ज्ञातेनक्केद्विजैःसार्द्धंवि
दध्याज्जागरंबुधः॥ गीतवादित्रनृत्यैश्चपुराणश्रवणेनच॥ शांतिपाठैरनेकैश्चनीत्वारा
त्रिंप्रयत्नतः॥ प्रातःकालेसमुत्थायस्नानंकृत्वायथाविधि॥ तर्पयित्वासुमनसोमुनीन्मनुज
सत्तमान्॥ पित्र्यश्चविधिवद्विद्वान्सारभेत्पूजनंबुधः॥ मुनिपुष्पैःसमभ्यर्च्यचंदनेनानुलेपयेत्॥
धूपैश्चविविधैर्देवराजाचार्यंचधूपयेत्॥ दीपैर्नीराजयेद्भक्त्यानैवेद्यैःपरितोषयेत्॥ पीतवस्त्र
द्वयंतस्मैह्यर्पयेद्देवमंत्रिणे॥ बृहस्पतेअपमितिचसूक्तंजपेत्॥ ततस्तुप्रार्थयेन्नारीगुरुंचतु

त्तृण्या गिरा॥ नमस्ते वाग्विलासाय देवाचार्याय धीमते। सिंहस्थाय च जीवाय त्रैलोक्याहित
कारिणे॥ ॥अथ गौतमी प्रार्थनं॥ ॥गोदावरि महाभागे महापापविनाशनि। धर्मार्थकाम
मोक्षाणां स्तु जन्मने गौतमी प्रिये॥ नमस्ते भुवनाधीश नमस्ते भुवि निम्नगे॥ ब्रह्माद्रिशिखरोद्भू
ते पाहि लोकत्रयं शिवे। मज्जंति तव तोये ये तवार्च्चं प्रणमंति ये॥ तान्समुद्धर वेगेन पापाब्धे गौत
मापगे॥ ॥इति गौतमी प्रार्थनामंत्रौ॥ ॥ततस्तु गोदावरी प्रतियायिनां नराणां प्रशंसा॥ ॥
ते धन्या मानवा लोके ततस्तेषां स्तु उच्यते॥ दृष्टा गौतमी गंगां च सिंहस्थे सुरमंत्रिणि॥ न तत्फ
लं क्रतुसहस्रैरुनात्तीर्णाः स्युः कदाचन॥ तत्र वर्तिन संदेहो गोदावर्यां त्रिपिंडदाः॥ अश्वमेधेन किं
पुण्यं किं पुण्यं मृगसेचनात्। यावन्न क्रियते लोके गोदावरि निषेवणं॥ ततस्तु विधिवद्दद्याद्गु १६२
रुं हेममयं गुरं॥ आचार्याय सुवृत्ताय सर्वोपस्कर संयुतं॥ कृतांजलिपुटो भूत्वा ह्याचार्यं प्रार्थ

येत्सुधीः॥ दानेन च नमस्कारैर्विनयेन क्षमापयेत्॥ इति कृत्वा गुरोः पूजां विसृज्य प्रार्थ्य सत्त
मं॥ ब्राह्मणान् भोजयेत्पश्चाद्दानैर्नानाविधैस्तदा॥ एवं कृते विधाने च पापमुक्तो भवेन्न
रः॥ स वन्हिकामानवाप्नोति नंदते पुत्रपौत्रकैः॥ ॥इति श्री विधानमालायां सिंहस्थगुरुपू
जाविधानं ब्रह्मांडपुराणोक्तं॥ ॥अथ श्रीशैलयात्राविधानं॥ ॥स्कंदपुराणे स्कंदसूर्यसंवादे॥
॥सूर्य उ॥ ॥कन्यागते गुरौ स्कंद कृष्णायां त्वं विधीयते॥ श्रीशैले तु विशेषेण तन्ममाचक्ष्वपृ
ष्टतः॥ ॥श्री स्कंद उ॥ ॥शृणु भास्कर वक्ष्यामि श्रीशैले यद्विधीयते। विधानं मनुजैः सम्यक्कृ
ष्णायात्रानुयायिभिः॥ या गतिर्योगयुक्तानां मुनीनामूर्द्ध्वरेतसां॥ सा गतिः सर्वजंतूनां कृष्णाती
रनिवासिनां॥ महाबले विरावे च तपावेणी समागमे॥ करहाटे महातीर्थे कृष्णाभागीरथीस
मा॥ कन्यागते सुराचार्ये गच्छं तीरमहाबलं॥ शिवरात्रौ विशेषेण तेन नश्यंति भास्करि॥ तत्र रात्रौ

श्रीपर्वतं गत्वा यः क्रियते विधानं। बृहस्पतिपूर्वकं॥ चतुर्दश्यां प्रभाते च समुत्थाय समाहितः॥
स्नायान्नीलसरित्तोये कुर्याद्देवादितर्पणं॥ ततस्तोरक्रियः सम्यग्जीवज्ञनं कदाहते। कु
र्यात्स्नानविधिं सर्वं शुचिनं स्वरूपयान्वितः॥ इमं श्राद्धं ततः कुर्याद्दानानि किंजलं तु दिशः॥
ततो मंदिरमागत्य श्रीशैलाधिपतेः प्रभो॥ मंडपादि विधायाशु तोरणान्यंबराणि च। सायंका
ले शिवं पश्येन्मल्लिकार्जुनमादरात्॥ गत्वा गिरिं गिरीशस्य स्नानं येन च वारिणा॥ ततस्तु धूपयेद्दे
पैर्दीपैर्नीराजयेत्ततः॥ ततो विश्वदलैः पूर्णैः कर्णिकारसमन्वितैः॥ पूजाते धूपयेद्देवं दीपैर्नी
राजयेत्पुनः॥ नैवेद्यैर्विविधैर्भक्त्या तोषयेत्पार्वतीपतिं॥ ब्राह्मणे भोजनं दद्यात् श्रीमल्लः श्री १८२
यतां बुधैः॥ सवत्सां महिषीं दद्यात्सपत्यानं तुरंगमं॥ धेनुः पयस्विनी दद्यात्कटं सदृषस्तथा॥
पट्टकूलानि वस्त्राणि भूमिदानं तथैव च॥ अन्यांश्च यवगोधूमान् पावत्कालान्प्रियंगवान्। ए

वमादीनि धान्यानि शाय्यादीपांश्च दीपिकाः॥ करपत्रं च मिष्मिकाजलपूर्णस्तथैव च॥ बला
निबीजपूराणि कूष्मांडानि तथैव च। नारिकेराणि रंभानि फलानि च तथैव च॥ वंशपात्राणि
चित्राणि छत्राणि विविधानि च॥ राजिकामानमप्यत्र श्रीमल्लस्थायां प्रदीयते॥ तस्मुमस्य समंत्रो
क्तेनात्र कार्या विचारणा॥ ततः प्रभाते विमले स्नात्वा स्नात्वा तु कृष्णाजले बुधः॥ ब्राह्मणान्भोज
येत्तत्र शिष्टा वानुमयीभुजाः॥ गृहणीयात् गारि कांतोयसिक्तांबरधरः शुचिः॥ ततस्तु गृहमागत्य
कृत्वं तत्र व्रतं पुमान्॥ अन्येपि लौकिकाचारा मणसंकादयो गृहे॥ नगिनीप्रमुखा नार्यः कुर्युस्ता
न्द्विरेरताः॥ नानावानविचारेण नैरर्वपूजयेस्सुरं॥ गंधपुष्पाक्षतादीनि भक्ष्यद्रव्याणि चार्चयेत्॥
नैवेद्यं विविधं चैव तांबूलं तदनंतरं॥ ततस्तु भोजयेद्भक्त्या कान् ब्राह्मणादीन् शुचिव्रतान्। तत
स्तु स्वयमश्नीयात् मौनं त्रायनमाचरेत्। ततः प्रभाते विमले सोमवारे शुचिव्रतः। स्नात्वा तैलेन

कुंडेनव्यवस्त्रस्तृतस्तदा॥ पारिबर्हाणिमेधावीगृह्णीयात्सुसमाहितः॥ ततस्तत्स्वस्त्ययनोगच्छेन्मंदिरं
पार्वतीपतेः॥ गौरिकाक्का निवस्त्राणियष्टिर्वैएकमयातथा। तत्सर्वं विन्यसेत्तत्र वृषभस्यसमीप
तः॥ ततो वलोकयेद्देवंशैलेशं करलोकर्न्नां करं॥ गंधपुष्पाक्षतादीनि चर्चयेद्भक्तिमान्नरः॥
प्रार्थयेद्देवदेवेशंपार्वतीप्राणवल्लभं॥ तत्रप्रार्थनामंत्रः॥ ॥इहजन्मानि देवेशयत्कृतंपा
तकंमया। तत्सर्वंत्वंमहादेवक्षिप्रंनाशयमंतकं। इतिप्रार्थयित्वाप्रदक्षिणात्रितयस्तमंदिरंव्र
जेत्॥ ततःसुहृद्भिःसार्द्धं --- भुंजीयात्। एवंकृते विधानेच कन्यासंस्थे बृहस्पतौ॥ श्रीगिरौ
कल्मषेणायांसर्वपापैःप्रमुच्यते॥ --- नवाप्नोतिदेहांतेमोक्षमाप्नुयात्॥ ॥तत्रपुराणव
चनं॥ ॥केदारखंडे॥ रेतःकुंडेरकंपात्वावाराणस्यांमृतोयदा। श्रीशैलशिखरंदृष्ट्वापुनर्ज १५४
न्मनलभ्यते॥ ॥इतिश्रीविधानमालायांस्कंदपुराणोक्तंकन्याबृहस्पतेश्रीशैलयात्राविधानं॥

अथकार्त्तिकेयदर्शनविधानं॥ पद्मपुराणे॥ ॥कार्त्तिक्यांकृत्तिकायोगेशिवयोगसमन्विते॥
यःपश्येत्कृत्तिकापुत्रंसर्वत्रैवब्रह्मसत्तमः॥ तिलकुंडेसुधास्नात्वास्वामिनंयोवलोकयेत्। सप्तज
न्मनिविप्रस्याद्धनाढ्योवेदपारगः॥ दृष्ट्वादेवंमहासेनंकरवीरैःपुष्पासमर्चयेत्॥ चंदनेनानुसंलि
प्यपद्मांगेनैवधूपयेत्॥ दीपैर्नीराजयेद्भक्त्यामयूरमपिपूजयेत्॥ कमंडलुंब्रह्मसूत्रमक्षमा
लाकृष्णाजिनान्। पंचोपवीतिकान्याचसमंत्राणिसमर्पयेत्। तत्रमंत्रः। कमंडलुर्जलापूर्णःस्व
र्णैर्सुजलक्षणः। अर्पितस्तेमहासेनप्रसन्नानेनमेभव॥ ॥इतिकमंडलुसमर्पणमंत्रः॥ ॥
ब्रह्मसूत्रंमहादिव्यंप्रीतयेतेमयार्पितं॥ ब्रह्मजन्मास्कमेदेवब्रह्मसूत्रसमर्पणात्॥ ॥इतिय
योपवीतसमर्पणमंत्रः॥ ॥गोमतीतीरसंभूतागोपीवापीसमुद्भवा॥ यदर्पितामयाभ्यंब्रह्म
जन्माप्नुयेगुह॥ ॥इतिगोपीचंदनार्पणमंत्रः॥ ॥उपवीतानिसूत्राणिपवित्राणित्रिवात्मज। पु

दत्तंब्रह्मणामया विष्णुस्वरूपाय रुद्ररूपिणे॥ प्रीत्यर्पितं वदेवेभ्यः पत्रापादत्तं मया॥ इति दत्तारोपणमंत्रः॥ २

रतस्त्वर्पयाम्यद्य प्रसन्नार्थं तव प्रभो॥ ॥इति पवित्रारोपणमंत्रः॥ ॥तिलाः काश्यपसंभूतास्तिलाः पा
पहराः स्मृताः॥ पादयोरर्पितास्तेद्य सर्वपापप्रणुत्तये॥ ॥इति तिलार्पणमंत्रः॥ ॥अष्टाविंशतिसं
ख्याकै रुद्राक्षैर्योजिता मया॥ अर्पिता तव रुद्रेश च गृहाण सुरसैन्यप॥ ॥इति अक्षमालार्पणं॥ ॥
सुवर्णमुत्तमं लोके भुक्तिमुक्तिप्रदं तथा॥ अर्पितं देवदेवेश दैन्यान्यानापनुत्तये॥ इति सुवर्णार्पणमंत्रः॥
एतत्कृत्वा समस्तं च प्रणम्य च मुहुर्मुहुः॥ प्रसादतो विनिर्गत्य विधानांतरमादिशेत्॥ दक्षिणं स्कंदमारो
प्य नाणिनि यत्नमाविलनः॥ कुर्यात्प्रदक्षिणास्तिस्रः सौर्यनादसमन्वितः॥ ततो वतार्य तं धीमान्स्कंधा
द्गणिनीसुतं॥ संपूजयेद्धिरण्यादिसंपत्तिभक्तिपूर्वकं॥ ततो मंदिरमागत्य स्नायात्तेनैव सुव्रतः॥ ब्रा
ह्मणान्भोजयेद्भूरि धनं तेभ्यः समर्पयेत्॥ एवं कृते विधाने तु सर्वपापहरं भवेत्॥ सप्तजन्मसु विप्रः १९५
स्याद्धनाढ्यो वेदपारगः॥ ॥इति श्रीविधानमालायां कार्त्तिके चतुर्दशीनिविधानं॥ ॥अथ ब्रह्मकू

र्चनिविधानं॥ ॥ब्रह्मघ्नो गृहदाहे च सूतके मृतसूतके। यज्ञारंभे धनप्राप्तौ प्रायश्चित्ते विशे
षतः॥ रोगमुक्तौ च संपर्के क्षुद्रपापापनुत्तिषु॥ विदध्यात् ब्रह्मकूर्चं च मासि मास्यपि वा द्विजः॥
तत्र ब्रह्मकूर्चलक्षणं॥ ॥दुग्धं दधि घृतं मूत्रं पंचमं गोमयं तथा॥ देवमुख्यं पर्मादिष्टं पवित्रं ग
व्यपंचकं॥ गव्यं च गोभवं नूतं क्षीरदध्यादिपंचकं॥ पृथक्कृतं गवां चैव पंचानामिति नि
श्चयः॥ नवाम्रपल्लवाभा वा पीतनेत्रा सुलक्षणा॥ सा धेनुः कपिला ज्ञेया सात्त्विकी स्वरूपि
णी॥ लाक्षारससमाना या श्वेतरोम्णी ललाटतः॥ सा रक्ता कपिला जिह्वा स्वरूपा धेनुरुत्तमा॥
यणोस्फटिकसंकाशा सुस्निग्धा स्निग्धलोचना॥ सा गौः श्वेता समादिष्टा मुनिभिस्तत्त्वदर्शिभिः॥ अ
तसीपुष्पसंकाशा लंबपीनपयोधरा॥ सा नीली सुरभीर्ज्ञेया महापापविनाशिनी॥ भिन्नांजनसमा
नाना पीनोग्रा चारुमस्तका॥ सत्त्वाधारा स्त्ररूपा च महादोषनिवारिणी॥ कपिलाया घृतं ग्राह्यं

मंगुष्ठार्द्धंचगोमयं। क्षीरंसप्तपलंग्राह्यंदधित्रिपलमुच्यते। घृतमेकपलंग्राह्यंपलमेकंकु
शोदकं॥ घृतेनतेजोबीजंचघृतमायुर्यशस्करं॥ घृतमारोग्यकरणंघृतंश्रेयमेवच। नद
प्रस्रवणेतीर्थेरहस्येनिर्जनेवने। यज्ञागारेगवांगोष्ठेदेवतायतनेतथा। तत्रस्नात्वाशुचिर्भू
त्वाशुक्लवासाजितेंद्रियः॥ गायत्र्यागृह्यगोमूत्रंगंधद्वारेतिगोमयं। आप्यायस्वेतिचक्षीरं
दधिक्राव्णस्तथादधि॥ तेजोसिशुक्रमस्यमृतमितिनामधमासिप्रियंदेवानामनाधृष्टंदेव
यजनमसीत्याज्यादेवस्यत्वेतिकुशोदकं। आपोहिष्ठामयोभुवइतिचतीर्थपालाशंपद्मंचता
म्रजनमेवच॥ उदुंबरयपात्रंवाब्रह्मस्यापवान्नवेत्। सप्तयत्राश्वयेदेवाअहुतायवसं १९६
युतः॥ तेषु२केषुचसंगृह्यपंचगव्यंद्विजोत्तमः॥ स्रुकवेनजुहुयाद्विद्वान्तैर्वायज्ञार्पकोविदः।
अग्नयेस्वाहेतिप्रपोंमायेतिपरास्मृता। आहुतिद्विनयंमुख्यंपंचगव्यंयज्ञोस्मृतं। इदंविष्णुर्मा
यो

नस्तोकेचगायत्रीब्रह्मजज्ञानमितिव्याहृतीर्हुत्वासमग्रस्यन्ततीयांशंपंचगव्यंमहात्मे
ष्टंदेवानामपिदुर्लभं। मासिमासिनरोभ्यायासर्वपापापनुत्तये॥ अर्द्धमासेतुयोभ्यायात्स
स्वर्गंप्राप्नुयाद्ध्रुवं॥ ब्रह्मलोकेमवाप्नोतिषष्टेषष्टे वासरे वचस्यास्थिगतंपापंदेहेतिष्ठति
वेन्हणं॥ ब्रह्मकूर्चोदहेत्सर्वंघृतसिक्तइवानलः॥ ॥इतिश्रीविधानमालायांब्रह्मकूर्चवि
धानं॥ ॥अथबालकस्योद्धदंतोद्गमविघ्ननंगविधानं॥ ॥ब्रह्मयामले॥ ॥प्रथमंदंतनि
र्मुक्तिरूर्ध्वबालस्यचेद्भवेत्॥ क्लेशायमातुलस्येह तदाप्रोक्तामनीषिभिः॥ विघ्ननंगंप्रवक्ष्या
मिविधानंविधिपूर्वकं॥ सौवर्णंराजतंवापिताम्रंकांस्यमयंतथा। दध्योदनेनसंपूर्णंतु
पात्रंदद्यात्विशिशोःकरे॥ समंत्रंमातुलनंदत्वासंपश्येन्मातुलःशिशुं॥ सालंकारंसवस्त्रंच
शिशुमालिंग्यसादरं॥ तत्रमंत्रः॥ ॥रक्षमांमागिनेयत्वंरक्षमेसकलंकुलं। गृहीत्वामा

जनंसान्नंप्रसन्नोत्नवमेसदा॥निर्विघ्नंकुरुकल्याणंनिर्विघ्नांचस्वमातरं॥त्वमप्यात्मानमा
तिष्टचिरंजीवमयासह॥ ॥इतिनाजनदानमंत्रः॥ ॥ततोभिनंदयेद्विद्वान्भगिनीभगि
नीपतिं॥ज्येष्ठान्श्रेष्ठान्गुरून्विप्रान्पवित्रानभिवादयेत्॥एवंकृतेविधानेचविघ्नःको
पिनजायते॥ऊर्ध्वदंतोद्भवंपापनश्यतितत्क्षणात्॥बालकंजननीचैवचिरंजीवतिभाव
नः॥तस्मात्प्रयत्नतोविद्वान्विधानंसम्यगाचरेत्॥ ॥इतिश्रीविधानमालायांऊर्ध्वदंतोद्भ
मविघ्नभंगविधानं॥१७१॥ ॥अथमहानदीमहापूरभंगविधानं॥ ॥ब्रह्मपुराणे॥ ॥ब्र
ह्मनारदसंवादे॥ ॥श्रीनारद उ॥ ॥निस्तरंतिकथंलोकागंगापूरपरिप्लुताः॥तन्ममाच १९
क्ष्वलोकेशसम्यक्सिद्धिविदांवर॥ ॥श्रीब्रह्मोवाच॥ ॥शृणुनारदवक्ष्यामिविधानं
विधिपूर्वकं॥तरंतियेनमनुजानदीपूरपरिप्लुताः॥पतिप्रियइतियुक्तासर्वाराभ

गासती॥आगत्यसरितस्तीरंदद्याद्वस्त्रमेवदा॥विधायनूतनंवस्त्रंसत्कर्पासिकमु
त्तमं॥शूर्पेषोडशबंधेचकर्णपात्रादिकंतथा॥हरिद्राकुंकुमंचैवजीरकंधान्यकं
तथा॥लवणंचगुडंचैवतंदुलान्मधुकंतथा॥अक्षतांश्चंदनंचापिचंद्रंकस्तूरिकांत
था॥एतत्सर्वंतुशूर्पेसमंत्रंसरितेर्पयेत्॥तत्रमंत्रमाचार्यःसमुच्चारयति॥इमंमे
गंगेयमुनेसरस्वति॥त्याचार्यःपठति अन्यानपिवारुणनिसूक्तानिजपेत्॥कराभ्यां
शूर्पमादायसप्तवारंजलेक्षिपेत्॥सरितःसरितोमध्येमंत्रानुच्चारतीसती॥तत्रपौरा
णमंत्रः॥गृहाणार्घ्यंमयादत्तंगंगेत्रिपथगामिनी॥लोकानुद्धरतारस्थान्पूरंसंहरचात्म
नः॥इतिजप्त्वाजलेप्रक्षिपेत्॥शूर्पेणजलमध्येततोद्वितीयवारंजलंगृहीत्वाअन्यंमंत्रमु
च्चार्यजलमध्येक्षिपेत्॥तत्रमंत्रः॥ ॥गंगेत्वंपुण्यरूपासिसर्वपापविनाशिनी॥पूरणंतेजलं

मग्नं समुद्धर सम्भ्रमे ॥ जीवनं तव लोकानां त्वं गंगा नारायणोत्तमे ॥ अर्घ्यार्थमर्पितं तुभ्यं गृ
हाण परमेश्वरि । अत्फलकटेन तोयेन सर्वं जगदुपकृतं । रक्षतस्य कल्मषात् बलिदाने
सस्तुव्रते । स्वर्गमिदाकिनी देवी पाताले भोगवत्यसि । नागारूपीति नृलोके गृहाणार्घ्यं न
मोस्तु ते ॥ उत्तुंगवीचिवेगेन ध्वावितं जगतीतलं ॥ रक्षितं तत्समस्तं हि पूरं संहर चात्मनः ॥ पु
ष्पधूपान्वितं सर्वं बलिं तुभ्यं मया कृतं ॥ तं गृहाण जगद्धात्री तर्पयो रक्ष भूतले ॥ इति
सप्तमंत्रानुच्चार्य सप्तवारं तेन भूरणे पंगंगामध्ये गंगाजलं प्रक्षिपेत् ॥ तत्सर्ववस्त्रादिकं गं
गायां प्रक्षिपेत् ॥ अथवा तत्स्वरूपिण्यो सुचरित्राये ब्राह्मणेय दद्यात् ॥ ततस्तत्र पुरंध्री सर्वे १९८
जनाः नमस्कुर्युः ॥ कर्पासकं च वस्त्रं च कर्णपत्रादिकं तथा । कृतांजलिपुटाः सर्वे अर्पयेयुः स
मंजसा ॥ एवं कृते विधाने तु पूरः संहरति क्षणात् ॥ हृष्टपुष्टो जनः सर्वो विधानं नंदति ध्रुवं ॥

॥ इति श्रीविधानमालायां ब्रह्मपुराणोक्तं गंगापूरहरं विधानं ॥ ॥ अथोत्पन्नस्य बालस्य मास
वृद्ध्याद्दृद्धिविधानानि ॥ ॥ लब्धजातके । मासि पूर्णे यदा जाते जननाच्छिशोस्तदा ॥ कार्यबु
द्धिविधानं तु मासवृद्धये ॥ अन्यथा बालकं सम्यक् पक्ववाष्पेन वारिणा । दीपेनीराज
येद्वस्त्रं नूतनं च समर्पयेत् ॥ अपूपान् ब्राह्मणीभ्यः समर्पयेत् । ब्राह्मणान् भोजयेत्सम्यक् बालका
युर्विवृद्धये ॥ अस्योत्पन्नस्य बालस्य सम्यगायुर्विवृद्धये ॥ जन्मर्क्षे येदेवता प्रीत्ये तत्त्वं सर्वं सम
र्पयेत् ॥ इति मासिककर्त्तव्यं ॥ संप्राप्ते द्वादशे मासि विधानांतरमाचरेत् । सुहृज्जनः कारयेत्स्थूलाः स्फुटत्ताः
वंशपेटिकाः । निधायमोदकादीनां तत्र संचयं । आछाद्य नूतनैर्वस्त्रैः पूर्णाद्वादशपेटिकाः ॥ जीव
त्प्रजा सुनारीभ्यु प्रतिसंपादाय सुधीः ॥ नत्यहृं च ततः कुर्यान्मासवृद्धिमनुत्तमं ॥ संततेः क्षेमवृद्ध्य
र्थं जननीपुत्रवत्सला । यद्राष्टषष्टिनापूर्णं मंत्रा भो जन्मावासनो वासनोस्नात्वा गुह्येन तैलेन पूज

यद्वत्सराधिपं॥ ब्राह्मणान्भोजयेच्छक्त्या तेनारोग्यमवाप्नुयात्॥ ॥इति श्रीविधानमालायां लब्ध
जातकोक्तं जन्मवृद्धिविधानं॥ ॥अथ त्र्यंबकविधानं॥ ग्रहपीडासु सर्वासु महारोगादिनिपीडने॥ वियो
गे बांधवानां च जनमारउपस्थिते॥ राज्यभंगे धननाशे नानापमृत्युविनाशने॥ अनियोगे समुत्पन्ने
मनोधर्मविपर्यये॥ मृत्युंजयस्य देवस्य विधानं क्रियते बुधैः॥ यदा कदाचित्समये प्राप्ते चंद्रबले
शुभे॥ शुभे तिथौ शुभे वारे शुभनक्षत्रसंयुते॥ शुभे लग्ने शुभे योगे शुभग्रहसमन्विते॥ मृत्युंजय
स्य देवस्य विधानारंभ इष्यते॥ मंडिते साकरवारिचित्रितैर्मंडपान्विते॥ दीपस्थानं च संशोध्य रत्न
कंबलसंयुतं॥ ब्राह्मणान्वेदशास्त्रज्ञानाहूयागतमत्सरान्॥ स्वस्तिवाचनपूर्वं च विधानं पर
मारभेत्॥ प्रारब्धस्य कार्यस्य सहस्राज्जप उत्तमः॥ ऊनाधिकस्तु कुर्याच्चेज्जपोऽपि न फलप्रदः १९९
स्मृतः॥ राष्ट्रभंगे जनक्लेशे महारोगनिपीडने॥ कोटिसंख्या जपः प्रोक्तो मुनिभिस्तत्त्वदर्शिभिः॥

सामान्यग्रहपीडायां दुःस्वप्नस्य दर्शने॥ मृत्युंजयस्य मंत्रस्य जपो लक्षमितः स्मृतः॥ अपमृ
त्युविनाशाय जपोऽयुतमितः स्मृतः॥ दुर्वार्त्ते मित्रवर्गे जाप्यं सहस्रदामन्त्रेच्छुते॥ यात्रायामयुतं का
र्यं सहस्रं वा समाहितैः॥ आदावभ्यर्च्य देवेशं शंकरं लोककर्त्तारं करं॥ गर्त्ताधारं जलैर्गांगैः स्नाप
येच्चंदनान्वितैः॥ दशांगैर्धूपयेद्धूपैः स्नपयेच्छंकरं ततः॥ पंचामृतैः समंत्रैश्च सपुष्पैः सान्द्रितैः
शुभैः॥ तत्र पंचामृतान्याहुः पयो दधि घृतं गव्यं शर्करा च शुभं मधु॥ आप्यायस्वेति च क्षीरं द
धिक्राव्णेति वै दधि॥ तेजोसि शुक्रमित्याज्यं मधुवातेति वै मधु॥ गायत्र्या शर्करा शुद्धिर्जलस्ना
नं ततः परं॥ सप्तर्षिमितैश्च तैलास्त्र्यंगशुभः॥ शंनो सर्वकार्येषु चोत्तमः॥ यथाविधि विधातव्यः स
र्वक्लेशनिवारणः॥ चंदनेन सुगंधेन कुर्याद्देवस्य लेपनं॥ स्थावरे पाणिना कार्यं जंगमाय क
निष्ठिकं॥ ततः पुष्पैर्विधानज्ञो पूजा देवस्य शूलिनः॥ कालोद्भवैर्यथोद्दिष्टैर्यावत्स्यात्स्य मनोरुचिः॥

दत्वांगे धूपयेत्पश्चाद्दीपैर्नीराजयेत्ततः॥ दीपिकाभिश्च साज्याभिः सक्कैर्नैवेद्यैः परितोषयेत्॥ तांबूलमर्पयित्वास्मै
गंदेवदेवसम्मुखिनः॥ न्यस्तबीजाक्षरो मंत्री देहस्यावयवेषु च॥ रुद्राक्षमालिकाहस्तो जपेच्चिंतित
शंकरः॥ यावन्नो जं न्नणां निशाराराख्यापि मर्दनं॥ जायते मंत्रिणस्तावद्देवस्याज्जपेत्तमः॥ जपां
ते च पुनः स्तोत्रैः प्रतिपूजां च कारयेत्॥ ततः प्रदक्षिणीकृत्य नत्वा स्तुत्वा गृहं व्रजेत्॥ निवृत्ते चाह्निके
विधायं भुंजीयाद्विधिना गृहे॥ हविष्यान्नं ससर्पिष्कं समुद्गं पायसान्वितं॥ भुक्त्वाचम्य जलैरुष्णैः
पुनः शीतैर्जलैस्तथा॥ कृतास्यशुद्धिः शुचिमान्शयीत पृथिवीतले॥ एवं दिने दिने विधानकृतजापो म
हामतिः॥ पूर्णस्य स्वस्य जापस्य दशांशं हवनं मतं॥ पायसेन च साज्येन समिद्भिस्तिलसर्पिषा॥ श्रीवृक्ष
स्य फलैः पत्रैः कमलैः शतपत्रकैः॥ खर्जूरैस्तिलसाज्यान्नैरन्यैर्यज्ञफलैस्तथा॥ हवनं कारयेद्विद्वान् १००
कृत्वाचार्यार्चनक्रियां॥ ब्राह्मणान्भोजयेत्सम्यक् दशांशेन यजेत्तथा॥ एवं कृते विधाने च सर्वकर्मफ

लं लभेत्॥ चिंतितार्थस्य सिद्धिः स्यान्नात्र कार्या विचारणा॥ आराध्य विधिवद्देवं मृत्युंजयमुमापतिं॥ गत
विघ्नो गतक्लेशः सन्ततं सुखमाप्नुयात्॥ अथ जापप्रकरणं॥ अस्य त्र्यंबकमंत्रस्य वसिष्ठ ऋषिः मृत्युंज
यरुद्रो देवता॥ अनुष्टुप्छंदः॥ देवदेवो प्रणवो बीजं ह्रीं शक्तिः शरीरकर्मसिद्ध्यर्थे जपे विनियोगः॥ अत्र
मूलमंत्रेण करशुद्धिं कृत्वा प्रणवं करतलयोर्विन्यस्य व्याहृत्यादि मंत्रपादचतुष्टयं करयोरंगुष्ठादि
कनिष्ठिकांतं अंगुलीषु विन्यस्य ॐ त्र्यंबकं सर्वज्ञाय हृदयाय नमः॥ ॐ यजामहे तृप्तिरूपाय शिरसे स्वा
हा॥ ॐ सुगंधिं पुष्टिवर्द्धनं अनादिबोधरूपाय शिखायै वषट्॥ ॐ उर्वारुकमिव बंधनान् वज्रिणे वज्ररू
पाय कवचाय हुं॥ ॐ मृत्योर्मुक्षीय नित्यमलुप्तमूर्त्तये नेत्रत्रयाय वौषट्॥ ॐ मामृतात् अचिंत्यानंतशक्त
ये अस्त्राय फट्॥ एवं सर्वेण व्यापकन्यासं कृत्वा देहांगन्यासमारभेत्॥ ॐ त्र्यंबकेशाय त्रिनेत्राय शक्ति
सहिताय शिखायां पादुकां पूजयामि॥ ॐ बालार्कतेजसे बालाशक्तिसहिताय शिरसि पादुकां पू

जयामि॥ ॐ कंकालांतकेशाय कल्याणीशक्तिसहिताय ललाटे पादुकां पूजयामि। ॐ यं यज्ञेशा
यय ज्ञरूपायशक्तिसहिताय भ्रुवोः पादुकां पूजयामि॥ ॐ जां जांबांधराशाय ज्वालामुखी
शक्तिसहिताय नेत्रयोः पादुकां पूजयामि। ॐ इं शाकिनीशाय हिमवतीशक्तिसहिताय नासि
के पादुकां पूजयामि॥ ॐ सुं सुधाशाय सुगंधाशक्तिसहिताय कपोलौ पादुकां पूजयामि। ॐ गं गंगाध
रेशाय गंभीरशक्तिसहिताय ऊर्ध्वोष्ठे पादुकां पूजयामि। ॐ धीं धीमरेशाय धीशक्तिसहिताय
अधरोष्ठे पादुकां पूजयामि॥ ॐ पुं पुंडरीकाक्षेशाय पूर्णाशक्तिसहिताय ऊर्ध्वदंते पादुकां पूजया
मि॥ ॐ ष्टिं ष्टिशाय क्रियाशक्तिसहिताय द्विनौ पादुकां पूजयामि। ॐ नं नादस्वामीशाय नादिनीश
क्तिसहिताय वक्त्रे पादुकां पूजयामि। ॐ उं बद्धीशाय उमाशक्तिसहिताय कंठे पादुकां पूजया २०१
मि॥ ॐ वां वारुणीशाय वामाशक्तिसहिताय स्कंधे पादुकां पूजयामि। ॐ रूं रूपेशाय रूपवतीश

अधोदंते पादुकां पूजयामि। ॐ वं वरिष्ठेशाय वरेण्याशक्तिसहिताय जिह्वायां पादुकां पूजयामि। ॐ धं धन्वीशाय धांताशक्तिसहिताय ३

क्तिसहिताय बाह्वोः पादुकां पूजयामि॥ ॐ कं कांतीशाय कांताशक्तिसहिताय हस्तयोः पादुकां
पूजयामि॥ ॐ मिं मीदुष्टमीशाय मंगलाशक्तिसहिताय वक्षसि पादुकां पूजयामि। वं वं वेदवेद
शाय वेदगर्भेशाय वेदगर्भसहिताय स्तनयोः पादुकां पूजयामि। ॐ बं बकीशाय बंदिनीशक्ति
सहिताय हृदये पादुकां पूजयामि। ॐ धं धर्मीशाय धनुष्मतीशक्तिसहिताय नाभौ पादुकां पूजया
मि। ॐ नं नाकेश्वरेशाय पुष्टिशक्तिसहिताय कट्यो पादुकां पूजयामि। ॐ मृं मृत्युंजयेशाय मृत्युना
शिनीशक्तिसहिताय गुह्ये पादुकां पूजयामिति। ॐ त्यों त्यादिशाय तुरित्याशक्तिसहिताय आपायौ
पादुकां पूजयामि। ॐ मुं मुक्तीशाय मुकुंदाशक्तिसहिताय कट्यां पादुकां पूजयामि। ॐ क्षें क्षेमि
शाय क्षेमंकरीशक्तिसहिताय जान्वोः पादुकां पूजयामि। ॐ यं योगिनीशाय यंत्रनंदिनीशक्तिसहि
ताय ऊर्वोः पादुकां पूजयामि। ॐ मं मंगल्येशाय महाशक्तिसहिताय जंघयोः पादुकां पूजयामि। ॐ

मृंमृत्फविनाशनेशायमृतवतीशक्तिसहितायगुल्फयोःपादुकांपूजयामि।नांनूतांत्रीशाय
तन्वनीशक्तिसहितायपादयोःपादुकांपूजयामि॥इतिवर्णन्यासः॥ॐत्र्यंबकंत्रिपुरांतकेशा
यत्रिलोकाशक्तिसहितायशिरसिपादुकांपूजयामि।ॐयंयज्ञपतीशायस्वाहाशक्तिसहि
तायललाटेपादुकांपूजयामि॥ॐमहेमहत्तत्वेशायमायाशक्तिसहितायश्रोत्रेपादुकांपू
जयामि।ॐसुसुखीशायसुरुचिशक्तिसहितायचक्षुषेपादुकांपूजयामि।ॐगंधिंगगनेशाय
गगनशक्तिसहितायनासिकेपादुकांपूजयामि।ॐपुष्टिंपुरुषेशायपुरंदराशक्तिसहिताय
वक्त्रेपादुकांपूजयामि।ॐवर्द्धनंवरदेशायवंशाकरीतिशक्तिसहितायबाहोःपादुकांपूजयामि।
ॐउर्वारुमावतीशायेउर्ध्वशक्तिसहितायहृदयेपादुकांपूजयामि।ॐरुकंरूपवतीशायरुक्मश २०२
क्तिसहितायकण्ठेपादुकांपूजयामि।ॐमिवंमित्रेशायमित्रिकाशक्तिसहितायजानुनोःपादु
नो

कांपूजयामि।ॐबंधनात्बालचंद्रमौलीशायेसर्वशक्तिसहितायपादुकांपूजयामि।ॐमृत्योःमं
त्रीशायमंत्रशक्तिसहितायगुह्येपादुकांपूजयामि।ॐमुक्षीयमुक्तिकराशायमुक्तिशक्तिसहि
तायजान्वोःपादुकांपूजयामि।ॐमांमहाकालेशायमहाशक्तिसहितायजंघयोःपादुकांपूज
यामि।ॐअमृतात्अमृतेशायअमृतशक्तिसहितायपादयोःपादुकांपूजयामि॥इतिपादन्यासः।
ॐत्र्यंबकंत्र्यंबकेशायनूतिशक्तिसहितायआधारेपादुकांपूजयामि।यजामहेसर्वेशायसर्वा
णीशक्तिसहितायस्वाधिष्ठानेपादुकांपूजयामि॥ॐसुगंधिरुद्रेशायविजपाशक्तिसहिताय
मणिपूरेपादुकांपूजयामि।पुष्टिवर्द्धनंपुरुषवरदेशायवंशवर्द्धनीशक्तिसहितायअनाहते
पादुकांपूजयामि।ॐउर्वारुकमिवउग्रेशायउग्रशक्तिसहितायविशुद्धेपादुकांपूजयामि॥
ॐबंधनात्महादेवेशायमानवीशक्तिसहितायआज्ञायांपादुकांपूजयामि।ॐमृत्योर्मुक्षी।

पत्नीमेशाय त्न्द्रकाग्नीशक्तिसहिताय ब्रह्मरंध्रे पादुकां पूजयामि। ॐ मामृतात् ईशानेशाने
शाय ईश्वरीशक्तिसहिताय सहस्रदले पादुकां पूजयामि॥ इति वाक्यन्यासः॥ ॐ त्र्यंबकं यजा
महे त्र्यंबकेशाय अंबिकाशक्तिसहिताय पूर्ववक्त्रे पादुकां पूजयामि। सुगंधिं पुष्टिवर्द्धनं मृत्युं
जयेशाय वामशक्तिसहिताय पश्चिमवक्त्रे पादुकां पूजयामि। ॐ मृत्योर्मुक्षीय मामृतात् संजीवनेशा
य रौद्रीशक्तिसहिताय उत्तरवक्त्रे पादुकां पूजयामि॥ इति चरणन्यासः॥ ॐ त्र्यंबकं यजामहे सु
गंधिं पुष्टिवर्द्धनं महेशाय गौरीशक्तिसहिताय दक्षिणपार्श्वे पादुकां पूजयामि। ॐ उर्वारुकमिव
बंधनान्मृत्योर्मुक्षीय मामृतात्॥ शांतवीशाय व्यापिनीशक्तिसहिताय वामपार्श्वे पादुकां पूज
यामि॥ इति अर्द्धन्यासः॥ ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं। उर्वारुकमिव बंधनान्मृत्यो २०३
र्मुक्षीय मामृतात्॥ सर्वाख्येशाय त्र्यक्षरव्याः शक्तिसहिताय सर्वशरीरे पादुकां पूजयामि

स्वद्गजस्वरस्सां अघोरास्त्राय वौषट्। ॐ भूर्भुवः स्वरिति अस्त्राय फट्। ततश्चंद्रमंडलोपरि प
द्मासनं चंद्रवर्णं त्रिवदनं मृतचंद्रकराधरं योगमुद्राबद्धहस्तद्वयं सोमसूर्याग्निलोचनं। बद्धपिं
गजटाजूटं नागाभरणभूषितं। ध्यात्वानुकंपिनं शिवं कृत्वाभ्यर्चनं शरणं व्रजेत्। मृत्युंज
य महादेव त्राहि मां शरणागतं॥ जन्ममृत्युजरारोगैः पीडितं कर्मबंधनैः। तावकस्त्वद्गतः प्रा
णः त्वच्चित्तोऽहं सदा मृड। इति विज्ञाप्य देवेशं जपेन्मंत्रं त्र्यंबकं॥ ॐ हौं जूं सः ॐ भूर्भुवस्वः प्र
तिलोमं ॐ भूर्भुवस्वः हौं॥ ॐ ईशानं मूर्द्धनि तत्पुरुषं मुखे अघोरं हृदये। वामदेवं मूर्द्धनि सद्योजा
तं पादयोः॥ ततो जपं कुर्यात्॥ ॐ नमः शिवाय॥ ॥इति श्रीविधानमालायां मृत्युंजयविधानं॥
अपरुद्रानुष्ठानं॥ ॥अतिशापे महाव्याधौ महापापविनाशने। यज्ञादौ ग्रहपीडायां दुर्भिक्षे यात्रा
मुखे तथा॥ अनुष्ठितो नरैः रुद्रो रोगपीडानिवारणः॥ तत्र विधानक्रमः॥ एकादश द्विजातीनां

प्रथमं वरणं नवेत्॥ एकादश्यामिंदुवारे श्रवणनक्षत्रसंयुते॥ प्रातःकाले समुत्थाय स्नात्वा गंगा
जले शुभे॥ प्रातर्विधिं समाप्यैव कालमंत्रवरणपूर्वकं॥ अर्चयित्वा शिवं सम्यक् पुष्पैर्नानावि
धैः शुभैः॥ कुर्यात्षोडशमेषु वा हि उपचारान्पृथक् पृथक्॥ मूलमंत्रेण शिवस्य सर्वकामफलेच्छ
या। ततस्तु दीपमासाद्य जपं कुर्युरतंद्रिताः॥ रुद्रं विन्यस्य सर्वांगे क्रमाद्दुरतो बुधः॥ नियमेन
जपं सिद्ध्यै कुर्युस्ते यजनं ततः॥ आगमोद्दिष्टमार्गेण समाप्य विधिवद्द्विजैः॥ ब्राह्मणान् भोजये
त्पश्चाद्दद्यात्तेभ्यश्च दक्षिणाः॥ आचार्यमृत्विजान्सर्वान् तोषयेत्कनकादिभिः॥ एकादशाह
वान् दद्यात् कृत्विग्भ्यश्च सदक्षिणान्॥ सालंकाराणि वस्त्राणि धान्यानि विविधानि च॥ २०५
पादुकाः कनकपात्री च छत्राणि विविधानि च॥ एकादशीभ्यः कृत्विग्भ्यो दद्याद्रुद्रस्य तुष्टये॥ य
दि तुष्टो महारुद्रो सिद्धिभिः किं प्रयोजनं॥ किं स्यात्तु निधिभिस्तस्य महापद्मादिभिस्तथा॥ कि

इति समयक्षचन्यासः॥ एवं षड्विधं देहांगन्यासं कृत्वा षडंगन्यासमारभेत्॥ ॐ नमो भगवते त्रि
यंबकाय शूलपाणिने रुद्राय नमः॥ ॐ नमो भगवते रुद्राय अष्टमूर्तये मां जीव शिरसे स्वाहा॥
ॐ नमो भगवते रुद्राय चंद्रशिरसे जटिने शिखायै वौषट्॥ ॐ नमो भगवते वह्निनेत्राय महामृत्युं
जय ह्रां मम रक्ष रक्ष अघोरास्त्राय फट्॥ एवंन्यासादिकं कृत्वा त्रिवो भूत्वा शिवं यजेत्॥ ततश्च
द्रमंडलोपरि च पद्मासनस्थं अवशामृत चंद्रकलाधरं योगमुद्राबद्धाधरद्वयहस्तं अ
मृतेन पूर्णकं कलशोत्तरे द्वयहस्तं सोमसूर्याग्निलोचनं पिंगजटाजूटं॥ नागभूषितं भक्तानु
कंपिनं रुद्रं ध्यात्वा स्वेष्टपूर्तिनिमनसा एवं पूर्वोक्तेन विधानेन अर्चयित्वा शरणं व्रजेत्॥ हस्ता
भ्यां कलशाद्वयामृतरसैराप्लावयंतं त्रिरोद्धाभ्यां तोर्द्धधृतं मृगान्द्वलयहस्ताभ्यां वहंतं परां श्रीकंठ्य
तकरद्वयात्तमृतघटं कैलासशृंगसंस्थं त्रिविंस्वच्छं भो जगत्तंत्रं चंद्रमुकुटं देवं त्रिनेत्रं भजेत्॥ एवंध्या

नपरोजपंकुर्यात्॥ मतांतरं॥ त्र्यंबकमितिमंत्रस्यमैत्रावरुणिर्वसिष्ठऋषिः। रुद्रोदेवता। अ
नुष्टुप्छंदः। त्र्यंबकमंत्रजपेविनियोगः॥ अथमूलमंत्रेणकरशुद्धिंकृत्वाप्रणवंकरतलयो
र्विन्यस्यव्यापकन्यासंकुर्यात्॥ व्याहृत्यादिमंत्रपदचतुष्टयंसर्वंकरतलयोरंगुलीषुविन्यसेत्।
ततःसर्वांगन्यासमारभेत्॥ ॐत्र्यंबकमितिशिरसि। यजामहइतिललाटे। सुगंधिमिति
मुखे। पुष्टिवर्द्धनमितिहृदये। उर्वारुकमिवइतिनाभौ। बंधनादितिकट्यां। मृत्योरितिऊरुद्वये॥
मुक्षीयेतिजानुद्वये। मामृतादितिपादद्वये॥ ॥इतिदशांगन्यासंकृत्वा॥ अथषडंगन्यासमारभे
त्॥ ॐनमोभगवतेत्र्यंबकायशूलपाणयेस्वाहा। हृदयायनमः। ॐनमोभगवतेरुद्रायचंद्रशि
रसेजटिनेस्वाहा। शिखायैवौषट्। ॐनमोभगवतेत्रिपुरांतकायह्रांह्रींह्रूंकवचायहुं। ॐन २०४
मोभगवतेत्रिलोचनायऋग्यजुःसाममंत्रायस्वाहानेत्रत्रयायवौषट्। ॐनमोभगवतेज्वल

यत्तुपृथिवीस्थास्यांयज्ञैःकिंभूरिदक्षिणैः॥ तुष्टेसर्वेश्वरेरुद्रेपूजितेचयथाविधि॥ एवंवि
धेमहारुद्रविधानेविहितेसति। अदेवोदेवमाप्नोतिनात्रकार्याविचारणा॥ ॥इतिश्रीविधा
नमालायांचतुर्वर्गचिंतामणिप्रोक्तंरुद्रविधानं॥ ॥अथवृक्षारोपणविधानं॥ ॥चतुर्वर्गचिं
तामणौ॥ अश्वत्थमेकंपिचुमंदमेकंन्यग्रोधमेकंदशचिंचिणीश्च॥ कपित्थबिल्वामलकीत्रयं
चपंचाम्रवापीनरकंनपश्येत्॥ तत्रकेषांचिदारोपणेसकामताकेषांचिदारोपणेनिःकामता॥
अश्वत्थनिंबानामारोपणेकेवलंनिःकामता। आम्रचिंचिण्यारोपणेकेवलंसकामतास्ति।
कपित्थबिल्वामलकीनांत्रयेऽपिस्वभावतोस्तीतिपुराणमतं॥ अन्येषांपुष्पजातीनांवृक्षाणां
सकामनिःकामतास्ति वृक्षगुल्मलतानांषड्विधत्वमभिरिष्यते। अंगैर्मूलैःक्षेत्रादिनिःफलैः
बीजैश्चकंदकैः अष्टादशप्रकारैश्चभारसंख्यानिगद्यते॥ तेष्वष्टादशभारेषुकुंजराश

नवत्तमः॥ तथैव वटवृक्षस्यात्तिचुमं दोपिता दृशः॥ तत्राश्वत्थजातो वर्णचतुष्टयमस्ति। उक्तं
तेषां हि। पक्षे मधौ मासे यस्य शुद्दलोद्भवः॥ दृश्यते स द्विजातिः स्यात् दापित्र्मुक्तिकारकाः॥ मधु
वैवासिते मासे स्वे दृश्यन्ते रक्तपल्लवाः॥ नवीनाबोध वृक्षस्य वापित्र्विलोककृतः॥ माधवे
मासि पातस्य पल्लवो यस्य दृश्यते॥ सारूप्यं च सिते पक्षे सदृदाति च वापित्रः॥ वैशाखे कृष्णप
क्षे च हरितपल्लवसंभवः॥ नूतनो दृश्यते यस्य स सर्वगुणदृश्यते॥ ब्राह्मणः क्षत्रियो वैश्यः
शूद्रश्चत्वार एव च॥ शुक्रोरकस्तुपापीतो हरितो जायते क्रमात्॥ उप्तो येन वये नूनं मो पु
त्रपौत्रप्रपौत्रकैः॥ संताने नंदयत्येनं चापितारं न संशयः॥ सर्वरोगेषु जद्दायस्य प्ररोहंति विमूस
वत्॥ सवटः शंकरः साक्षात् भुक्तिमुक्तिदः पितृः॥ निंबावरोपणे कर्त्तुर्गदमुक्तिः स्वकजायते॥ २०६
पंचांगसेविते निंबे मह्रः कष्टं विलीयते॥ धात्रीकपित्थाबिल्वानां रोपणं कीर्तिवर्द्धनं॥ प्रातर्यश

करस्तेस्कवापित्र् नत्र संशयः। प्रापणे शैशिरे काले वापितेचूतमैकैगलानिजनेत्कन्नमिदापंक्तौ
महाफलं। राज्यप्राप्नोत्यवितरक्षतासुबद्धपंक्तिषु। शिल्पोक्तेन विधानेन नात्र कार्या विचारणा। का
शोपंचकपुंन्नागजंबूपाटलिकादिकान्॥ तरूत्वापयिताश्रीमान् जायते पृथिवीपतिः॥ पिपालश्शं
करःद्वारिवटो मार्गश्चतुष्पथे॥ जलाशये गवां गोष्ठे रोपितः सर्वकामदः॥ निंबश्चतुष्पथे रोप्य स
द्बोधिक्रमेण च॥ यदा फलनि सान्द्रास्ते रुद्ररूपी न संशयः॥ पिप्पलस्य दलेनस्य निंबस्य गलितं फ
लं॥ विदधाति शिवे स्वर्लोमर्पितं स्वर्गलाममं॥ प्रदक्षिणप्रक्रमैः सप्तभिः पिप्पलद्रुमः। अनिवंद्यः श
ने प्रीत्येनने ःस्वहितं मी भुनिः। संस्पृश्य शनिवारे सोमसमालिंग्य पुनः पुनः। अन्यदा प्रणमेन्नैव सं
स्पृशेन्नु कदाचन॥ अश्वत्थसेवया धेनुस्पर्शनेन समालनेत्॥ गंगास्नानफलं सम्यक नात्र कार्या
विचारणा। आघाणां वापनेयत्नु विधानं क्रियते नरैः॥ वक्ष्यामि तत्समासेन हिताय प्राणिनामि

३॥कृष्णायांतुविसंरोप्यभूतपञ्चलसन्निधौ॥उद्यानेवाटिकायांचसंशोध्यपृथिवीतलं।मान
धृत्वातुवःसम्यगष्टादशगनांतरे।तत्रतंवापयेद्धीमान्फलाकृत्स्नलब्धये।धात्रीस्वदारिसं
योज्यपाकपित्थंजंबूचतुःपथे।शिवप्राकारमध्येतुवापयेत्श्रीतरुंपुमान्।निम्नदेशेत्रिवेणी
स्कचंपकंवाटिकांतरे।उदुंबरःसमारोप्यउद्यानेवापकांनने॥अन्यमंघ्रादयोवृक्षानृपो
द्यानेजलाश्रये॥आरोप्यविधिवद्धीमान्आशोकलतिकांनिम्बेकल्पारोधसिमाधवे।केचिन्म
तेनसारोप्यामाधवीमंडपांतरे।पिप्पलीनागवल्लीचम्लुवृक्षतलेतथा॥वाटिकान्यंतरेरोप्या
खर्जूरीकां।वृंदावनेतुलसींग्राम्यांतेपरिवापयेत्॥अन्यांश्चपुष्पजातीश्चयथाकालंयथा
रुचिपंतिः।एतत्फलंसमालोक्यवापयंतितरूनराः॥तेयांतिब्रह्मसायुज्यंविधूतक्लतकल्मषाः॥ २०
॥इतिश्रीविधानमालायांशिल्पशास्त्रेनोजहृतंवृक्षारोपणविधानं॥अथवृक्षोद्यापनविधानं॥

चतुर्वर्गचिंतामणौ।आरोपितस्यवृक्षस्यकुर्याद्युद्यापनाविधिंस्तरोः।नादौआध्यप्रकर्त्त
वंपिप्पलोद्यापनाविधौ।नचयज्ञमखंचादौविदधातयथावसु।सहस्त्रपर्णसंपत्तौमत्यांबो
धितचाधुवं।ज्ञानकर्मादिकारानिकुर्याद्दीदानिकाविधिः॥कार्यमुद्यापनंनूनविवादविधि
वन्नरैः॥उक्तशाखांसमारोप्यसमीपेपिप्पलस्यतु।आलवालेजलंदिप्सारुकंनमितंतुतो॥
शाखाखाचसवृक्षस्त्रतस्त्रयुग्मेनवेष्टतः॥सिंचनीयोपुत्रगंधेनमधुनासघृतेनच।तयोःशा
खामयात्हस्तान्चतुरःपरियोजयेत्।त्रिसूत्रेणत्रिवृत्तेनसंहृतव्यतस्तौप्रवेष्टयेत्।ब्र
ह्मवर्णस्यवृक्षस्यविधिरेषसनातनः॥क्षत्रियस्यतुवृक्षस्यन्तारोग्राह्यःपरःस्परं॥विश्यःप्रतो
दमाद्यातुरीयेपक्षत्रवयङः॥ ॥तथाचयाज्ञवल्कीयेधर्मशास्त्रेपाणिग्राह्यसवर्णास्तिष्टकीया
न्॥क्षत्रियावारंवैश्याप्राप्नोदमाद्याद्देनेलग्नपज्जन्मनः॥संयोज्यविधिवत्तौतुअङ्कान्वक्षो

सुवेष्टितौ। कृत्वाग्निवर्तनं सम्यक् जुहुयात्तिलसर्पिषि॥ प्रधानदेवताब्रह्माद्वृक्षस्यास्य नसं
शयः॥ ॥तत्र मंत्रः॥ ॥द्वासुपर्णा सयुजा सखाया इति। अष्टोत्तरसहस्रं च जुहुयात्तिलसर्पिषी॥
व्याहृतीर्निस्ततो होमं विदध्याच्चयपारुचि। चरुं साज्यं ततो जुहुयात् विद्वान् स्विष्टकृतं समं। सम
मित्यस्य कोपि साज्यान्वरु तिलाः शांतिपाठं ततो विद्वान् विप्रैश्च सहितः पठेत्॥ अग्रे पूर्व विना
गस्थं ब्रह्माणं पूजितः पुरा॥ स्वर्णमूर्त्तिफलैः साकं स्वर्णजे पीठसंस्थितौ॥ सवस्त्रं च ततो दद्या
दाचार्याय महाशयं सर्वज्ञाये धेनुं पयस्विनीं दद्यात्सुधीः सुशीलां वत्ससंयुतां। ब्राह्मणान्तो
षयेत्पश्चाद्दद्यात्तेभ्यश्च दक्षिणाः। वृक्षवेष्टनवस्त्रं च ब्राह्मणे च समर्पयेत्॥ नीराजयेत्ततो वृक्षं २०८
वृक्षमूलसमाश्रितं॥ समाश्रितं वृक्षदेहे विराजितमित्यर्थः॥ एवं कृते विधाने च पिप्पलोद्यापना
द्विधे। समग्रं जायते कर्तुः फलमारोपणोद्भवं॥ ॥इति श्रीविधानमालायां पिप्पलवृक्षोद्यापन

विधानं॥ ॥११७॥. ॥अथ वटोद्यापनं तत्रैवोक्तं॥ न बध्नाति फलं यावद्यावापिता वटपादपः॥
तावदुद्यापनं नैव कर्त्तव्यं हितमिच्छता॥ जाते फले तदा कार्यो वटस्योद्यापना विधिः॥
आदौ संवरणं कृत्वा परिमंशो धयेद्भूतलं॥ हस्तं वा चतुरस्रं वा वृक्षप्राकारसंवृतं॥ प्रा
कारांते ततः कुर्यान्मंडपं तोरणान्वितं॥ मंडपाभ्यंतरे कुर्यात् त्रिहोमकुंडं विचक्षणः। प्रयुत
स्योचितं सम्यक् सर्वलक्षणसंयुतं॥ ऋत्विजस्तत्र कर्त्तव्याश्चत्वारः कर्मकोविदाः। आचार्य
लक्षणोपेतमाचार्यं परिकल्पयेत्॥ जब्धवर्णं च कुर्वीत ब्राह्मणं यज्ञकर्मणि। स्वस्तिवाच्य
द्विजाः सर्वे च कुर्वेदपरायणाः॥ आदौ वृता ऋत्विजः स कृत्वा वह्निमुखं विज्ञो जुहुयात्पायसं साज्यं
गायत्र्याप्रयुतं ततः सावित्र्याः प्रीतये सर्वं ततो व्याहृतिभिर्यजिः। प्रधानं पायसं चैव सावित्री
देवतं परं॥ कृत्वा स्विष्टकृतं सम्यक् विसृज्य पर्यवाहनं॥ पूजितां पूर्वतः पीठे सावित्रीं प्रतिपूज

येतउपचारैःषोडशभिस्ततनसंवरणंतराः।आरुह्यवेदिकांसम्यक्कुर्यात्स्थंडिलमुत्तमं॥
अग्निंवक्त्रेतथतःकुर्याद्धवनंतत्रकारयेत्॥ततःसंवेष्टयेत्तरुं।त्रिसूत्र्यामंत्रतःसम्यक्परित
गीर्वाणाक्षिविति॥सुवर्णंदक्षिणांदद्यात्सयस्विनीं॥नैयग्रोधंफलंदद्यात्सौवर्णंस्त्रीत्रियायचास
वस्त्रांमंडिणींदद्यादाचार्यायमहीतले॥वस्त्रयुग्मंततोदद्यात्तत्पत्न्यैकंचुकादिकं॥कुंडले
हस्तमुद्रास्वर्णस्तत्तस्मैकर्णभूषणं॥ब्राह्मणान्भोजयेत्पश्चान्मिथुनानिचषोडश॥वंशपात्रा
णिसम्यक्वैदद्यात्तेभ्यःसमाहितः॥ततस्तुप्रार्थयेद्देवंब्राह्मणंकामलोकृतं॥सावित्रीचा
पितद्भिर्गैःमंत्रस्तोत्रैस्तथाविधिः॥आचार्यंप्रार्थयेत्पश्चात्सम्यक्सहृदयागिरा॥ततःप्रदक्षि २०९
णीकृत्यन्यग्रोधस्यसमाहितः॥सम्यक्फलमवाप्नोतिवटस्योद्यापनेकृते।यज्ञैःकिंबहुभि
र्दानैस्तपोभिस्तीर्थसाधनैः॥आरोपितेवटेनृणांसाक्षाच्छंकरविग्रहे॥ ॥इतिश्रीविधानमा

लायांचतुर्वर्गचिंतामणिप्रोक्तंवटोद्यापनविधानं॥ ॥अथतडागोद्यापनंतत्रविष्णु
पुराणे॥देवखातेतडागेचपुष्करिण्यांसरोवरे॥वाप्यांकूपेविशेषेणकुर्यादुद्यापनावि
धिं॥ ॥युधिष्ठिरउवाच॥ ॥तरंतिमनुजाःसम्यक्पतिताभवसागरे।प्रयांतिविलक्षस
युज्यंतन्ममाचक्ष्वमाधव॥ ॥श्रीकृष्णउवाच॥ ॥संसारगहनेघोरेपतितायेशरीरिणः॥
तेषामुद्धरणार्थायविधानंचिंतितंमया॥तडागंवासरोवापिदेवखातंतथापिवा।दीर्घिका
वापिकाकूपस्तथापुष्करिणीशुभा।शक्त्याउक्तानिमाकार्यासर्वपापापनुत्तये।तत्त्वेतेषांजला
श्रयाणांलक्षणंवक्ष्ये॥ऊर्ध्वमावध्यपाषाणैर्निम्नाडनिखनेन्महीं॥तत्रयज्जलमातिष्ठेत्सत
डागःप्रकीर्तितः॥जलांतःशोधयेद्भूमिंतत्रकुर्यात्प्रणालिकां॥आरोपयेच्चमलिनींसर्वज्ञातीः
प्रयत्नतः॥तन्मध्येरोपयेत्स्तंभंकाष्ठजंवाशिलामयं॥सरस्यारोपयेद्वृक्षान्वाटिकास्तत्रका

रयेत्॥ प्रतिष्ठां देवतानां च सरस्यंते नियोजयेत्॥ सरः सस्तं कृत्रिमं विंद्यात् लोकानंत्यायक
ल्पते॥ लक्षणं देवखातस्य मितोयत्परिवर्त्तते॥ सरोजं तत्कृत्रिमं वापि स्तं नैस्तक बकुलानि दृष्टंतं॥ गि
रौ वा पथि वा कार्यं दृढं पाषाणशोभितं॥ सा दीर्घिका विज्ञानीया लोकानंत्यप्रदा नृणां॥ वापि
का चतुरस्रा स्यात् सोपानैर्वर्जिता युतं॥ गंभीरांतः स्वच्छमुखं सोपानं पङ्क्तिशोभितं॥ नदेवखा
तमुद्दिष्टं मुनिभिस्तत्त्वदर्शिभिः॥ दीर्घिका दीर्घिका ज्ञेया द्विवक्त्रा निम्नभूतला॥ शोधिता जल
पर्यंतं दृढं पाषाणभूषिता॥ सा दीर्घिका विज्ञानीया लोकानंत्यप्रदा नृणां॥ वापिका चतुरास्या
स्यात् घटितास्मसमाहृता॥ चतुर्विंशति निर्युक्ता मूर्त्तिर्निर्मधुघातिनः॥ वाराहं कारयेत्तत्र शोषं
कूर्मसमाश्रयं॥ नागोलेको जदेड स्तंभ समयं कारयेत्सुधीः॥ अन्ये स्कंदे वलिंगे स्तक बकुलानि प २१०
रिशोभिता॥ पुरे वा पथि वा कार्या तथा देवस्य संनिधौ॥ वाटिकायां नृपोद्याने सा कार्या मुक्तिमि

च्छुभिः॥ चतुरास्या द्विवक्त्रा वा त्रिवक्त्रा वा प्रकल्पिता॥ सा वापिका समुद्दिष्टा लोकानां त्यप्रदा
नृणां॥ कूपमंदिरं प्रोक्तो बहु सोपानपंक्तिभिः॥ कपाटेन युतो चक्रे कूपः स परिकीर्त्तितः॥ एव
वक्त्रा पुष्करिणी संगमा सर्वदेहिनां॥ जलार्पिनीं पक्षिनां च स्तुगमायापरक्रमे॥ शिल्पिविज्ञैः
समुद्दिष्टा श्रेया पुष्करिणी फलं॥ पिबेत्पानीयमेकेनो तृषार्त्तो न्योपि कश्चन॥ कर्तुं स्वर्गफलायाय
कल्पते किं ततोधिकः॥ कल्पमानीयनिश्चेत्तु तत्रोद्यानप्रकल्पते॥ शालतालतमालादि पादपै
रूपशोभितं॥ इक्षणं वापयेत्तत्र करवीराकंदसंचयं॥ आर्द्रकं वंड निकावा शालांसंवर्द्धसं नवं॥ ए
तद्विधानं कल्प्यायां कर्त्तुकापविवा विवर्धनं॥ सर्वसंमानसादानां सरलां उपनुष्ठयं॥ कर्तांति षां
डानीत्रोनतत्रोद्यापनाविधिः॥ वापीकूपतडागानां कुर्याद्युद्यापनं बुधैः॥ आदौ निरास्पतत्कालं
ज्योतिःशास्त्रोदितं शुभं॥ जलाश्रयात्पश्चिमतो मंडपं कारयेद्बुधः॥ संशोध्य भूतलं रम्यं स्थंडिलं

तत्र कारयेत्॥ वानीर समिधश्चात्र सहस्रं जुहुयाद्बुधः॥ वरुणो देवता चात्र विदध्यात्कनक
स्य च॥ स्थंडिलात्पूर्वतः पूज्याः पीठे वानीरसंभवे॥ वस्त्रयुग्मे समासीनं मकरोपरि शास्त्रकं॥ पा
शं सवज्रं तथा खेटं तोमरं वा धृतदक्षिणान्॥ इत्याकर्मे विजानीयात्पाद्यादानां चतुष्टये॥ पश्चि
ह्निते तिमंत्रेण वारुणस्य वनं मतं॥ प्रधानं पाय संप्रोक्तं प्रायश्चित्तं तु सर्पिषा॥ होमांते विधिव
त्कुर्यात्त्रिति हृद्यं तु पाशिनः॥ आचार्याय ततो दद्यान्महिषीं च पयस्विनीं॥ ब्राह्मणे वस्त्रयुग्मं च कु
र्यात्तस्यो नूपुरद्दक्षिणा॥ मूर्त्तिमाचार्यवर्याय दद्याद्वस्त्रसमाहृतां॥ अनिरोधं कंतनं कुर्यात्प्रापः कर्त्तु
समाहितः॥ मूर्त्तीनां च कल्याण्यासं कुर्याद्देवस्य वज्रिणः॥ वराहस्य महोषस्य स्तकर्मस्थापित
त्ववित्॥ तथैव देवदेवस्य जलाश्रयविधानकं॥ कुर्यात्फलसमावाप्स्येत्स्वर्गस्य तु न संशयः॥ ब्रा १११
ह्मणान्भोजयेत्पश्चात्सन्मानैः परितोषयेत्॥ एवं कृत्वा तु वाप्यादि जलस्योद्यापनं सुधीः॥ प्रा

कृयाद् द्विजलोकस्य स्वर्गावंतीच समीपतां॥ यज्ञैः किं बहुभिर्नृप तपोभिर्व्रतैस्तथा॥ एकागोतृप्ति
कृत्तोयं यदि स्रमो विधीयते॥ यथा गंगाजलं श्रेष्ठं तडागं बुत पाविधां॥ हु मज्जलाश्रये युधिष्ठि
रतः॥ तथा च याज्ञवल्क्यः॥ शुचिगोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतमिति॥ तथा च दानखंडे ज
लाधारं जगच्चं विजलाधारादिदेवता॥ तस्माज्जलप्रदानेन प्रीतो भवति केशव॥ ॥
इति जलप्रशंसा॥ ॥ इति श्रीविधानमालायां भविष्यपुराणोक्तं वापीकूपादिजलाश्रयोद्या
पनविधानं॥ ॥ अथ प्रपाविधानं॥ ॥ भविष्यपुराणे। कृष्णयुधिष्ठिरसंवादे॥ ॥ युधिष्ठि
र उवाच॥ ॥ कथं कृष्ण तरंत्यत्र संसारे पतिता नराः॥ स्वल्पेनैव तु कालेन तपोदानेन संश
ये॥ ॥ श्रीकृष्ण उवाच॥ ॥ विधानमेकमत्रोक्तं सामान्ये नरसेवितं॥ प्रपाख्यं विधिराजेंद्र
कथ्यमानं शृणुष्व तत्॥ यस्मिन्पापिजलेनास्ति नास्ति यामसमीपगः॥ प्रपात च प्रकर्त्तव्या॥

स्वर्गकामैर्मुनिनरैः॥ माघे मासि सिते पक्षे शिवरात्रौ विशेषतः॥ तत्वा तु मंडपं रम्यं चतुर्व
र्णास्तु शोभितं॥ शालाशिलामखीकार्यदृढैस्तंभैर्विराजिता॥ एकवक्त्रा द्विवक्त्रा वा पूर्वोत्तर
मुखा तु वा॥ मार्गाणां संतिबाकुल्ये यत्र कुत्र च वर्त्मनि॥ तत्र तां सारयेद्धीमान् माणिकं वनि
द्मंक्रमेनसुगंधिना॥ आत्मलेतिमंत्रेणारवेरावाहनंभवेत्। तेनैवपूजनंस्यात्ततेनैवयजन

क्रिया॥ आचार्यप्रमुखान्विप्रान्मानपूर्वंसमार्चयेत्॥ वाचयेत्स्वस्तिवाग्वसार्द्धंतैर्द्विजसत्त
मैः॥ ततोवह्निमुखंकृत्वासमिद्भिर्जुहुयात्सुधीः। अयुतंवासहस्रंवाचर्कजातिर्विचक्षणैः।
ततस्तुपायसेनैवसाज्येनापिसमाहितः॥ तिलैःसव्रीहिकैःपश्चात्सहस्रंचरुपुष्पकं॥
खर्जूरैर्नारिकेलैश्चकदलैश्चविशेषतः॥ प्रायश्चित्तंचतेनैवव्याहृतिस्तिलसर्पिषा॥ आदित्
प्रीतयेस्विष्टकृतंभवतिपायसान्॥ शांतिपाठंततोविप्राआचार्यप्रमुखाश्चये॥ पठेयुःसर्वशा
स्त्रीयाःयजमानइतिध्रुवा। बलिप्रदानपूर्वंचप्रतिपूज्यरवेःपुनः। विदध्यात्धूपपुष्पाद्यैस्त
तोदानविधिःस्मृतः॥ क्षीरिणींलोहितांधेनुंसवत्सांवारुरूपिणीं॥ दद्यात्सदक्षिणांधेनुमा
चार्यायमहाशयः॥ सप्तसप्तेभवैमीयसरपाश्वाससारर्पिं॥ आचार्यायततोदद्यात्वस्त्रालंका
रभूषितं॥ ब्राह्मणेकनकंदद्यात्तोगान्पूज्यायपाविधि। सौरिश्वसूक्तिपाठेनश्नोनवोधम

दीधितिः प्रोक्तव्या ब्राह्मणाः सम्यक्स्त्र इत्त्रशतसंख्यया॥ प्रसन्नेन महीपेन किं स्यात्कार्यं
शरीरिणां॥ धर्मार्थकाममसिद्ध्यर्थं मम पौकिः प्रसादितः॥ ॥इति श्रीविधानमालायां सू
र्यपूजाविधानं॥ ॥अथ चंद्रपूजाविधानं॥ ॥द्वितीयश्च चतुर्थश्च पंचमः सप्तमोऽष्टमः।
नवमो द्वादशश्चैव गोचरे नाशुभप्रदः॥ तत्रापि द्वादशाब्धिस्थो वेधेन रहितः शा
शी॥ विराशिकरः प्रोक्तो विधेऽपि मरणस्थितः॥ अन्यत्र क्लेशदश्चैव नृणां भवति निश्चया
त्॥ तस्मात्पूज्यः प्रयत्नेन विवाहे व्याधिरादिषु। राजावलोकने ईर्म्यप्रवेशे धनसंग्रहे। यात्रा
यां च विवाहे च पूजनीयो सोमः शशी॥ पंचांगे शुभदः प्राप्ते कर्तव्यं स्व इति श्रुतिः॥ पूजनं च
शशिसम्यक् नार्य विप्रेण वा॥ आचार्यप्रवरं साधु समाहूय निजालयं॥ ऋत्विग्भि २५५
र्ब्राह्मणैः सार्द्धं वृणुयाच्चंद्रतुष्टये। वृते विप्रवरे तस्मिन् ब्रह्माद्यैः सहिते चितिः। स्वस्तिवाच

नपूर्वं च प्रारंभेत्पूजनं विधेः॥ कृत्वा स्थंडिलमाराद्भं पद्मे पालाशजे विधुः॥ पूजयेच्छ
तपत्रैश्च चंद्ररश्वेचमंडले। चंदनेन सुगंधेन अक्षतैः सम्यग्विचक्षणैः। प्रत्यग्मुखाय
सोमाय दद्याद्दासनकं बुधः॥ अत्रेश्चंद्र जगत्प्राण यमुनाविषयोद्भव॥ श्वेतवर्णात्रि
गोत्रं दोगदापाणेवरप्रद॥ दशाश्व वाहनागच्छ उमारूपी समाविश। चंद्रमामनसो
— — त्वा तं समाकयेत्॥ श्रीश्चतेतिमंत्रेण विरोधा वाहनं भवेत्। आप्यायस्वेतिमंत्रस्य
गोतम ऋषिः सोमो देवता गायत्री छंदः। सोमप्रीत्यर्थे होमे विनियोगः॥ पालाशी समिधश्चा
त्र सहस्रं समुदाहृतः। अष्टावेव सहस्रस्य स्थाने अष्टोत्तरं तथा। पायसेन ततः कुर्याद्धवनं
च समं सर्पिषा। सहस्रं वा शतं वापि द्रव्यात्रावे विचक्षणः॥ तिलैः सव्रीहिकैः कुर्यात्त्व्याहृति
स्त्रयथा विधि। आज्येन मधुना सार्धं प्रायश्चित्तं जपेद्बुधः॥ ततः स्विष्टकृतं कुर्याच्छेषं होमवि

धेः क्रमात्॥ शांतिसर्वत्र विशेषेण पठितव्या समंततः॥ प्रतिपूजाविधेः पश्चात्कुर्याद्दानवि
धिं बुधः॥ शंखं च मौक्तिकैः पूर्णमाचार्याय निवेदयेत्॥ वस्त्रं रक्तं च संदद्याद्ब्राह्मणा
य सदक्षिणं॥ रौप्यं दद्याद्घृतपात्रं नं धेनुं वाथ पयस्विनीं॥ कस्मैचिद्विप्रवर्याय सवत्सां च
सदक्षिणां॥ एवं निष्पादितविधिर्दानस्य चाशिष्टये॥ अभिषिक्तः स्नातः कर्त्ता ब्राह्मणांश्चो
जयेद्बुधान्॥ हुतविघ्नः प्रतीकारो नंदते तु विमानवः॥ सुधाकरप्रसादेन नात्र कार्या विचा
रणा॥ ॥इति श्री विधानमालायां चंद्रपूजाविधानं॥ ॥अथ मंगलपूजाविधानं॥ ॥
प्रथमस्थो द्वितीयश्च चतुर्थः पंचमस्तथा॥ सप्तमश्चाष्टमो भौमो नवमो द्वादशो भवन्॥ द्वा
दशाष्टजन्मस्थो विशेषेपि पृथिवीसुतः॥ करोति प्राणसंदेहो देहात्यागो धनक्षयः॥ यदा भ २४५
वेत्कर्त्तुः पीडा वा भौमसंभवा॥ तदा पूजा प्रकर्त्तव्या मंगलस्य यथाविधि॥ पंचांगे गुणसं

पन्ने पूजायोग्य धनागमे॥ तदेव पत्रतः कुर्याद्भौमपूजां विचक्षणः॥ स्नात्वा तीर्थैर्नदी
तोये प्रातःकाले विचक्षणः॥ कृत्वाह्निकविधिं गेहमागत्य प्रियमानसः॥ प्रारभेद्भौ
मदेवस्य प्रीतये पूजनक्रियां॥ विहिते मंडपे द्वारे शोधिते पृथिवीतले॥ आचार्यं च समा
हूय वरयेदृत्विजांगणं॥ ब्राह्मणं वापि विद्वांसं कुशलं यज्ञकर्मणि॥ स्वस्तिवाचनपूर्वं पि
विदध्यात्सा च पूजने॥ रक्तचंदनपट्टे च खदिरे वाथ यावतः॥ वस्त्रे लोहितवर्णे च तंडुलैः
परिपूजयेत्॥ रक्तचंदनकल्केन त्रिकोणं पीठमालिखेत्॥ प्रतिष्ठामंत्रमुच्चार्य विन्यसे
त्तत्र मंगलं॥ रक्तचंदनजं त्वा ताम्रं वा तदभावतः॥ वैद्रुमं पद्मरागं वा भूमिपुत्रं विदुर्बु
धाः॥ दक्षिणाभिमुखं भौमं पूजयेत्प्रयतः सुधीः॥ करवीरैर्जपापुष्पैः सिंदूरासंभवैस्त
था॥ अन्यैश्च लोहितैः पुष्पैरर्चयेद्भूमिनंदनं॥ आगच्छ पृथिवीपुत्र भारद्वाजकुलोद्भवा

ऊर्यं न्याधिपतिश्री। नक्षत्र बाऽिमहामते शूलशक्तिगदापाणे वरदाभयमंडिता॥ अत्रो
होमयज्ञाध्यक्ष यज्ञेस्मिन् कुरु सन्निधिं॥ इत्यावाह्य धरासूनुं मंगलायनं॥ पदक्कं देति हो
मस्य होममंत्रं विदुर्बुधाः॥ अग्निर्मूर्द्धा दिवइति मंत्रो होइति पूजनं॥ द्वयोरसंभवे मंत्रो
गायत्री संप्रकीर्त्तिता॥ पूजनावाहनादीनां इदं मंत्रत्रयं मतं। समिधः खादिरस्यात्र चरु
द्रव्यं च धनकं॥ सहस्रं समिधं प्रोक्तं सहस्रं हवनं चरोः। पूर्वविद्याहुती प्रोक्ता अयुतं वा
ततः परं॥ प्रायश्चित्तं हुतं नैव सर्वस्विष्टकृतं भवेत्॥ होमांते बलिदानं च कर्त्तव्यं विधि
वन्नृपा॥ शांतिपाठं ततो विप्रा न्यगेद्विप्र समंततः। परिहृज्जांत तत्कृत्वा दानं दद्यात्ततः परं।
रक्तवस्त्रमनड्वाहं विद्रुमं होमतुष्टिदं॥ रक्ताश्च व्रीहयो रक्ताश्चाष्टकोहोमतुष्टिदः॥ ता २५६
म्रपात्रघ्नायपात्रं सुवर्णं तिदक्षिणाततः। अभिषिक्तस्ततः कर्त्ता दानं दत्वा यथा विधि। ब्राह्म

णान् भोजयेत्पश्चादाचार्यं प्रार्थयेत्ततः॥ मूलमंत्रेण तस्य वैहोमपाठे समर्पयेत्॥ आचार्याय कु
जीनायनाशस्त्र ज्ञायकुटं विने॥ एवं कृते विधाने च होमशांतिर्न वेदिह॥ तुष्टिदः पुष्टिदो होमः
प्रसन्नो जायते नृणां॥ नदाति विपुलान्भोगान्नात्र कार्या विचारणा॥ ॥ इति श्रीशांतिपाठोक्तं हो
मप्रसन्नीकरणविधानं॥ ॥ अथ बुधशांतिविधानं॥ ॥ प्रथमस्तु द्वितीयस्तु पंचमः सप्तमस्त
था। नवमो दशमश्चैव षष्ठो दशो त्रसु होबुधः॥ उद्वेगमनसो व्याधिं धनहानिं ततो पि चान्यस्याः
शांतिः प्रकर्त्तव्या नरेणाहितमिच्छता॥ मृत्युवारादिपं चांगे प्रारंभे शांतिकं वदन्। अन्येषां बल
माश्रित्य दायचंद्राच्च तात्त्विकः॥ आचार्यं वेदशास्त्रज्ञं समाहूय समंजसा। वरयेद्यज्ञसिध्यर्थं
कृत्विग्भिर्ब्राह्मणैः सह॥ कांचनस्य तरोप हे पूजयेच्च मनसुनोग्रहः॥ वस्त्रेण नूतनेरम्ये मंडले बाण
संमिते॥ उद्बुध्यस्वेतिच ऋचा सौम्यस्यावाहनादिकं॥ होमांतं कर्म कुर्वीत गायत्र्या वा समाहि

नः॥ उत्तराभिमुखः सौम्य पूजनीयामनीषिभिः॥ अशेषचंद्रसुतः श्रीमान्मागधायांसमुद्भवः॥
अत्रिगोत्रश्चतुर्बाहुःशिरवद्गवैकटधारकः॥ गदावरदसौ क्रूरस्त्वतमकांतिस्वरप्रभः॥ नीलपंक
जपत्रस्यपुष्पंर्विलिक्का रितोदितं॥ इत्यादिसकलं कृत्वा सुवर्णं तनुमुत्तमं॥ सौम्यं चततन्म
त्रैय पूजयेत्प्रयतः समैः॥ शतपत्रैश्चकल्हारैःसुस्निग्धैस्तकलसौद्भवैःगंधपुष्पंतथाधूपं
दीपंनैवेद्यमेवच॥ तांबूलंचसकर्पूरंबुधप्रीत्यैनिवेदयेत्॥ ततस्तुपुज्जलमादाय स्वगृह्योक्त
विचक्षणः॥ कृत्वावह्निमुखंसम्यक्समिधोजुहुयात्ततः॥ अपामार्गस्यसुस्निग्धाःसहस्रंच
तत्क्षणः॥ मधुघृतं पायसंपश्चात्तावत्संख्यं विचक्षणः॥ पद्मैश्चशतपत्रैश्चबिल्वपत्रैश्चशोभनैः॥ २५७
खर्जूरीनारिकेलैश्च माक्षिकादलिविल्वकैः॥ हवनं तु यथाशास्त्रंकुर्यात्श्रद्धासमन्वितः॥ द
ध्यन्नंपायसंचात्रपायसंस्विष्टकृतं भवेत्॥ होमांते प्रतिष्ठांते दानंदद्याद्विचक्षणः॥ तुष्टि

कृत्सुष्टिकृत्तु नात्र कार्यविचारणा॥ ॥इतिश्रीविधानमालायांशांतिपाटलोक्तं बुधशांतिवि
धानं॥ ॥अथगुरुशांतिविधानं॥ ॥जन्मस्थोवातृतीयस्थोगुरुर्दोषंकरोभवेत्॥ तथाषष्ठ
श्चतुर्थोपिमृतिकर्त्त्वव्यवस्थितः॥ हानिंशारीरपीडांचकुरुतेनात्रसंशयः॥ विधानंतत्रकर्त्त
व्यंनरैरेणाद्विजमिच्छता॥ शुभकालेप्रकर्त्तव्यंविधिवत्पूजनंगुरोः॥ कृत्वास्वर्णमयींमूर्त्तिं
निष्कस्यापिविचक्षणः॥ पूजयेद्वारिपट्टेप्रतिष्ठाप्यबृहस्पतिं॥ पीठेतंडुलजेकार्यंवृत्ताका
रमंडलं॥ उत्तराभिमुखस्तत्रपूजनीयोबृहस्पतिः॥ पुष्पैरागस्त्यसंभूतैःपंच केसृतपत्रकैः॥
अशेषवाचस्पतेजांवाः सिंधुमंडलसंभव॥ एत्यांगिरससंभूतश्याकृष्णुश्चतुर्भुजः॥ दंडा
क्षसूत्रवरदःकमंडलुधरप्रभो॥ मरुन्निकेतिसंभूज्यो विधिवन्नाकिनांगुरुः॥ ब्रह्मब्रह्मेति
मंत्रेणगायत्र्यावासमाहितः॥ मरुस्त्रंसमिधश्चात्रबोधिपादपसंभव॥ चरुर्वापायसंवापि

प्रदानमहिसंमतं॥ सहस्रसंमितं कर्त्ता विदध्याद्भवनं गुरोः॥ बिल्वानि नारिकेलानि जुहु-
याद्धोमसिद्धये॥ प्रायश्चित्तं घृतं कार्यं पायसं स्विष्टकृद्भवेत्॥ व्याहृतीर्जुहुयाद्धीमान्होमसि-
ध्यर्थमेव च। होमांते प्रतिपूजास्याद्देवाचार्यस्य तुष्टये॥ गंधं मलयजं चात्र दद्याद्गो धूप
उत्तमः॥ पुष्पमागस्त्यसंभूतं दीपमाज्येन पूरितं॥ नैवेद्यं दधिभक्तं च तांबूलेन समन्वि-
तं॥ एवं कृत्वा विधानज्ञः प्रतिपूजां बृहस्पतेः। श्रेयः संपादनार्थं प्रदद्यात्पीतमंबरं॥ दुकूलं
मुख्यतामेव समुद्दिष्टं मनीषिभिः। कार्पासजमथालाभे दुकूलं स्यात्तु तं नवं॥ आचार्यो य-
कुलीनाय श्रोत्रियाय कुटुंबिने॥ दद्यात्सदक्षिणां कर्त्ता प्रीतये न्यूनतां गुरोः॥ ऋत्विग्भ्यश्च धनं
देयं ब्राह्मणेभ्यः धेनुरुत्तमा॥ बलिप्रदानमिष्टस्य स्वर्गनिर्वाहि स्मृतं॥ कृत्वा पूजाविधानं
ज्ञो भोगानाप्नोति पुष्कलान्॥ ॥इति श्रीविधानमालायां शांतिपाटलोके गुरुप्रसन्नीकरणं २४८

विधानं॥ ॥अथ शुक्रपूजाविधानं॥ ॥द्वितीयः सप्तमः कार्यो दशमो गोचरे शुभः॥ अन्यत्र
पादशो दृष्टः प्रोक्तः शास्त्रविचक्षणैः॥ गोचरे वर्त्तमानस्य विवाहे गमने तथा॥ जातकादिषु
सर्वत्र दुष्टः पूज्यो भृगोः सुतः॥ पंचांगे शुभदे प्रोक्ते मनस्तस्य समुन्नते॥ आचार्यं प्रतिपू-
ज्याथ वरयेद्ब्राह्मणादिषु॥ स्वस्तिवाचनपूर्वं तु कुर्याद्दैत्येश्वरार्चनं॥ आम्रवृक्षस्य पट्टे
शुभ्रवस्त्रेण संयुते॥ राजतं भृगुवंश्यं तं स्थापयेन्मंत्रविद्द्विजः॥ पंचामृतैस्ततः संस्नाप्य सं-
धार्य स्रक्मनोहरैः॥ समुच्चार्य प्रयोगं च तं जलोपरि विन्यसेत्॥ मंडले पंचकोणे च विहि-
ते तंडुलोत्तमैः॥ नाम वंशं समुच्चार्य दानं वेद्यां समाश्रये॥ शुक्रो भोजकटे जातः श्वेता-
श्ववाहनः॥ समागच्छ चतुर्बाहो भृगुगोत्रविभूषण। परिपाल्यावली हस्तः कमंडलुध-
रस्तथा॥ पूर्वपत्रे तिष्ठ शुक्र स्थप शुक्रघोतानि पूजितः॥ कृत्वाचाग्निमुखं विद्वान्स घृतं जुहुया-

स्रुवं। अष्टोत्तरसहस्रं च यज्ञांगसमिधस्तथा॥ यथाविधिजुहुयाद्वह्नौ स्विष्टकृतेन तथा॥ गंध
पुष्पादिकं सर्वं विदध्यात्प्रतिपूजयेत्॥ श्वेतं तुरंगमं दद्याद्दक्षिणार्थं च भक्तिमान्॥ एवं संपू
जिते दैत्यगुरौ रोगहीनमवाप्नुयात्॥ यात्रामुखविवाहे च गोचरे यदि निवेशने। पूज्यो दैत्येंद्र
पूज्यो सौ नात्र कार्या विचारणा॥ ॥इति श्रीविधानमालायां शांतिपटले शुक्रपूजाविधा
नं॥ ॥अथ शनैश्चरपूजाविधानं॥ ॥प्रथमस्थो द्वितीयस्थश्चतुर्थः पंचमस्तथा॥ सप्तम
श्चाष्टमो मंदो नवमो द्वादशो भवेत्॥ करोति प्राणिनां देह धनदेशपरिप्लवं॥ कालाख्यं शनि
रूपेण वर्तते भुवनत्रये॥ पूजनीयः प्रयत्नेन होमदानार्चनादिभिः॥ जन्मसंस्थेन मंदेन
रावणो विनिपातितः॥ तेनैव च द्वितीयेन कार्त्तवीर्यो निपातितः॥ चतुर्थेन सुराध्यक्षः पं २४९
चमेन नलो नृपः॥ स्वराज्यात्प्रापितो भ्रंशं द्यूनस्थेनोत्तमेन वै॥ अष्टमेन महादेवो गजरूपी

कृतः पुरा॥ नवमेन कुरुश्रेष्ठो द्यूताधानस्थकारितः॥ द्वादशेनार्कपुत्रेण जमदग्निर्निपा
तितः॥ नबलंप्रोछिरुग्रत्वनष्टार्त्तत्वं न निक्रवं॥ सद्भक्तिपूजनं चात्र शनैश्चरसुतुष्टिदं।
स्वगृह्योक्तेन विधिना पूजनीयः शनैश्चरः॥ सर्वकामफलावाप्त्यै नात्र कार्या विचारणा॥
कृष्णाजिनमये पीठे खादिरे वायसे तथा॥ तंदुलैः कारयेत्पीठं कर्णिकांतिरलंकृतं। पश्चि
मे पश्चपत्रे च मंडलं धनुराकृति। तत्र तु स्थापयेत्तत्र सूर्यपुत्रं यथाविधि॥ ततश्चावा
हनमंत्रः॥ ॥अहो सौराष्ट्रसंजातः छायापुत्रश्चतुर्भुजः॥ कृष्णवर्णार्कगोत्रेय बाणह
स्त धनुर्द्धर। त्रिशूली — समागच्छ वरदो गृध्रवाहनः॥ नीलद्युतिः शूलधरः किरीटी गृ
ध्रस्थितस्त्राणकरो धनुष्मान्॥ चतुर्भुजः सूर्यसुतः प्रशांतो वरप्रदो मेस्तु स मंदगामी॥
प्रजापतेति सं पूज्य सरोजपश्चिमे दले॥ इत्यावाह्य धनुराकृतिमंडले कृष्णगिरिकर्णिका

पुष्पैः सहस्रं प्रतिष्ठापयेत्॥ प्रजापतेतिमंत्रेण कुर्याद्धोमादिकं बुधः॥ सहस्रसंमितं
कुर्याद्धवनं चरुणा बुधः॥ होमांते विधिवद्दद्यात्कपिलां धेनुं पयस्विनीं॥ मूर्तिं च सूर्यपु
त्रस्य दद्याद्धेमयीं शुभां॥ सदक्षिणां सवस्त्रां च कुलीनाय कुटुंबिने॥ आचार्याय
शुद्धाचारो ब्राह्मणे महिषीं तथा॥ अन्येभ्यो ब्राह्मणेभ्यश्च दद्यात्द्रव्यं यथावलम्॥ ब्राह्म
णान् भोजयेत्पश्चात्नानागोत्रसमुद्भवान्॥ या मूर्तिः पूजिता होमे तत्कालस्नाय सा शु
ना॥ दत्वा विप्राय तां पश्चाद्याचयेत्प्रतिरिक्तपान्॥ तैलं लोहे विनिःक्षिप्य दीपिकाभृतं च का
रयेत्॥ ब्राह्मणान् भोजयेद्भक्त्या तिलान्माषान्सु निर्वपन्॥ अतावेविप्रमुक्तैक्तः विधिरेषः
सनातनः॥ एवं कृत्वा विधानं च सर्वदा सुखमाप्स्यसि॥ ॥इति श्रीविधानमालायां शांतिपट २५०
लोक्तं शनैश्चरपूजाविधानं॥ ॥शौनक उवाच॥ ॥रघुवंशेषु विख्यातो राजा दशर

थोऽभूत्पुरा॥ चक्रवर्ती स विजयी सप्तद्वीपाधिपो नृपः॥ कृत्तिकांते शनिं ज्ञात्वा दैवज्ञैर्ज्ञापि
तिसः॥ रोहिणीं भेदयित्वाद्य शनिर्यास्यति सांप्रतं॥ शाकटं भेदयित्वा तु सुरासुरभयं
करः॥ द्वादशाब्दं तु दुर्भिक्षं भविष्यति सुदारुणं॥ एवं श्रुत्वा ततो वाक्यं मंत्रिभिः सह
पार्थिवः॥ मंत्रयामास किमिदं भयंकरमुपस्थितं॥ देशाश्च नगरग्रामा भयभीता समन्वि
ता॥ आकुलं च जगद्दृष्ट्वा पौरं जनपदादिकं॥ ध्रुवं हि सर्वलोकानां क्षयायैतत्समाग
मं॥ पप्रच्छ प्रयतो राजा वसिष्ठप्रमुखान्द्विजान्॥ ॥दशरथ उवाच॥ ॥प्रजापालनस्या
समाधानं किमत्रास्ति ब्रूहि तद्द्विजसत्तम॥ कालत्रयस्य विज्ञाने यतस्याद्भवतेमतिः॥ ॥
वसिष्ठ उवाच॥ ॥प्रजापालनन्तत्वाज्ञातस्मिन्नीतेच्छत प्रजाः॥ लोकानां पालनायैव नि
र्मितः परमेष्ठिना॥ सगस्तिब्रह्मणा कार्यो यज्ञभुक्तिस्त्वविक्षुना॥ प्रजानां पालनं राज्ञा

कर्त्तव्यं धर्मनिश्चया॥ एषएवपरोधर्मोराज्ञोप्रोक्तोमनीषिभिः॥ नलोकानुरंजनतेराजा
नरस्तूपतिन्नृपन्नज्ञाः॥ नवस्तुरन्युपायोन्यस्तच्चक्रस्योवरोधच्छल॥ रोहिणीरच्छनेपस्त्वं
मत्प्रकृतसुशांतये॥ ॥शौनकउ०॥ ॥तदाविविच्यमनसा हंसंपरमंनृपः॥ समादायध
नुर्दिव्यंदिव्यायुधसमन्वितं॥ रथमारुह्यवेगेनगतोनक्षत्रमंडलं॥ योजनानांगतो
लक्षंसूर्यायोपरिसंस्थितः॥ रोहिणींपृष्ठतःकृत्वाराजादशरथोबली॥ रथेउकांचनेदिव्ये
--मुक्तामणिविभूषणे॥ हंसवर्णहयैर्युक्ते महाकेतुविभूषिते॥ दीप्यमानोमहारत्नै
र्निषिक्तैमर्कतैरिव॥ बभ्राजसतदाकाशेद्वितीयइवभास्करः॥ आकर्णपूरितेचापेसंहारा
स्त्रमयोजयत॥ कृत्तिकांतेशनिस्थित्वाप्राविशल्किलरोहिणीं॥ सदृष्ट्वानृपालंतंभ्रकुटी २५१
कुटिलाननं॥ संहारास्त्रंशनिर्दृष्ट्वासुरासुरभयंकरं॥ हसित्वातद्भयाच्छौरिरिदंवच

नमब्रवीत्॥ ॥शनिरुवाच॥ ॥पौरुषंतवराजेंद्र परंरिपुभयंकरं॥ देवासुरमनुष्याश्च
सिद्धविद्याधरोरगाः॥ मयावलोकिताराजन्भूदैत्यदानवपुंगवाः॥ राजानोबहवःशूराःक
जांनाहंतितेनच॥ तुष्टोहंतवराजेंद्र तपसापौरुषेणच॥ क्षात्रेणतेजसावीरत्वदन्योनास्ति
भूतले॥ वरंब्रूहिप्रदास्यामिमनोभिलषितंनृप॥ माकुरुष्वात्रसंदेहं सर्वकामप्रदोह्य
हं॥ ॥श्रीदशरथउवाच॥ ॥रोहिणीतेदयितात्तुनगंतव्यंत्वयाशने॥ सरितःसागरायाव
वद्यावच्चंद्रार्कभूमयः॥ यावंतिहिमयांसोरेनान्यमिच्छामितेवरं॥ यतोहिभगवान्निंम
विक्लरूपार्कसंनिभौवौः॥ एवमस्त्विति संप्राह छायामूर्त्तिमिभुरूवं॥ संप्राप्यैवंवरंराजाकृ
तकृत्योभवत्तदा॥ द्वादशाष्टंतुधर्न्निहिं नविष्यतिनजातुचित्॥ कीर्त्तिरेषामदीयास्तुत्रै
लोक्येतिचराचरे॥ एवंवरंतुसंप्राप हृष्टचित्तस्तपार्थिवः॥ रथोपस्थेधनुस्त्याप्यभूत्वाचै

नमोदीर्घायशुष्कायकालदृष्टेनमोनमः।नमस्तेकोटराक्षायदुर्निरीक्ष्यायनमोनमः।४

वक्त्रांजलिः॥ध्यात्वासरस्वतींदेवींगणनाथंविनायकं॥राजादशरथस्तोत्रंसौरेरिद
मथाकरोत्॥ ॥श्रीदशरथउवाच॥ ॥ॐनमःकृष्णनीलायशितिकंठनिभायच॥नमो
निर्मांसदेहायदीर्घश्मश्रुजटायच॥नमोविशालनेत्रायशुष्कोदरभयायच॥नमः
पुरुषगात्रायस्थूलरोमायवैयच॥नमोनित्यंक्षुधार्त्तायअतृप्तायचवैनमः॥नमोघोरा
यरौद्रायभीषणायकरालिने॥नमस्तेसर्वभक्षायबलीमुखनमोस्तुते॥सूर्यपुत्रनम
स्तेस्तुभास्करेभयदायिने॥अधोदृष्टिनमस्तेस्तुसंवर्त्तकनमोस्तुते॥नमोमंदगतेतुभ्यं
निस्त्रिंशस्त्वनमोस्तुते॥तपसादग्धदेहायनित्ययोगरतायच॥ज्ञानदृष्टेनमस्तेस्तुक
श्यपात्मजसूनवे॥तुष्टोददासिराज्यंचरुष्टोहरसितत्क्षणात्॥देवासुरमनुष्याश्चसिद्धवि २५२
द्याधरोरगाः॥त्वयाविलोकिताःसौरेदैन्यमाशुव्रजंतिहि॥ब्रह्माशक्रोमनुश्चैवऋषयस्स

प्ततारकाः॥राज्यभ्रष्टापतंतीहतवदृष्ट्याविलोकिताः॥देशाश्चनगरग्रामाद्वीपाश्चसरितस्त
था॥त्वयावलोकिताःसर्वेनश्यंत्याशुसमूलतः॥प्रसादंकुरुमेसौरेवरदोभवभास्करे॥एवंस्तु
तस्तदासौरिर्ग्रहराजोमहाबलः॥अब्रवीच्चततोवाक्यंहृष्टरोमासभास्करिः॥तुष्टोहंतव
राजेंद्रस्तोत्रेणानेनसुव्रत॥वरंब्रूहिप्रदास्यामिमनसायदभीप्सितं॥अद्यप्रभृतितेसौरेपी
डाकार्यानकस्यचित्॥देवासुरमनुष्याणांपशुपक्षिशरीरिणां॥सर्वेषामपिलोकानांक्षेमदोभ
वभास्करे॥ ॥शनैश्चरउवाच॥ ॥अदेयानीतिग्रहज्ञेयाग्रहापीडाकराःस्मृताः॥यदिवस्तुनरो
द्वेषभक्त्याचैवददामिते॥त्वयाप्रोक्तंममस्तोत्रंयेपठिष्यंतिमानवाः॥एककालंद्विकालंवा
पीडांमुंचामितस्यवै॥मृत्युस्थानस्थितोवापिजन्मस्थानगतोपिहि॥यःपुनःश्रद्धयायुक्तःशुचि
स्नानसमाहितः॥शमीपत्रैःसमभ्यर्च्यप्रतिमांलोहजांमम॥मद्दिनेतुविशेषेणस्तोत्रेणानेनपू

जयते॥ पूजयित्वा जपेत्स्तोत्रं भक्त्या चैव कृतांजलिः॥ तस्य पीडां न चैवाहं करिष्यामि कदाच
न॥ गोचरे जन्मराशौ च दशास्वंतर्दशासु च॥ रक्षामि सततं चापि पीडां स्योन्यग्रहस्य च॥
वरं प्राप्य ततो राजा शनिनोपि महीपतिः॥ उवाच प्रणिपत्याशु सूर्यपुत्रं शनीश्वरं॥ ॥
दशरथ उवाच॥ ॥विधानं किं ग्रहाधीश प्रसन्नीकरणे तव॥ रोहिणीशकटो भेदे शनै
श्चर वदस्व तत्॥ ॥शनिरुवाच॥ ॥पूजने मम यद्द्रव्यं जाप्यं वा श्रवणं नृप। स्वगृहे लोके
न विधिना कर्त्तव्यं मम तुष्टये॥ प्रतिमां लोहजां राजन् कृत्वा मम चतुर्भुजां॥ वरदानं ध
नुःशूलबाणांतिकरान्वितं॥ तैले वा तिलराशौ वा प्रतिष्टाप्य यथाविधि। पूजयेच्चैव मम
नैः कुंकुमादिविलेपनैः॥ तैलाक्तैः कृष्णगंधैः तुलसीतिलमालैः। दद्यान्मे प्रीतये राज २५३
कृष्णां धेनुं पयस्विनीं। तिलास्तैलं च माषाश्च लोहं कृष्णे च वाससी॥ एतद्विशेषपूजायां मा दि

ने कुरुते नृप॥ मम प्रीतिकरं स्तोत्रं पठेद्भक्त्या कृतांजलिः॥ मन्नामान्युपदिष्टानि जपेच्च नि
यतः शुचिः॥ तत्कुले मम पीडा नो न भविष्यति कदाचन॥ नंदते सुखसंतानरागद्वेषविव
र्जितं॥ कोणस्थः पिंगलो बभ्रुः कृष्णो रौद्रोंतको यमः॥ सौरिः शनैश्चरो मंदः पिप्पलाथे दे
न संस्कृतः॥ एतानि शनिनामानि प्रातरुत्थाय यः पठेत्॥ शनैश्चरकृता पीडा न क
दाचिद्भविष्यति॥ मतांतरं॥ अयुतं ब्राह्मणेनाशु न्यपेष्टं तो जयेत्सुधीः॥ तांबूलैर्विवि
धैर्वस्त्रैर्दक्षिणाभिश्च तोषयेत्॥ यथा च समहर्षिमते॥ यदा कदाचित्समये जगतां वि
प्लवाय च॥ शाकटो भिद्यते ब्राह्म्यं भेदेन यमरूपिणा। तस्मिन्नेन नत्तन्नियुक्तं शाकटं वापि
यश्च तं॥ चक्रलोहमये तत्र सर्वोपस्कर संयुते॥ श्रोत्रियाय सुशीलाय ब्राह्मणाय स
मर्पयेत्॥ नाममंत्रेण मंदस्य दक्षिणा सहितं नृपः॥ इति शनैश्चर पूजाविधिः॥ पुनःस्तोत्रं।

कोणोंतकौरोद्रयमोपिबभ्रुःस्तुकृष्णःशनिः पिंगलएवमंदः॥ नित्यंस्मृतोयोहरतेचपी
डांतस्मैनमःश्रीरविनंदनाय॥ सुरासुराःकिंपुरुषागणेंद्राःगंधर्वविद्याधरपंनगाश्चापी
ड्यंतिसर्वेविषमास्थितेनतस्मैनमःश्रीरविनंदनाय॥ नरानरेंद्राःपशवोमृगेंद्राःवन्याश्चये
कीटपतंगभृंगाः॥ पीड्यंतियेजन्मर्क्षगतेनयेनतस्मैनमः॥ देशाश्चदुर्गाणिवनानियत्र
ग्रामाणिदेशाःपुरपत्तनानि॥ पीड्यंतियस्मिन्विषमस्थितेनत०॥ तिलैस्तिलैर्माषयवादिदानै
र्लोहेनक्षैर्नीलांबरदानतोवा॥ प्रीणातिमंत्रैर्निजवासरेषुत०॥ अन्यप्रदेशास्वगृहंप्रविष्टो
यदीयवारेसनरःसुखीस्यात्॥ गतोह्यतोयोनपुनःप्रयातित०॥ स्रष्टास्वयंभूर्भुवनत्र
यस्यत्राणेहरिःसंहरणेमहेशः॥ एकस्त्रिधाऋग्यजुःसाममूर्तिस्त०॥ प्रयागकूलेयमुनातटे २५४
चसरस्वतीपुण्यजलेगुहायां॥ योयोगिनिर्ध्येयतमोतिसूक्ष्मस्त०॥ शान्यष्टकंयःपठतिप्रभाते

नित्यंसपुत्रैःपशुबांधवैश्चकरोतिराज्यंभुविभोगसौख्यंप्राप्नोतिनिर्वाणपदंतदंते॥ ए
वंकृतेविधानेस्मिन्शाकटोभेदनान्निधौ॥ नश्यंतिजगतःपीडानात्रकार्याविचारणा॥
॥इतिश्रीविधानमालायांस्कंदपुराणेकंरोहिणीशाकटभेदानुगणावितिविशिष्टा
स्कंदपुरःसरंद्वितीयंशनैश्चरपूजाविधानं॥ ॥अथराहुपूजाविधानं॥ ॥प्रथमस्थोद्वि
तीयस्थश्चतुर्थःपंचमस्तथा॥ सप्तमश्चाष्टमोकस्थोदशमोद्वादशस्ततः॥ करोतिमरणंपुंसां
देशत्यागंधनक्षयं॥ विकारान्नाशनस्यापियुद्धेचैवपराजयं॥ विवादेवचनाश्चानिदोहकंस
लहादपि॥ निर्विघ्नार्थंतुसंपूज्योग्रहोक्तविधिनानतः॥ पूजितेतमसिप्रीतेसर्वान्कामानवाप्नु
यात्॥ ॥अथपूजाविधानं॥ ॥कालांजनस्यपट्टेचयपालोहमयेतथा॥ चतुरस्रेचतुर्भुजा
दिन्नूतनंवस्त्रसंयुते॥ अक्षतैःपूजितेसम्यक्तत्रतंस्थापयेद्बुधः॥ आरुह्यविधिमार्गेण

नाममंत्रेण तं ग्रहं॥ तत्र आवाहनमंत्रः॥ रक्तवर्णसमुद्भूतः कृष्णवर्णसमुद्भवस्तुरुः
धनुःपात्राधरः श्रीमान्नक्षमालाकमंडलुं॥ चतुर्दश्यां समुद्भूतं कृष्णपक्षे विशेषतः॥
यमरूपं महाघोरं देवदैत्यनिबर्हणं॥ पैठीनसकुले जातं देशे बर्बरसंज्ञके। नैरृती
कतारकायां च सैंहिकेय नमोस्तु ते॥ आगच्छ वरदः श्रेष्ठः पीठेस्मिन्सन्निधिं कुरु॥ आ
वाह्य विधिवद्राहुं॥ पूजयेत्प्रयतः शुचिः॥ ततस्तु हवनं कुर्याद्दूर्वाज्ययुतेन चा मधा
न्नं पायसं तत्र याज्यं चैव विशेषतः॥ सहस्रं संमितो होमः पायसेन प्रकल्पयेत्॥ ततः स्वि
ष्टकृते जाते होमं च विधिवन्नरः॥ प्रतिपूजां ततः कुर्याद्राहोः प्रीत्यै विशेषवित्॥ आय
संदक्षिणां दद्यादाचार्याय कटं बिनी॥ वस्त्रयुग्मं च सूक्ष्मं च कंडलेफटकानि च। ब्राह्मणा २५५
न्भोजयेत्पश्चात्कुक्के धनुव्रजेत्ततः॥ एवं यः कुरुते पूजां राहुयोगे विरस्य च॥ दुष्टस्थान

स्थितस्यापि ग्रहपीडा विनश्यति॥ सर्वान्कामानवाप्नोति नात्र कार्या विचारणा॥ ॥इति
श्रीविधानमालायां शांतिपटलोक्तवर्त्तमानस्य राहोः पूजाविधानं॥ ॥अथ केतु
पूजाविधानं॥ ॥यथा राहुस्तथा केतुर्ज्योतिःशास्त्रे निगद्यते। तस्य शांतिकरं सम्यग्वि
धानं मुनिभिः स्मृतं॥ कृत्वा कांस्यमयं केतुं चतुर्बाहुं महीतनुं। धूम्रवर्णं दीर्घदंष्ट्रं पिंग
गश्मश्रुलोचनं॥ एके वदंति केतूनां रूपं बाहुल्यमंजसा॥ एकएव तु चान्ये तु सहस्रं तु परं
विदुः॥ महामायामहारौद्रं महाभयकरं नृणां॥ केतवस्त्रिषु लोकेषु तस्मात्पूज्याः सदा नृणां॥
नामगोत्रे समुच्चार्य मंत्रैरावाहयेद्बुधः॥ निवेश्य चित्रपट्टे तु तंडुलैः परिपूजयेत्॥ वस्त्रयुग्म
समायुक्तं चंदनेन सुचर्चितं। पंचामृतेस्तु संस्नाप्य समारूढ्यानिवेशयेत्॥ तत्रावाहनमंत्रः॥
अहो केतो महाबाहो विस्तारवाहनस्तु सं नव॥ अमावास्यां तिथौ जातः रूक्षवर्णसमुद्भवः। आ

दित्यचंद्रमारूपपरकालनमोस्तुते॥ धूम्रवृष्ठवरदानंदनंदनोरुवसुव्रत। यस्मिन्देहेनु कुरुसां
निध्यं कामान्येपूरयप्रभो॥ ॥इत्यावाहनं॥ ॥केतुं कृण्वन्निति मंत्रेण पूजाहोमं विधिःस्मृतः
चित्रांनह्वनं चात्र कुशाग्रस्मिन्धस्तथा॥ अयुतंहवनं संख्याप्रवलं वृत मंत्रवे। ततस्त्वि
ष्टस्तते कार्यप्रतिपूजा मनीषिभिः। छागस्य दक्षिणा चात्र केतूनां प्रीतये तथा॥ संपाद्यवि
धिवद्भक्त्या ह्याचार्याय मनीषिणे। मूर्तिंछागंचवस्त्रेण नमस्कुर्यात्प्रयत्नतः। ब्राह्मणान्भो
जयेत्पश्चाद्दद्यात्तेभ्योयदक्षिणां॥ एवमष्टादिखेटानां पूजनं परिकीर्तितं। यस्ययस्य चरेद्व
टस्य होमवक्रेः पृथक्पृथक्॥ नामानि कथितान्येवयज्ञकर्मविशारदैः॥ आदित्ये कपि
लो नाम पिंगलः सोम उच्यते॥ धूमकेतुस्तथा भौमे ज्वराख्ये बुधस्य च॥ गुरुश्चैव शिखीना २५६
म शुक्रे कन्वतिहाटकः॥ शनैश्चरे महातेजा राहौ केतौकृतान्तकः॥ अविदित्वा हिनामानि हो

मं कुर्याद्विचक्षणः॥ तत्कृतं न च संस्कारं न च यज्ञफलं लभेत्॥ एवं विधानमुद्दिष्टं केतूनां पू
जनं मतं॥ सर्वकामप्रदं नृणां नारीणां च विशेषतः॥ ॥इति श्री विधानमालायां शांतिपट
लोक्तं केतुपूजाविधानं॥ ॥अथ तुलापुरुषविधानं॥ ॥मत्स्यपुराणे॥ सूत उवाच॥ अथा
तः संप्रवक्ष्यामि महादानानुकीर्तनं॥ दानधर्मेपियन्नोक्तं विष्णुनाप्रभविष्णुना॥ सर्वपाप
क्षयकरं नृणां दुःस्वप्ननाशनं॥ यत्तु षोडशधा प्रोक्तं वासुदेवेन भूतले॥ पुण्यं पवित्रमायुष्यं
सर्वपापहरं शुभं॥ पूजितं देवतानिश्च ब्रह्मविष्णुहरादिभिः॥ आद्यंतु सर्वदानानां तुलापुरु
षसंज्ञकं॥ हिरण्यगर्भदानं च ब्रह्मांडं तदनंतरं॥ कल्पपादपदानं च गोसहस्रं च पंचमं॥ हिरण्य
कामधेनुश्च हिरण्याश्वस्तथैव च॥ हिरण्याश्वरथस्तद्वद्धेमहस्तिरथस्तथा॥ पंचलांगलकं तद्व
द्धरादानं तथैव च॥ द्वादशं विश्वचक्रं च ततः कल्पलतात्मकं॥ सप्तसागरदानं च रत्नधेनुस्त

यैवच। महादानतद्भवत्तत्कृत्योऽन्त्राः परिकीर्त्तितः॥ सर्वाण्येतानि कृतवान् पुरा शंबरसूदनः॥
मनुरुवाच॥ ॥महादानानि यान्येव पवित्राणि शुभानि च। रहस्यानि प्रदेयानि तानि मे कथ
याच्युत॥ ॥मत्स्य उवाच॥ ॥नोक्तानि यानि गुह्यानि महादानानि षोडश। तानि ते सं
प्रवक्ष्यामि यथावदनुपूर्वशः॥ तुलापुरुषयोगेयं एषामाद्यो विधीयते॥ अयने विषुवे पुण्ये
व्यतीपाते दिनक्षये॥ युगादिषूपरागे च तथा मन्वंतरादिषु॥ संक्रांतौ वैधृतिदिने चतुर्दश्य
ष्टमीषु च॥ सितपंचदशीपर्वद्वादशी॥ अष्टकासु च॥ यज्ञोत्सवविवाहेषु दुःस्वप्नाद्भुतदर्शने॥
द्रव्यब्राह्मणलाभे च श्रद्धा वा यत्र जायते। तीर्थे वायतने गोष्ठे कूपारामसरित्सु च॥ गृहे
वाथ वने वापि त — नुवरेपि वा॥ पुण्यां तिथिं समासाद्य कृत्वा ब्राह्मणवाचनं॥ वक्ष्यमाणे २५७
मंत्रपूजादिकारयेदित्यन्वयः॥ त्रिपितिकपलक्षणं॥ पूर्वाह्णेषु एवमुक्तकर्त्तादौ चेति वेदित

व्यं। ब्राह्मणैः पुण्याहादिशस्वस्तिवाचनं॥ तद्विधानं॥ तुलापुरुषपरिभाषायां प्रागभिहितं॥
इत्थं चायं प्रयोगक्रमः॥ उक्तकालान्यतमप्रीतिपादनात्पूर्वेद्युः प्रातः सुस्नातः स्वोक्तं
ह्यमुकदानं प्रतिपादयिष्ये॥ यजमानः संकल्प प्रत्यूहविघाताय श्रीविघ्नविनायका
न् संपूज्य ब्राह्मणानुज्ञातः सर्वसमारंभेत्॥ अथ वृद्धिश्राद्धं कृत्वा नंतरं ऋत्विग्वरणं
विधाय तांश्च मधुपर्कदानेन संपूज्य कुंड मंडपलक्षणानि परिभाषायां विशेषस्तु
वक्ष्यते॥ षोडशारत्निमात्रं च दशद्वादश वा करान्॥ मंडपं कारयेद्विद्वान् चतुर्भद्रासनं
बुधः॥ यजमानस्यैकविंशत्यंगुलः करः॥ एतमा मानत्रयमुत्तममध्यमाधमभेदेन विज्ञेयं। च
तुर्भद्रासनमिति। चत्वारि भद्रयुक्तान्यासनानि यस्य तथा॥ यदा हृदानसभामधिकृत्य वि
श्वकर्मणा कारितं चत्वारि निर्गतिः॥ या विभूषिता सुंदर मूर्त्ति रूपा रत्नै रुवा। साकपितासने

यं॥ इत्यालिंगं करणीयमस्याः इति मत्स्यपुराणे॥ सप्तहस्तान्तवेदी मध्ये पंचकरा प्रपा।
तन्मध्ये तोरणं कुर्यात्क्षीरदारुमयं बुधैः॥ उत्तमं मंडपं सप्तकरावधिः॥ वेद्यन्तरयो
स्तु पंचकरोति व्यवस्थितो विकल्पः॥ मात्रेष्टकामयी चतुरंगुलोच्छ्रिता कार्या तन्मध्ये तु
तापुरुषार्पितोरणं कृत्वा तोरणं सारदारूणि शाकेंगुदीत्यादि वक्ष्यमाणानि कुर्यात् कु
र्यात्कुंडानि चत्वारि चतुर्दिक्षु विचक्षणः॥ समेखलायोनियुतानि तत्र सपूर्णकुंभा
नि सहासनानि स्रुक्ताम्रपात्रद्वयसंयुतानि यज्ञपात्राणि सावित्राणि हस्तप्रमाणा
नि तिलाज्यधूपपुष्पोपहाराणि सुवर्णोत्तमानि चतुर्दिक्षु वेद्यां शतिरोपः॥ सपादहस्तसंमितं
वेद्योरंतरं विधेयं॥ पूर्णकुंभो जलपूर्णकलशः॥ ताम्रपात्रद्वयाधाररूपं यज्ञपात्राणि स्रु २५८
क्स्रुवादीनि विष्टरो द्विज्ञाय पंचविंशतिदर्भपवित्रदर्भनिर्मितः॥ धूपो गुग्गुलुप्रभृति

उपहारः फलान्नतांबूलादि॥ पूर्वेण त्रिहस्तमिता च वेदी ग्रहादिदेवेश्वरपूजनाय॥ अत्र
च्युतब्रह्माणि वाच्यकतानां वक्रैव कार्या॥ फलमात्स्ये वस्त्रपूर्वेण तत्र भागे आयामतो विस्तारतो
हस्तमिता वितस्तिमात्रोच्छ्राया वेदी कार्या॥ तन्मध्ये सूर्यं॥ आग्नेय्ये सोमं॥ दक्षिणे भौमं॥
ईशे बुधं॥ उत्तरे गुरुं॥ पूर्वे भार्गवं॥ पश्चिमे शनैश्चरं॥ नैर्ऋत्ये राहुं॥ वायव्ये केतुं प्रतिष्ठा
पयेत्॥ ईश्वर गौरी स्कंद विष्णु ब्रह्म इन्द्र यम काल चित्रगुप्ताः॥ इत्यधिदेवताः॥ अग्नि उ
जलं मिविष्णु इन्द्र इन्द्राणी प्रजापति सर्प ब्रह्माणमिति प्रत्यधिदेवताः॥ एते च स्वस्वग्रह
संनिधौ स्थाप्याः॥ तथा विनायकौ दुर्गावायुराकाशमश्विनौ च तिस्रान्यैश्वर सूर्ययोरु
त्तर नागराजकेलोत्र दक्षिणे दुर्गा प्रत्तीनां स्थानं॥ तथा लोकपालानां स्थापनं॥ तेषामु
त्तरदेवतात्वेनाभिधानात्॥ तदुक्तं स्मृत्यंतरे॥ इंद्रं पूर्वेण संस्थाप्य यमं दक्षिणतस्तथा॥ वरु

णं पश्चिमे भागे कुबेरं चोत्तरे तथा ॥ अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत् ॥ इं-
द्रः पीतो यमः श्यामो वरुणः स्फटिकप्रभः ॥ कुबेरस्तु सुवर्णस्तु वह्निश्च ——— तथैव
निरृतिः ॥ श्यामो वायुर्धूम्रः प्रकाशयते ईशानः स्फटिकवेदकः एवं ध्यायेत्क्रमादिमान् ॥ इन्द्र-
स्य दक्षिणे पार्श्वे वस्त्र आवाहयेद्बुधः ॥ ध्रुवो धरस्तथा सोम आपश्चैवानिलोऽनलः ॥ प्र-
त्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ॥ अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः ॥
देवेशेशानयोर्मध्ये आदित्यानां तथार्चनं ॥ धातार्यमा च मित्रश्च वरुणोंऽशुर्भगस्तथा ॥ इन्द्रो
विवस्वान्पूषा च पर्जन्यो दशमः स्मृतः ॥ ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ॥ इत्येते द्वा-
दशादित्या नामभिः परिकीर्तिताः ॥ वीरभद्रश्च शंभुश्च गिरीशश्च महायशाः ॥ अजैक- २५९
पादहिर्बुध्न्यः पिनाकी चापराजितः ॥ भुवनाधीश्वरश्चैव कपाली च विशांपते ॥ स्थाणुर्भ-

गश्च भगवान्रुद्रा एकादश स्मृताः ॥ प्रेतेशवारुणसोमध्ये मातृस्थानं प्रकल्पयेत् ॥ मातृ-
नामानि परिभाषायां दर्शितानि ॥ निरृतेरुत्तरे भागे ईशानायतनं विदुः ॥ कुबेरमरुतो-
र्मध्ये मरुतां स्थानमुच्यते ॥ मरुतो नाम देवानां गणा वै सप्तसप्तकाः ॥ आवहः प्रवहश्चै-
व उद्वहः संवहस्तथा ॥ विवहः परावहश्चैव तथा परिवहोऽनिल इति ॥ एते सूर्यादयो ग्रहा
यथोक्तविधिना पूजनीयाः ॥ अनुक्तमंत्रकाणां प्रणवादिभिः स्वचतुर्थ्यन्तैर्नामभिः स्थापनादि वि-
धेयं ॥ अथ ब्रह्मशिवाच्युतार्चनं कर्तव्यं तन्त्रोक्तैर्मन्त्रैर्वा ॥ ततः सर्वदेवार्चनेऽन्ते दुर्गापूजनं
कर्तव्यं ॥ तत्र मंत्रः ॥ त्वं दुर्गे सत्यरूपासि पुरा देवैर्विनिर्मिता ॥ पूजितासि मया देवि पापं हर मम
नित्यं ॥ अनेन मंत्रेण षोडशोपचारैः स्वशक्त्योपचारैर्वा ॥ ततश्च स्वस्तिके तं दुर्गामये हेममयं दुर्गापुरु-
षध्यानयुक्तं दुर्गायाः पूर्वतोऽस्त्रचतुष्टये पूजयित्वा पौराणैरेव मंत्रैः ॥ दुर्गापुरुषदेवेश व

त्रिवंशसमुद्भव। त्वं तु तुलारोहणान्मेद्य पापं नश्यतु जन्मनः॥ इत्यनेन मंत्रेण तुलापुरुषं सं
पूज्य यथोपनीतं स्वर्णादि तुलादानं तस्य प्रार्थनं कृत्वा तस्य वै तुलायाः पात्रे विन्यस्य वस्त्रालं
कारनिजशस्त्रधारी भाजने समारोहितः॥ तूर्याणां च निनादेन वेदघोषसमन्वितः॥
तत्र स्वर्णतुलापुरुषदानमंत्रः॥ बृहस्पतिः॥ गृहेशादिकेतनं मुख्यं न वेदितानुसारतः॥ तस्मा
त्स्वर्णप्रदानानां हिरण्यमधिकं स्मृतं॥ यथा संतानकादीनां इष्टान्संपाद्यते क्रिया॥ न तथा गृ
हदानेन हिरण्यमधिकं ततः॥ नंदिपुराणे॥ कृष्णतिलैः पंचतिलमाषो माषैः षोडशाभिः स्मृतं।
सुवर्णमेकं तद्दाना दाता स्वर्गमवाप्नुयात्॥ तस्मात्सर्वात्मना चांते दद्यात्कनकदक्षि
णां॥ ॥इति तुलापुरुषविधानं॥ ॥अथ दिव्यमातृकाविधानं॥ ॥दिव्यं राजा स्वयं पश्ये २६
द्विषद्भिर्ब्राह्मणैः सह॥ धर्मशास्त्रानुरोधेन क्रोधलोभविवर्जितः॥ अथ पश्यता कार्यविशा

षव्यवहारान्नृपेण तु। सत्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित्॥ इति मतमादाय प्रा
ग्व्यवहारं च पश्यति॥ तत्रापि समर्प्य। तत्र विधानक्रमः॥ वैकल्पं चेद्भवेद्वचतुर्दिव्यं स्व
------ स्वराधैर्व्याधिनिर्घोरैः काले संकुचिते सति। सर्वेषां मतमादाय कर्त्तव्यः
प्रतिहस्तकः॥ हस्तेषु प्रग्र कर्तव्या सायं काले न गोर्हिने। एकनक्तविधानेन स्नात
व्यं तेन तन्निशि॥ प्रतिवादिजनः कश्चित्स्वकीयो वा जनस्तथा। न गंतव्योऽस्थितो यत्र र
क्षितो राजसेवकैः॥ तूष्णीं शय्या विधातव्या रंभापात्रे स्वपेद्वृतौ। न पुष्पं धारयेन्मूर्द्ध्नि तांबू
लं नैव भक्षयेत्॥ राजविप्रसमाने। तदर्पितं सज्जलं पिबेत्॥ इत्यनेन प्रकारेण नीत्वा रात्रिं
समाहितः॥ प्रातःकाले समुत्थाय दंतधावनपूर्वकं॥ प्रातःस्नानादिकं सर्वं विदध्याद्विधिपू
र्वकं॥ ततो धूपवसे धीमान्स्मरन्नारायणं शुचिव्रतं॥ सोपदीवानलं धर्मं रामं सत्यपरायणं।

कुजरे वा निर्जातदृत्कामधेनुं सरस्वतीं॥ मध्याह्नसमये सूर्यं कुर्यात्स्नानादिकर्म्म तु॥
सायं विधिं तु सायाह्ने रात्रायां तदनंतरं॥ प्रातःकाले समुत्थाय कुर्यात्स्नानविधिं द्विजः॥
ततो विद्वान्प्रयाणं दिवा वक्तुं तत्स्नानविधिः शुचिः॥ शिवद्वारे महापुण्ये गृहे वा च चतुष्पथे॥
संमार्जिते तु चोद्देशे कुर्याद्धोमं च तत्र यं॥ तुलादिभिर्वदिव्यानां विधिरेष सनातनः॥ नृणां
समाजमारुह्य नीलवस्त्रविवर्जितं॥ एवं कृते समाजे तु यः प्रोक्तो न महर्षिभिः॥ याज्ञवल्क्यः॥
कृताध्ययनसंपन्नाः धर्मज्ञाः सत्यवादिनः॥ राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः॥ न
सा सभा यत्र न संति वृद्धा वृद्धा न ते ये न वदंति धर्मं॥ धर्मः स नो यत्र न सत्यमस्ति सत्यं न तद्यच्छ
लवाक्यविद्धं॥ नियुक्तो वा नियुक्तो वा शास्त्रं वक्तुं समर्ह इति॥ देवो वाचं स वदति यः शास्त्र २६।
मुपजीवति॥ ग्रामे दृष्टः पुरे याति पुरे दृष्टस्तु राजनि॥ राज्ञा दृष्टः कुदृष्टो वा नास्ति पौनर्भवो

विधिः॥ तस्मात्सर्वशास्त्रविदो विद्वांसो राज्ञः सकाशे सभ्याः॥ स यदि तैः सह विचार्य तत्परोध
र्मनिर्णयं करोति॥ तदा नृपते र्वचनं नास्ति॥ एवं राजपुरःसरे समाजे मिलिते आदित्यस्य
रोहो रायां वारा त्यष्ठस्य षष्ठस्य त्यपनेन शुक्रस्य वा दिव्यं कारयेत्॥ ततस्वच्छादौ प्राग्दिवाके
धर्मावाहनपूर्वकं दिव्यदेवतापूजनं कुर्यात्॥ तत्र पूजनमंत्रः॥ देवस्यांगणे दृषत्तेशासन
योर्मध्ये चतुरस्त्रं हस्तमात्रं सर्वतो न्यस्य तं तत्तंडुलैर्मंडलं कृत्वा धर्मवाहनं तत्र कुर्यात्॥ वक्ष्य
माणमंत्रितैश्च मंत्रैः॥ एह्येहि धर्म भगवन्नस्मिन्दिव्ये समाविश॥ सहितो लोकपालैश्च वस्वादित्य
मरुद्गणैः॥ घटादियोग्यानि च दिव्यानि दिव्यानि॥ तत्र दिव्यानि समादाय येत्॥ एह्येहि धर्मभग
वन्निति सर्वदिव्येषु धर्ममारुह्य पूजयेत्॥ इंद्रं पूर्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा॥ वरुणं पश्चिमे
भागे कुबेरं चोत्तरे तथा॥ अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत्॥ तद्विभागे वैदिकैर्मंत्रैः पो

राणे वा विधि धात्मकैः॥ स्थाप्या वा पूजनीया वा दिव्यदेवा मनीषिभिः॥ तत्र ध्यानं॥ पीत इंद्रो
यमः श्यामो वरुणः स्फटिकप्रभः॥ कुबेरस्तु सुवर्णाभो वह्निस्तु कनकप्रभः॥ तथैव निर्ऋतिः
श्यामो वायुर्धूम्रप्रभः स्मृतः। ईशानस्तु नवेन्दुक एवं ध्यायेत्क्रमादिमान्॥ इंद्रस्य दक्षिणे भागे
वसूनावाहयेद्बुधः॥ ध्रुवो धरस्तथा सोमश्चापश्चैवानलोऽनिलः॥ प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ
प्रकीर्तिताः॥ देवेशेशानयोर्मध्ये आदित्यानां तथायनं॥ धातार्यमा च मित्रश्च वरुणोंऽशो भग
स्तथा॥ इंद्रो विवस्वान्पूषा च पर्जन्यो दशमस्तथा॥ ततस्त्वष्टा ततो विष्णुरादित्या द्वादशैव ते॥ अ
ग्नेर्दक्षिणभागे तु रुद्राणामयनं विदुः॥ वीरभद्रश्च शंभुश्च गिरीशश्च महायशाः॥ अजैक
पादहिर्बुध्न्यः पिनाकी च विशांपतिः॥ स्थाणुर्भर्गश्च भगवान्रुद्रा एकादश स्मृताः॥ प्रेते २६२
शरक्षसां मध्ये मातृस्थानं प्रकल्पयेत्। ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥ वाराही

चैव माहेंद्री चामुंडा गणसंयुता॥ निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः॥ वरुणस्योत्तरे भागे मरु
तां स्थानमुच्यते। गगनः स्पर्शनो वायुरनिलो मारुतस्तथा॥ प्राणः प्राणेश जीवौ च मरुतोऽष्टौ प्र
कीर्तिताः॥ दिव्यस्योत्तरभागे तु दुर्गामावाहयेद्बुधः॥ इत्येषां दिव्यदेवानां स्वनाम्ना पूजनं स्मृतं।
पराशरमतेन। प्राड्विवाकस्ततो विप्रो वेदवेदांतपारगः॥ शीलवांस्तोयसंपन्नः शांतचित्तो विम
त्सरः॥ सत्यसंधः शुचिर्दक्षः सर्वप्राणिहिते रतः॥ उपोषितः शुक्लवासाः कृतदंतानुधावनः॥ स
र्वासां देवतानां च कुर्यात्पूजां यथाविधि॥ धर्माय सी धनं चूर्षां दत्वा चार्घ्यादिकं क्रमात्॥ अर्घ्य
दिंश्चादंगानां तूषां तमस्तु कल्पयेत्॥ गंधादिकान्निवेद्यांतान्परिचर्य प्रकल्पयेत्॥ रक्तैर्गंधैश्च
माल्यैश्च दधिपूजाकृतादिभिः॥ प्रचये दिव्यपीठे तु ततो निष्टांश्च पूजयेत्॥ इंद्रादीनां विशेषान्
न्निधनानां॥ रक्तैरन्यैर्वा पूजनमिति पूजाक्रमः इति नारदेनोक्तं। चतुर्दिक्षु तथा शेमः कन्न

र्वेदवेदपारगैः॥ चतुर्दिक्षु विदिक्ष्वाग्नेयनैरृत्यवायव्येशान्येषु। नत्र पूर्वदक्षिणादिषु। आज्येन रु
विषाचैव समिद्भिर्होमसाधनैः। सावित्र्याप्रणवेनाथ स्वाहांतेनैव होमयेत्॥ यदर्थमभियुक्तः
स्यात्तद्भिर्लिखित्वाथपत्रके। मंत्रेणानेन सहितं तत्कार्यं शिरोगतं॥ मंत्रश्चायं॥ आदित्यचंद्रा
वनिलेत्यादि॥ अथ धर्मचीरिका॥ एह्येहि भगवन्नस्मिन्दिव्ये समाविश॥ सहितो लोकपालै
श्च वस्वादित्यमरुद्गणैः॥ अवाराववतरं त्र सत्यानृतसाक्षिणः॥ पंचैव ते लोकपाला दिक्पालाश्च
आगच्छंत्वमराः सर्वे लोकपालाश्च दक्षिणे। सत्यानृतस्य संदेहे स्फुटवाचं भवंतु ते। आदित्य
चंद्रावनिलोनलश्च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जाना
ति नरस्य वृत्तं॥ धर्मो जयति नाधर्मः सत्यं जयति नानृतं॥ क्षमा जयति न क्रोधो विष्णुर्जयति २६३
नासुराः॥ धर्मो विधुर्मनुष्याणां धर्मो मिंजनमुत्तमं॥ अविनाशी धनं धर्मो धर्मः सर्वत्र रक्षकः। स

त्येन धार्यते पृथ्वी सत्येन तपते रविः। सत्येन वायवो वांति सर्वं सत्ये प्रतिष्ठितं॥ यः सत्यं त्रिषु
लोकेषु इंद्रवैश्रवणे यमे। ब्रह्मवादिषु यः सत्यं तत्सत्यमिह दृश्यतां॥ एकत्र क्रतवः सर्वे सत्यं
च तत्तथा धृतं॥ क्रतुपुण्याधिकं चैव सत्यमेवावशिष्यते॥ एकपादे स्थिते धर्मे सत्ये च प्रलयं
गते॥ विपरीतगते काले यतो धर्मस्ततो जयः॥ अनृतं कर्त्तुमिच्छंति ये देवाः सुरजंतवः। ते
सर्वे धं समायांति स विज्ञः किरणोत्तमः॥ ॥इति धर्मचीरिका॥ ॥एतच्च धर्मावाहनादि त्रि
रसिपात्रारोपणांतं सर्वदिव्यसाधारणं॥ इमं धर्मविधिं कृत्स्नं सर्वमंत्रेषु योजयेत्॥ आवाह
नं च देवानां यथावत्परिकल्पयेत्॥ तं च जले सर्वधर्मा सिध्यंति॥ ततश्च तत्र माषतप्तलोहपिंड
तसमाषऊजलादीनां दिव्यानामन्तिमं चरणं कारयित्वा राजप्रमुख सर्वजनसहितो दिव्यं
प्राड्विवाकः पश्येत्। तत्र सत्यासत्यं सहसा यद्भवति तद्विचारणीयं॥ अग्निर्दिव्यं तप्तकांचनप

न्नगं विषमेव च। तस्मात् षडंगं दिव्यं नार्द्रवासाः समाचरेत्॥ अतोन्यत्र दिव्येषु शुक्लशुद्धवासा
दिव्यं समाचरेत्॥ ॥इति श्रीविधानमालायां पितामहस्मृत्युक्तं सर्वदिव्येषु धर्मावाग्न
धर्मचारिकाविधानं॥ ॥अथ स्थालीपाकादिहोमकुंडलक्षणं॥ तथा च यज्ञकांडे॥ स्थाली
पाकेन्नवे कुंडमिषुमात्रावरं वरं॥ चतुरस्रं तु तं विद्यात् प्रत्यग्दक्षिणयोनिकं॥ विवाहहो
मे तद्वद्गर्भाधानादिकर्मसु॥ सर्वदाने षिरस्त्रेषं व्रतेषु विविधेषु च॥ सहस्रहवने चापि स्थंडि
लं वापि कारयेत्॥ चुल्ली कुंडं समुद्दिष्टं नित्योपासनकर्मणि॥ वैश्वदेवे तथा चुल्ली कुंडमेवं वा
तयोर्द्वयोः॥ नवान्नहवने चुल्ली कुंडं चैव प्रकल्पयेत्॥ उत्सर्जनेन वेदानामिषुमात्रावरं
स्मृतं॥ वृषोत्सर्गग्रहादिष्टशमने मूलशांतिके॥ गंडांतदोषशमने तथा त्रिषा विधानके॥ त २६४
तबंधु समनिर्दोषशांतौ तथा विधौ॥ नवस्कंसंग्रहे चैव वास्तुपूजाविधौ तथा॥ उद्यापने त

डागादेः कृत्रिमे जलसंश्रये॥ वृत्तोद्यापनकर्मात्र सर्वकर्मविचक्षणैः॥ प्रासादोद्यापने चै
व क्षेत्रारंभे तथैव च॥ इत्यादिकं मंडपं कुर्वीत बाणमात्राचरेद्बुधः॥ अथ विशेषकुंडानि॥ ॥
शताहुतिहोमे बद्धमुष्टिमात्रमितं कुंडं कुर्यात्॥ शतहोमे रत्निमात्रं स्यात्। सहस्रहोमे पूर्ण
हस्तमितं स्यात्॥ शतार्द्धहोमे खद्धमुष्टिमात्रं अरत्निमात्रं शतहोमकुंडे। हस्तं सहस्रे प्र
युते द्विहस्तं उर्यं चलक्षे घ्ययुतं चकोट्यां॥ अथ पंचलक्षणं॥ निर्यंग्य चोदराण्यष्टौ ऊर्ध्वा वा
जीर्व्यर स्त्रयः॥ मध्यमं पर्वमाचार्याएतद्अंगुललक्षणं॥ अयुतहोमे द्विहस्तं। एषु सर्वेषु
कुंडेषु यवैरष्टस्तिर्यद्अंगुलं तैस्त्रियद्भिरेवांगुलैः चतुर्विंशतिभिरेव हस्तः स्यात्। यवाधि
कमयुतहोमे हस्तद्वयमितं कारयेत्॥ केचिन्मते ध जायं कुर्यात्। अत्र खातमेखलायोनि
मानज्ञाने अत्र परिभाषायाम्। किं चि तु कुंडं चतुर्विंशतिधा विभज्य चतुर्विंशमंगुलं परिक

स्यस्तैश्चतुर्विंशतिभिः हस्तं परिकल्प्य तन्मानेन चतुरस्रं कुंडं खातं कुर्यात्॥ तेनैव हस्तेन मेख
लासहितं तन्मानेनैवाधस्तात्खनेत्। अथ मेखलालक्षणं॥ प्रथममेखलोच्छ्रायो नवांगुलः अ
धःखातं त्र्यंगुलानि पंचदश। अधःखातमेखलासहितं चतुर्विंशति त्र्यंगुलं कार्यं। अधःखा
तं गोपार्ध्यो मंगुलान्यां कर्तव्यं द्वितीया चतुस्त्रिंगुलैर्भवेत्॥ तृतीया त्रिभिर्भवति॥ मा
धिके तु फलमाह॥ हारीतः॥ विस्तारे रहिते कुंडे यजमानोल्पजीवितः। खाताधिके भवेद्रो
गो हीने तु धनसंक्षयः। कुंडवक्रे मानहीना जाठरो हीयते ध्रुवं। आधिक्ये तु भवेत्तापो य
जमानस्य निश्चितः॥ मरणं यजमानस्य जायते छिन्नमेखले। शोकस्तु मेखलोच्छ्रायेमाना
धिकतरे भवेत्॥ कंठाधिके भवेन्नाशं पशूनां यजने भवेत्॥ अन्ति युक्तं यदा कार्यं कुंडं न्यू २६५
नाधिकं भवेत्॥ तदाधिकस्तु कर्तव्यो होमो होमविचक्षणैः॥ तथा च॥ अन्नहीनस्तु यो हो

मो राज्यनाशाय कल्पते॥ तस्मादन्नं प्रदातव्यं सर्वकृतेषु यत्नतः॥ द्रव्यहीनश्च पुत्रांश्च सदा
रान्नाशये ध्रुवं॥ मंत्रहीनस्तु यो होमो ऋत्विक्नाशाय कल्पते॥ होमद्रव्यविहीनश्च यज्ञ
मानं विनाशयेत्॥ तस्मात्सर्वप्रयत्नेन होमः कार्यः सुलक्षणं॥ इदानीं ब्राह्मणलक्षण
मुच्यते॥ मूर्खा दुष्टाः प्रलुब्धाश्च परच्छिद्रेषिणोऽनृताः॥ क्रूरा दुष्टचरित्राश्च नित्यं वाद
रताश्च ये॥ शास्त्रहीना द्रव्यलुब्धाः पुराणार्थविवर्जिताः॥ तथा च॥ परच्छिद्राणि यो ब्रूते ब्र
ह्मणः कथ्यते बुधैः॥ ब्रह्मघ्नेषु च सर्वेषु प्रायश्चित्तं सदा मुने॥ कथितं मुनिशार्दूलैस्तत
स्यात्मर्मभेदिनः॥ तथा च ब्रह्मपुराणे॥ परच्छिद्रेषु यः पापो निमग्नो मोहतत्परः॥ वर्जनीयः
श्रुत्कार्ये होमे चैव विशेषतः॥ श्राद्धेषु यज्ञकार्येषु विवाहसमये तथा। परधर्मरतं नित्यं
वर्जयेच्च प्रयत्नतः॥ तस्मात्सर्वप्रयत्नेन सदोषान्वर्जयेत् द्विजान्॥ निर्दोषाः फलदा विप्राः

सर्वकर्मसुशोभनाः॥ अथ होममुद्राः॥ मयूरी कुक्कुटी हंसी सूकरी च मृगी तथा॥ पद्ममु
द्रा विज्ञानीयात्॥ होमद्रव्यग्रहे बुधैः॥ अंगुष्ठेन पाणिनाद्य तर्जनी रहितेन यत्॥ क्रिय
ते द्रव्यं विप्रैः मयूरी नाम विज्ञ बुधैः॥ अंगुष्ठयं त्रितः सर्वाश्चांगुल्योतानन्न हिताः॥ द्रव्यं
क्रियते तानि कुक्कुटी सा प्रकीर्तिता॥ विकिनिष्ठिकात्र हंसी स्यान्मुक्त्वा नाम च सूकरी॥
मध्यमानामिकांगुष्ठैर्मृगी चैवोपलक्षिता। फलमूलयजौ श्रेष्ठा स्तु मात्रे यान्तिरवंजिन॥
जारणे मारणे तद्वत् कुक्कुटी परिकीर्तिता॥ वश्योच्चाटनपूर्वाणां — — मर्कटी नेमता। शां
तिके पौष्टिके कार्ये मृगी हंसी तथोत्तमा॥ अथ पद्म्यहोम विशेषः॥ फलमूलयज्ञो श्रेष्ठा मु
द्रा सूकर पद्मवा। कुक्कुटी पत्रपुष्पाणां शालिहोमे तु सूकरी॥ यवानां वा तिलानां च हं २६६
सी प्रोक्ता मनीषिभिः॥ अथ स्रुवावधारणं॥ अथ घृतो विनाशाय घृतो मध्ये प्रजात्तयं। मृ

लधृतश्चरोतश्च मृत्तिंद्धास्रुवो ध्रुवं। — — — — — — — — अथान्नमध्याच्च मध्यतः॥
स्रुवः प्रधार्यो विद्वद्भिः सर्वकार्यार्थसिद्धये॥ अथाकृतिविन्नागलक्षणं॥ खंडत्रयं तु मू
लानां फलानां स्वप्रमाणतः॥ ग्रासार्द्धमात्रमन्नानां पंच सूक्ष्माणि होमयेत्॥ मनसास्य
फलस्यैव शतं नागाः प्रकीर्तिताः॥ तथैव च विन्नागाश्च कूष्मांडस्य प्रकीर्तिताः। नालिके
रस्य विद्वद्भिर्नागाः प्रोक्ताः स्रुक्प्रोडश। तमेवं तदेव नागाः स्युः कदस्य कन्तूत्तमे। खर्जूर
फल नागाश्च पंच प्रोक्ता मनीषिभिः॥ एवमेकैकमेव स्यात् तथा पुष्पं च हूयते। तिलाश्च
शीति संख्याकास्तथा षष्टिर्यवाः स्मृताः। व्रीहयश्च शतं ग्राह्या गोधूमाः षष्टि संमिताः। प्रियं
गवश्च विज्ञेया विज्ञालपद्ममात्रकाः। तथैव तंदुलाः प्रोक्ता होमलक्षणकोविदैः। फलानि
बदरादीनि पंच पंच च हावयेत्॥ आदिशब्देन बदरमात्राण्येव। इक्षवः पर्वमात्राश्च पध्म

वाः कोमलायतः॥ शर्कराचगुडश्चैव विडालपदमात्रतः। हवनीयः सघसङ्घिः प्रदत्तेय
ज्ञकर्मणि॥ बीजानि ——————— फलानि च तथैव च॥ यत्नात्तद्घृतसिद्धार्थं पंचलमात्रा
णि हावयेत्॥ चतुर्भुविजपूराणि दाडिमानि तथैव च॥ कंदास्त्वेकैकशो ज्ञेया आर्द्रमंकुर
ज्ञाः स्मृतः। कंदेष्वपि विशेषात्तु शूरणो दशधा नवेत्॥ जंबीरामलकाद्राक्षा तथान्तधात्रा
तकाः कणाः॥ अन्नाः पथ्यास्त्रमूर्वधाः प्रोक्तास्त्वेकैकशो यजेत्॥ आज्यं च घृतदग्धं च दधिदुग्धं
तथैव च॥ स्रुक्स्रुवक्रमितं ज्ञेयं तथा मांसं प्रकीर्तितं॥ अथ पर्वणेषु कुंड विशेषः॥ त्रिमेखले द्वि
जे कुंडं क्षत्रियस्य द्विमेखलं॥ मेखलैका तु वैश्यस्य शूद्रस्य न हि मेखला॥ वक्रकुंडेन संपातो
मरणं हीनमेखले। अपत्यनाशनं प्रोक्तं कुंडे कंठोष्ठवर्जिते॥ नार्या विनाशनं प्रोक्तं कुंडे यो २६७
नौ विवर्जिते। दिव्यायामासनं श्रेष्ठं समगर्तं तु कारयेत्। एवं लक्षणसंयुक्तं सत्कुंडं प्रोच्यते बु

धैः॥ कंठोष्ठौ च यथैव कार्यौ तिर्यक् षोडशानि स्तथा। प्रमाणं तु कुंडस्य अरत्न्या वानुमन्यते। त
त्रौष्ठकंठविशेषमाह॥ यदेत्तत्त्रिः श्रेष्ठः स्यात् हृतिर्लक्षणान्वितः॥ तथा षोडशांतिः कंठः
कर्तव्यः स्वचको विदैः। अष्टांगुलं त्यजेत्पश्चात्त्यजेन्मात्रां षडंगुलां॥ मध्ये त्वरत्निमात्रास्यं
नियुंज्यात्सर्वकर्मसु। दिग्वाते विभ्रमः कुंडे सूत्रहीने तु पंगुता॥ खातहीने विरोधः स्कबंधु
त्ःसहजायते॥ उष्ठहीने त्वपस्मारो पानीहीने नगंदरं॥ नाभिहीने स्थाननाशो मरणं छि
न्नमेखले॥ वक्रमानाधिकान्यूना मेखला व्याधिवर्द्धिनी॥ समसूत्रां च कुर्वीत समसूत्रेण
दिक्क्रमात्। विदिक्सु खेन नर्देनाशः तस्मादिक्साधनं शुभं। समसूदिक्प्रमाणेन द्वारतोरण
कर्तृतः॥ पालकावेदिकास्तंभकुंडादिनिरलंकृतः। मंडपश्चन दृःसम्पक् जायते निःफलो
न्यथा॥ ॥अथ देवयोनिलक्षणं॥ ॥कुंडस्य पूर्वभागे तु देवयोनिर्विधीयते। हस्तमात्रां तु रो सा

देवयोनिष्कुंडं योः॥ षष्ठः पंचांगुलः कार्योसिवविपयवसंयुतः। मध्येंगुष्ठप्रमाणस्तु गलः कार्य
स्ततद्वयोः॥ देवयोनिरिति ख्याता तत्र संस्थादिवौकसां॥ अन्यच्च॥ कुंडं च मंडपं चैव देवयोनि
स्तथैव च॥ वेदिकां मणिकारंत्नं विदध्याद्वृद्धिवासरे। विवाहे व्रतचौलेषु प्रतिष्ठादेयज्ञकर्मणि।
वृद्धानि कुर्वीत कुंडानि यावन्मासः समाप्यते॥ सद्धि कर्माणि मासांते धृतिं कृत्वा महामतिः।
कुंडं समंडपं देवयोनियुक्तं विसर्जयेत्॥ अन्यच्च॥ पाणिहोमे कथं कुंडं कियन्मात्रं विधी
यते॥ तन्ममाचक्ष्व विप्रेन्द्र पृच्छतः शुचिमानसः॥ ॥मैत्रेयोवाच॥ ॥दर्भैः कुंडं प्रकर्तव्यं
चतुरस्रं सुशोभनं॥ साग्रैरष्टभिरेवस्यात्सम्यग्ज्ञेनात्र संशयः॥ दर्भस्तु समिधस्तत्र शुक्ल २६८
यान्मौनमास्थितः॥ सोमाग्निर्देवते तत्र पितृमत्कव्यवाहने। अपसव्येन होतव्यं माहूय ब्रूयमे
व च॥ एतत्पाणियज्ञे कुंडं प्रोक्तं विप्रवरैः स्मृतं॥ वह्निकुंडं तु त्रिकोणं मनुरब्रवीत्॥ नव
कर्माणि

श्राद्धेषु सर्वेषु कुंडं पाणितलं मतं॥ परिस्तरणमुद्दिष्टं पत्रमेव कुशोद्भवं। यत्कुंडमयुतेप्रो
क्तं लक्षेन तु द्विगुणं भवेत्॥ चतुर्गुणं कोटिहोमे प्रयुते लक्षहोमजं॥ नेमेखला परिज्ञेया
योनिश्च कुंडरोधवत्॥ कुंडराजानपत्रेण सदृशा वा प्रपद्यते॥ पश्चिमे दक्षिणे योनिका
र्यकार्या विचक्षणैः॥ एवं कुंडानि सर्वाणि यज्ञकर्मणि योजयेत्॥ कुंड स्थानस्थ कयोहो
मो वैश्वदेवं विनाग्नयः॥ गार्हपत्यादयो ये च मा — ये च मनस्विनां। यत्कुंडे समुद्दिष्टं तेषां
कुंडं षट्पकष्टपकं॥ ॥इति श्रीविधानमालायां सर्वहोमकुंडविधानं॥ ॥अथ विवाहव्र
तबंधमध्ये मातृरजोदोषहरं विधानं॥ ॥शांतिपटले॥ विवाहव्रतबंधेन मातायस्या र
जस्वला। मृतस्त्र जडता ज्ञेया क्रमान्मनुजसत्तमैः। तत्र शांतिं प्रवक्ष्यामि सर्वेषां हितका
रिणीं॥ यस्मिन् दिने समुत्पन्नं मातृदोषकरं रजः। तस्माद्दिनात्समारभ्य जपेन्मृत्युंजयं

बुधः॥ चतुर्थेऽह्नि निसंप्राप्ते पंचमे वा समागतः॥ कुर्याच्छिवार्चनं विद्वान्पायसेन समाहितः॥
मंडकैः पूरिकैश्चापि लड्डुकैर्लाकरान्वितैः॥ नक्तेन घृतयुक्तेन पक्वान्नैः पूजयेच्छिवं॥ दी
पान्षोडशसंख्याकानाज्यप्रज्वालितान्शुभान्॥ अर्चयेद्देवदेवाय ह्युपचारैः समन्वि
तान्॥ तत्र मंत्राः पुरुषसूक्तोक्ताः॥ ततः संप्रार्थ्य देवाय सत्वर्योगृहमाव्रजेत्॥ तत्राच्छिजिं
गमाधाय हवनं कारयेद्बुधः॥ अग्निमीळेति मंत्रेण जुहुयाद्घृतं सुधीः। पायसेनैव साज्ये
न स्वगृह्योक्तविधानतः॥ वरयेत्सप्तजिकास्य जिकाः सप्त हविर्भुजः। अप सप्तजिकानामा
न्याह॥ कराली लोहिता श्वेता च लोहिता। पीता च पद्मरागा च सुवर्णाख्यात एव च। लोहिता पूर्व
तो ज्ञेया मध्ये पूर्वाग्निदिशि। सुवर्णा दक्षिणे ज्ञेया पद्मरागा ततः परा। श्वेता च वारुणे ज्ञा २६९
गे पाना वायुदिशि स्मृता। ईशान्यां दिशि प्रतिख्याता या जिका जातवेदसः। सुवर्णमध्यनागस्थां

केचिद्वक्तुर्मनीषिणः॥ कराली नाम सा ज्ञेया तया रक्षांसि शोषयेत्॥ लोहितायाः पिशाचाख्या
यज्ञे विद्यान्तोत्क्रमौ। मध्ये लोहितया यस्ता स्तृप्तिमायांति शाश्वती॥ सुवर्णया यमो देवः पन्न
गः या पद्मरागया। श्वेतया च इह देवाश्च पीतया वेटकादयः॥ ॥ अथ स्तुतिमंत्राः पौराणाः॥ ॥
स्कंदपुराणे॥ नमस्ते रसने देवि तपनस्य करालिके। कृत्वा त्वयि समाश्रित्य राक्षसाः बल
दर्पिताः॥ नमस्ते लोहिते जिके ज्वलनस्य सुशोभने। पिशाचास्तृप्तिमायांति कृत्वा त्वयि इह विः
फलाः॥ नमस्ते वीतिहोत्राय सुवर्णे रजसे शुभे॥ त्वया हुतो यमो देवो ददाति विपुलं सुखं।
पद्मरागे नमस्तेऽस्तु देव पन्नगतर्पणे॥ ज्ञायंते सांप्रतं — विकृते त्वयि कृतान्हानि। अशाणं
तर्पणं श्वेते करुजिके हविर्भुजः॥ कृते इ विषि विभ्रेच्च यरुद्धस्य स्पर्शमादरात्॥ वेटकः का
मदेवश्च समस्ता कुलदेवता॥ पीताया इव नेजाते तृप्तिमायांति शाश्वती॥ ७॥ इति जिकास्त

र्तिंकृत्वासमाप्यविधिवद्यजिं॥अभिषेकंततःकुर्यात्उदक्यास्नुनासह॥ततस्तस्य
द्दक्षिणांदद्यादाचार्यायमनोषितां॥अन्येभ्योब्राह्मणेभ्यश्चयथाशक्तिंसमापयेत्॥क
स्मैचिन्मंचकंदद्यात्सोपधानंसदक्षिणां।प्रेतराजंसमुद्दिश्यमंत्रेणानेनसत्तमः।रुचमंत्रः
नमस्तेधर्मराजायदेवदेवायतेनमः।मंचकस्यास्यदानेनप्रीतोभवममव्रतो।ततस्तस्य
स्मिन्वस्त्रेरजोदृष्टंतद्वासस्त्यपरित्यजेत्॥अपरंवस्त्रमादायब्राह्मणान्भोजयेत्ततः।ए
वंकृतेविधानेचविघ्नानश्यंतितत्क्षणात्॥नंदतेसुखसंतानैःसहमात्रानिजेगृहे॥ ॥
इतिश्रीविधानमालायांविवाहव्रतबंधेमातृजोदोषविधानं॥ ॥अथपुण्याहवाचनं॥
पुण्याहनित्तसंप्राप्यविवाहेचौलकेतथा।नवग्रहेमखेशांतौवस्तुनांतपेवचा।गृहप्रवे
शनेचैवयामस्यानिनिवेदाने॥गजबंधेतुरंगाणांदासादीनांचसंग्रहे।अन्यस्मिन्नपि २८०

व्रतबंधेचयज्ञादौतथाचयज्ञकर्मणि।गृहारंभेधनप्राप्तौतीर्थाभिगमनेतथा॥

सर्वस्मिन्शुभेकर्मणिचोदने।वाचनीयाःद्विजाःसम्यग्वेदशास्त्रपरायणाः।नतत्रकु
नखीकाणोहीनांगोविकलस्तथा।क्षयरोगीचकुष्टीचश्यामदंतोतिशापकः।वंध्यश्च
विधुरोवापिक्रूरस्तस्करखलसेवकः।बकवृत्तिश्चदंभीचहेतुकोऽज्ञानदुर्बलः।सदोप
पत्तिरुन्मत्तोव्यसनीसोमविक्रयी॥कन्याविक्रयकृत्तद्वाजिविक्रयीपितृनोमृतः।लोक
दुष्टःपराधीनोराजसेवापरायणः।एतेचान्येपिविप्राश्चनवाच्याःस्वस्तिवाचने॥तांबूल
मक्षतान्वंदूर्वापुष्पाणिचंदनं॥ॐॐमंक्षतशमीपत्राण्यक्षताःॐकुमान्विताः।पुण्य
तीर्थोदकंसम्यक्निधायकलशेशुभे॥सुवर्णंनिहत्वावैद्रव्यमात्रंनिधापयेत्।पुंगी
फलानिपुष्पानिफलानितुविशेषतः॥सान्वतेनाजनेरम्येदापान्नीराजनात्मकान्॥
संस्थाप्यविधिवद्धीमान्वाचयेत्स्वस्तिवाचनं।उदङ्मुखःप्राङ्मुखोवायजमानःसमाहि

तः॥निविसिमंगले —डेतथान्येपिद्विजातयः॥सद्वृत्तपात्रयःसर्वेशुचयःशुचिवाससः॥
गणेशंकृतदेवींच नमस्कृत्यप्रयतवान्॥कालज्ञानंततःकुर्यात्अनुज्ञातोद्विजा
तिभिः॥प्रारब्धंकृत्यमुद्दिश्यपिधायकलशंसुधीः॥मंगलद्रव्ययुक्तेन ताडनेन समा
हितः॥उद्धृत्यसविधानेनकलशंइमपूरितं॥पद्मासनेसमाविष्टोनमस्कुर्यात्प्रयत्नतः॥
कमलमुकुलसदृशेनांजलिनाकलशंधृत्वाललाटपर्यंमानीयनमस्कृत्यचपुनर्भूमौनि
क्षिप्यकलशंनिरासयेत्॥ततोह्यात्मनेकामरूपिणीवर्चासिद्धकाविप्रोसर्वकामान्सुका
निचित्ततोनित्यंप्रार्थयेत्॥तेष्वापिसूचितानितान्याह॥ऐरावतादयोनागागंगाद्याश्चैव
निम्नगाः॥इमाश्चोत्तगिरोमास्त्राणिविल्वपत्राणिच॥तेनायुष्यप्रमाणेनपुण्याहमेतदस्तु २२१
ति॥दीर्घायुरित्यादिच॥द्वेष्यपिखंडेपठनीये॥द्वितीयांतेसर्वैरुक्तायनिषण्णेपवित्रवाक्याय

त्रेवेतियाज्यायाइति॥मंत्रब्राह्मणेपठित्वापुण्याहमितियजमानोवदेत्तु॥तेअपि
पुण्याहमितित्रिवारोक्तिरियमुच्चयत्र ततस्त्वास्तेनपठित्वास्वस्त्यपूर्ववत्॥ततःसम
स्तस्वस्तिप्राप्यर्पनानागोत्रेणब्राह्मणेभ्योइदंहिरण्यंअमृतरूपेणसंपद्यतामिति
संकल्प्ययथाशक्तिद्रव्यंदत्वापुनरुध्यामितिचततःश्रियेन्विचइहवइतिच॥ ॥इति
स्वस्तिवाचनं॥ ॥इतिश्रीविधानमालायांनृसिंहभट्टविरचितायांसर्वकामसिद्धिदंस्व
स्तिवाचनाख्यंविधानं॥ ॥एवंसर्वविधानानि॥ ॥समाहृतमिदंशास्त्रंसर्वशास्त्रार्थसंग्र
हान्॥विधानमालिकाख्यादिप्राणिनामुपकारकं॥धर्मार्थकामशास्त्रेभ्यःसंगृह्यालंकृ
तंमया॥उद्धृतंसर्वपुष्पेभ्योयंतस्यान्मधुमाक्षिकं॥ग्रंथस्यास्यानुरागेणममानुग्रहणे
नवा॥संतोषयंत्वविद्वांसःस्वचेतांसिसमंसाजं॥वैराटविषयेस्तिचंदनगिरेर्गव्यूति

मात्रं पुरं देव्याः प्राक् स्तुमनोहरं।। वसुमतीतीरे यद्वारं मङ्गलं।। तत्रत्यो त्रिकुलोद्भवो गुणनिधिः श्रीमान्नृसिंहो द्विजश्चक्रे शास्त्रमिदं नृणाम् अमुं पद्धतिं संध्याय चित्ते निजे ।।विधानमानुग्रपितामयाम्नृग्रगणानुसंधानविराजमानां।। अपेरसारैः सुरान्निःपवित्रां कुर्वंतु केचेषु निजेषु धीराः।। ।।इति श्री विधानमाला संपूर्णा।। ।।श्रीरस्तु।। ।।
।।संवत् १७६८ वर्षे कार्त्तिकशुक्ल पौर्णमास्यनंतर प्रतिपदायां बुधे लिखितेयं विधानमाला।। ।।नृसिंहदत्तसुतनृसिंहजागेश्वरेण लिखापिता।।यादृशामिति न्यायान्न मे दोषः।।

२७२